Tiruchi-Advaita Sabha Series No. 4

KHYĀTITATTVASAMĪKSA

By

Nyaya Vedanta Vagisa-Sastraratnakara-Panditaraja

V. SUBRAHMANYA SASTRI

Recepient of president and Sahitya Akedamy's
Awards Chief Pandit Advaita Sabha-Kumbakonam
Retired, Reader in Sanskrit, Annamalai University

Published
By
A. VENKATESWARAN
Secretary, Advaita Sabha-Tiruchi

ADVAITA SABHA, TIRUCHI
1982

Published with the Financial Assistance from
the ministry of Education and culture,
Government of India.

Prof-M. S. P. SHARMA
C/o-Sri Vidya Prathisthanam
W-176, Sector-12, Noida-201301
Ph. 011-89-28709

Tiruchi-Advaita Sabha Series No. 4

KHYĀTITATTVASAMĪKṢĀ

By

Nyaya Vedanta Vagisa-Sastraratnakara-Panditaraja

V. SUBRAHMANYA SASTRI

Recepient of president and Sahitya Akedamy's Awards
Chief Pandit Advaita Sabha-Kumbakonam
Retired, Reader in Sanskrit, Annamalai University

Published
By

A. VENKATESWARAN

Secretary, Advaita Sabha-Tiruchi

ADVAITA SABHA
TIRUCHI
1982

Copies can be had

Sri. **A. Venkateswaran**

No. 10. Ibrahim Park Street
Trichi-8

Printed At:

Phone 309

Kumar Press,
8, Kamakshi Josier Street Kumbakonam 612001,
Tamil Nadu

तिरुच्चि अद्वैतसभाग्रन्थावलिः- संख्या—४

ख्यातितत्त्वसमीक्षा

राष्ट्रपतिभिः साहित्य अकादमिसंस्थया च संमानितैः
न्यायवेदान्तवागीश-शास्त्ररत्नाकर-पण्डितराज-
वे. सुब्रह्मण्यशास्त्रिभिः
विरचिता

तिरुच्चि-अद्वैतसभायाः कार्यदर्शिना
अ. वेङ्कटेश्वरायेण
प्रकाशिता

अद्वैतसभा—त्रिशिरःपुरी
1982
Published with the Financial Assistance from
the ministry of Education and culture, Govt. of India

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya ★ Bharatiya Vidya
126

BVB Sri Sankaracharya Sanskrit
126

INTRODUCTION

The Sabha takes great pleasure to present this rare work of deep erudition of a master mind, Panditaraja Sri V. Subramanya Sastrigal of Tiruvisalur; induced by the ardent lover of Advaita philosophy and an eminent Ayurvedic physician Dr. V. B. Nataraja Sastrigal in commemoration of the unequalled services rendered by late Darmagna Brahmasri (Polagam) Sundaresa Sastrigal, the founder of this institution The subject was chosen by the Panditaraja himself at the request of the doctor, initially to elicit the best in Sanskrit from among the Pandits, under a scheme of a prize-competition but later undertaken to be written by himself in order to record the counter arguments against some of the unresolved criticisms on the Advaita school.

Now, the bone of contention between the Advaitin and other protagonists is about the concept and understanding of Maya, the illusion. Unless the world is realised to be "unreal", there can be no "moksha" or realisation of the Brahmam-Atman identity. But the many philosophies and even a section of the Advaitins do not subscribe to the theory of perception of the unreal or illusion as expounded by the upanishads and as delineated by the great Acharya Sri Sankara Baghavat Pada. The Acharya in all his compassion and consideration for the fellow-beings unlike his predecessors and Vasishta has conceded, in consonance with the three stages of experience, three realities; namely, the Absolute, Paramartha, the Phenomenal or Vyavaharika, and the illusion, 'Prathibhasika'. This subject of illusion ; Vyavaharika or phenomenal will also ultimately fall within this ambito; is defined severally by the different teachers and this study is known as ख्याति वाद: । The conclusion of the Advaitin is अनिर्वचनीयख्याति i. e. the illusion is distinct from the absolute real and the non-existent. This is unintelligible to all others who classify it either as reat or non-existent or a mixture of both. Most of them do not wish to accept the Advaitic explanation because of fear of the Advaitic absolute Reality अभये भयदर्शिन:

and hence raise a bogey of objections from a stand which has no Vedic sanction and which cannot sustain any clever, and close examination.

The Panditaraja has rendered yeoman service in close association with the Maharaja of Cochin to the benefit of scholars by writing elaborate treatises on Nyaya and Tharka earlier but has now given the "magnum opus" to the aspirant and the Pandita-loka leading to the endless enjoyment of Advaitic bliss. His lucidity of language, clarity of thought and the force of argument will quell all reasonable doubts and objections and will enthrone the dictum ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः on i's due pedestal.

We recommend this to all astikas, pandits. scholars students and even the opponents alike. This effort will be considered a success by the wide penetration it makes into reading ranks who are sure to benefit therefrom.

We pay our homage to the Jagatguru Sri Sankaracharya Swamigal of Kanchi Kamakoti Peetam who has graced this volume with His Srimukham and we hope this will enthuse its wide circulation.

Our grateful thanks are due to Sri Panditaraja who spared no pain inspite of his physical disabilities to bring out this masterly edition right from the stage of manuscript, compilation and proof reading upto the completion of publication in record time; to Sri (Dr) V. B. Nataraja Sastrigal; but for whose inducement Philanthropy and sustained interest would it have never occurred to bring out such a book and to the Central Government whose timely sanction of financial assistance made a quick publication possible.

We also acknowledge with thanks the very learned 'foreword' by Dr. C. S. Venkateswaran, a close friend and admirer of Sri Panditaraja and an impartial critic who can discern the merit or otherwise.

We cannot but feel indebted to the dedicated work done by M/s Kumar Press, Kumbakonam to bring this out in record time.

May this please our great Jagatguru, the unparallelled sage of Kanchi, the living embodiment of all that is Divine.

Advaita Sabha,
Tiruchi.

A. VENKATESWARAN,
Jt. Secretary.

श्री काञ्ची कामकोटिपीठाधिपतयः
जगद्गुरवः परमहंसपरिव्राजकाचार्याः



श्री परमाचार्य-चन्द्रशेखरेन्द्रसरस्वतीस्वामिपादाः
श्री जयेन्द्रसरस्वतीश्रीचरणाश्च

Bharatiya Vidya Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya
126

FOREWORD

Dr. C. S. Venkateswaran, M. A., Ph. D.,
Professor of Sanskrit,
Annamalai University (Retd)
Visiting Professor (Honorary) K. S. R. Institute,
Madras-4

This Hand-book entitled Khyāti tattva-Samīkṣā is written by Paṇḍitarāja, V. Subrahmanya Sastri, an erudite scholar both in Nyāya and Advaita Vedānta. It is a critical examination of the theories on the nature of erroneous cognition (bhrama), according to different systems of philosophical thought. Erroneous knowledge is the root-cause of all worldly misery. It is due to erroneous knowledge (mithyājñāna) that a person apprehends silver in a shining piece of oyster-shell or nacre. The cognition involved in such cases is differently conceived, interpreted and termed by the protagonists of different systems of philosophic thought. Here the views of eight such systems are explained and critically reviewed by the author in eight sections called Ullāsas. The last section deals with Anirvacanīya-Khyāti of Advaita Vedānta which the author concludes as most acceptable.

In the first seven sections, the author explains the nature of the seven theories respectively dealt with in each section and points out the drawback which renders each of them untenable.

Section I explains the theory of Ātma-Khyāti (Self-apprehension) accepted by the three schools of Buddhism–Vaibhāṣika, Sautrāntika and yogācāra. The yogācāra (Vijñāna-Vāda) school

of Buddhism explains erroneous cognition as existing in the Ātman (self) which is identical with Conciousness externalising itself in the form of objects like silver.

The second section deals with Asatkhyāti (Non-being's apprehension) accepted by the Mādhyamika (Śūnya-Vāda or nihilistic) school of Buddhism which explains erroneous cognition (bhrama) as consisting in the cognition of a non-being (asat).

The third section is devoted to Abhinava-anyathā Khyāti (New-misapprehension) advocated by the followers of Śri Ānandatīrtha. It is also termed as Sādhiṣṭhāna-asatkhyāti. In section IV the Akhyāti (non-apprehension) advocated by the Prābhākara school of mīmāṁsakas is dealt with. They-do not accept Vibhrama-jñāna (erroneous cognition). Section V deals elaborately with Yathārthakhyāti (right-comprehension, deriving support from Śri bhāṣya and Śruta-prakāśikā. This is explained according to the jñāna-yāthārthya-Vāda of Sri Anantācarya also. The reality (satyatva) of svapna-padārthas is also explained. All these have been reviewed here, by the author. The Viśiṣṭādvaitins maintain that the object of bhrama is always real, and there is, strictly speakings no invalid cognition at all. The sixth section deals with Sadasatkhyāti (apprehension of the being and non-being) accepted by the neoğrammarian Nāgeśabhaṭṭa following the lead given by the Sāṅkhya sūtras. The Sāṅkhyas are supposed to accept Akhyāti on the strength of, Bhāmati, Kalpataru, Parimala, Tattvadīpana etc.,

The seventh section deals with Anyathā khyāti (mis-apprehension) accepted by the Naïyāyikas. The cognition of silver in nacre is illusory due to bhrama.

The eighth and last section is devoted to Anirvacanīya-Khyāti (Indefinable apprehension) accepted by the followers of Sri Śaṅkara's Advaita Vedānta. Nageśa's view that this theory has not been referred to in the Vedānta Sūtras or Śānkara's Bhāṣya has been critically examined and refuted already in section 6 where some other important points have also been explained.

Moreover, the theories of yathārtha-Khyāti Sadasad-Khyati and Sad-uparakta-asat-Khyāti which find no special treatment in the commentary on Paribhāṣā or in Prakarana works like Siddhāntaleśa-Sangraha, have been specially dealt with here by the author who has realised the necessity for explaining these concepts by long experience in study and teaching. Hence students of Vedānta should study this hand-book closely and derive immense benefit therefrom.

The Kumār Press deserves special praise for the neat printing and get-up of the work. The learned author has been doing yeoman service for long to the cause of Vedānta. May God Almighty vouchsafe to the author many more years of health and happiness for continuing his laudable service to the cause of Vedāntic Learning.

38, New Street
Chidambaram
5—3—1982

C. S. Venkateswaran

॥ श्रीः ॥

श्रीमत्परमहंस परिव्राजकाचार्यवर्ये-
श्रीमच्छंकरभगवत्पादप्रतिष्ठित
श्रीकाञ्ची कामकोटि पीठाधिप जगद्गुरु
श्रीमच्चन्द्रशेखरेन्द्रसरस्वतीश्रीपादादेशानुसारेण
श्रीमज्जयेन्द्रसरस्वतीश्रीपादैः क्रियते नारायणस्मृतिः ।

पण्डितराज सुब्रह्मण्यशास्त्रिविरचितं ख्यातितत्त्वसमीक्षाभिधं ग्रन्थमामूलाग्रं परिशीलयन्तो वयमतीव प्रमुदितस्वान्ताः स्मः । अत्र ख्यातिशब्देन इदं रजतमित्यादि भ्रमज्ञानं विवक्षितम् । तत्र शास्त्रकारा बहुधा विवदन्ते । आत्मख्यातिः, असत्ख्यातिः, अख्यातिः, अन्यथाख्यातिः, अनिर्वचनीयख्यातिरिति पञ्च ख्यातयः सुप्रसिद्धाः । तास्वनिर्वचनीयख्यातिरेवाद्वैतिसम्मता । इतरख्यातीनां श्रुतिस्मृतियुक्त्यादिविरुद्धत्वं यावन्न प्रतिपाद्यते तावत् प्रपञ्चस्यानिर्वचनीयत्वात्मकं मिथ्यात्वं न सिद्ध्येत् । तदसिद्धौ चाद्वैतासिद्धिः । अतः अद्वैतरक्षार्थं अद्वैतद्वैतविशिष्टाद्वैतनव्यव्याकरणादिग्रन्थेषु यावत्यः ख्यातयो निरूपितास्तास्सर्वा अपि अवश्यं विमर्शनीया भवन्ति ।

न्यायवेदान्तवागीश – शास्त्ररत्नाकर–पण्डितराजविरुद-भूषिताः वे. सुब्रह्मण्यशास्त्रिणः बहुशास्त्रविदः विमर्शकुशलाः न्याये वेदान्ते च नानाविधग्रन्थविरचनेन लब्धप्रतिष्ठा इति विदितमेवेदं विदुषाम् । तैस्सर्वा अपि ख्यातीस्समालोच्य एतद्ग्रन्थान्ते "तस्मात् पूर्वाचार्यैर्व्यवस्थापितः अनिर्वचनीय-ख्यातिपक्ष एव समीचीनपद्धतिमध्यास्ते" इत्युपसंहृतम् ।

उल्लासाष्टकपरिमिते शब्दतो लघुभूतेऽपि अस्मिन् ग्रन्थे बहवः अपूर्वा अर्थास्समीक्षिताः । अत्र क्रमेणैताः ख्यातय उपपादिताः । १ आत्मख्यातिः । २ असत्ख्यातिश्च बौद्धसम्मता । ३ आनन्द-तीर्थीयसम्मताप्यसत्ख्यातिरेव । तथापि बौद्धमतसादृश्य-परिहाराय तैरन्यथाख्यातिः अभिनवान्यथाख्यातिर्वा तदभि-मतेति व्यपदिश्यते । ४ गुरुमतावलम्बिनो मीमांसकाः अख्यातिवादमातिष्ठन्ते । ५ यथार्थख्यातिवादिनो रामानु-जीयास्तु जाग्रत्कालीनानां शुक्तिरजतमरीच्युदकादिप्रतीतीनां स्वाप्नपदार्थप्रतीतीनां च यथार्थत्वमेवोपपादयन्ति । ६ नव्य-वैयाकरणाः श्रीनागेशभट्टाः सदसत्ख्यातिं व्यवस्थापयन्ति । किञ्च "इयमेव ख्यातिस्सांख्यसूत्रानुसारिणी, अनिर्वच-नीयोत्पत्तिवादः वेदान्तसूत्रतद्भाष्यानभिमतः, अनादिरविद्या च न भाष्यकारादिसम्मता" इति बृहत्स्मृतिसिद्धान्तविरुद्धं भाषन्ते ।

७ तार्किकास्तु अन्यथाख्यातिमाचक्षते। अद्वैतग्रन्थमात्राध्येतृणां द्वैत–विशिष्टाद्वैत–नव्यवैयाकरणग्रन्थोपपादिताः ख्यातिवादाः अविदितप्राया एव स्युः। अत्रादितः सप्तसूल्लासेषु पूर्वोक्तास्सर्वा अपि ख्यातीस्तत्तद्ग्रन्थानुसारेण सम्यगुपपाद्य समीचीनतमाभिर्युक्तिभिस्तासामसामञ्जस्यं सुष्ठु निरूपितम्। अतः अद्वैतिनामिदं महते उपकाराय कल्पते।

अन्तिमे चाष्टमोल्लासे औपनिषदानां अनिर्वचनीयख्यातिः, प्रत्यक्षानुमानार्थापत्त्यादिबहुप्रमाणगम्या भाष्यतट्टीकादिनानाग्रन्थसम्मतेति च निपुणतरमुपपादितम्।

तदेवं महोपकारक–रमणीयग्रन्थनिर्मातारः शास्त्रिवर्याः अनेकनूतनग्रन्थनिर्माणनिपुणाः भगवतश्चन्द्रशेखरस्य कृपया सर्वाणि श्रेयांस्यवाप्नुयुरित्याशास्महे।

मुखाम्–मधुरा
दुर्मतिसंवत्सर–फाल्गुन शुद्ध–
त्रयोदशी भानुवासरः।
7—3—82

नारायणस्मृतिः

ख्यातितत्त्वसमीक्षाप्रणेतारः

राष्ट्रपतिभिः साहित्य-अकादमि संस्थया च संमानितैः

न्यायवेदान्तवागीश-शास्त्ररत्नाकर-पण्डितराज-

वे. सुब्रह्मण्यशास्त्रिणः

प्रस्तावना

वक्तारमासाद्य यमेव नित्या सरस्वती स्वार्थसमन्विताभूत् ।
निरस्तदुस्तर्ककलङ्कपङ्का नमामि तं शङ्करमर्चिताङ्घ्रिम् ॥

तत्त्वदर्शिनो महर्षयः दुःखपङ्कनिमग्नान् जनान् उद्दिधीर्षवः दुःख निदानमिथ्याज्ञानसमुच्छेदाय तत्तद्दर्शनेषु तत्त्वानि उपादिशन्। समुच्छेद्यं च मिथ्याज्ञानं तत्त्वतो ज्ञेयम् । अतः परीक्षकाः विषयविवेचनपूर्वकं मिथ्याज्ञानस्य तत्त्वं प्रतिपादयामासुः ।

तत्र परीक्षकाः केचन सद्वादिनः, अन्ये असद्वादिनः, इतरे सदसद्वादिनः, सदसद्विलक्षणानिर्वचनीयत्वादिनश्चापरे । आत्मरूपान्तरविज्ञानरूपं रजतं बहिरवभासते इति आत्मख्यातिवादिनः विज्ञानवादिसौगताः । इदं रजतं इति न एक पुरोवर्तिनि रजतत्ववैशिष्ट्यावगाहिज्ञानम्, किं तु इदमिति ग्रहणात्मकं, रजतमिति प्रमुष्टतत्ताकस्मरणात्मकं ज्ञानमिति ज्ञानद्वयम् । तच्च यथार्थमेव । पुरोवर्तिनि रजतभेदाग्रहात् प्रवृत्तिरिति अख्यातिवादिनः प्रभाकरगुरुमतानुयायिनः मीमांसकाः । भूयोभिः शुक्तेरवयवैः ततोऽल्पैः रजतावयवैश्च आरब्धं शुक्तिशकलम् । तत्र विद्यमानमेव रजतं शुक्त्यंशमपहाय भाति । अतः पुरोवर्तिनि शुक्तिशकले रजतस्य विद्यमानत्वात् इदं रजतमिति विशिष्टज्ञानं यथार्थमेव । नेदं रजतमिति ज्ञानेन प्रवृत्तेर्बाधः । स च अनुत्पादः विफलता वा ।

स्वप्ने तत्काल एव तत्तत्पुरुषोपभोग्याः आश्चर्यरूपाः पदार्थाः सत्याः ईश्वरेण सृष्टाः इति स्वप्नज्ञानमपि यथार्थमेवेति यथार्थख्यातिवादिनो रामानुजीयाः ।

इदं रजतमिति ग्रहणद्वयम् । तदेव भ्रमपदवाच्यम् । विभिन्नज्ञानीययोरपि इदंविषयता– रजतविषयतयोः निरूप्यनिरूपकभावः । अतश्च ज्ञानद्वयं सत्यरजतज्ञानसाधारणरूपेण प्रवर्तकम्, नेदं रजतमिति ज्ञानप्रतिबध्यं च । रजतं पश्यामीत्यनुभवात् रजते चाक्षुषलौकिकविषयता अस्ति । तत्प्रयोजकस्य रजतेन्द्रियसंनिकर्षस्य निर्वाहाय व्यवहिते रजते संनिकर्षाभावात् पुरोवर्तिनि शुक्तिशकले रजतावयवसद्भावव्यवस्थापनं कृतं श्रीभाष्ये । ज्ञानद्वयं च प्रत्येकं यथार्थमेव । एवमेव जागरिते स्वप्ने च सर्वप्रतीतीनां यथार्थता इति परे रामानुजीयाः ज्ञानयाथार्थ्यवादप्रणेतारः ।

पुरोवर्ति रजतत्वेन भासते । इदं, रजतं, तादात्म्यं चेति भासमानं त्रितयं सदेव । व्यवहितं सत्यं रजतं ज्ञानलक्षणया प्रत्यासत्त्या भासते इति अन्यथाख्यातिवादिनः तार्किकाः । एते चत्वारोऽपि परीक्षकाः सद्वादिनः ।

लोचने करसंमर्दिते सति केशपिण्डभ्रमो जायते । स एव "केशोण्डुकभ्रमः" इति व्यपदिश्यते । तत्र केशपिण्डः अत्यन्तं असन् । नाऽपि तत्र किंचित् सत्यं अधिष्ठानमस्ति ।

तद्वदेव इदं रजतमिति विभ्रमः सत्याधिष्ठानशून्यः अत्यन्तासद्रजतविषयकः इति निरधिष्ठानासत्ख्यातिवादिनः माध्यमिकाः सौगताः । नेदं रजतमिति बाधानन्तरं असदेव रजतमभात् इत्यनुभवेन भ्रमे भासमानं रजतं असदेव । असतश्च ज्ञान प्रपञ्चे असद्वैलक्षण्यज्ञानाय आवश्यकमेव । अत्यन्तासद्रूप्यात्मना पुरोवर्ति सत् भासते इति सदुपरागेण असतो भानं स्वीकुर्वन्तः साधिष्ठानासत्ख्यातिवादिनः आनन्दतीर्थीयाः । इमे उभयेऽपि परीक्षकाः असद्वादिनः ।

आरोपितसत्ववत् असद्रजतं भ्रमे भासते । आरोपितत्वानारोपितत्वाभ्यां सत्वासत्वयोः एकत्र न विरोधः । साङ्ख्यसूत्रानुसारिणी च सदसत्ख्यातिः । सैव व्यासाभिमता । न अनिर्वचनीयख्यातिः ब्रह्मसूत्रारूढा, न वा भाष्यारूढा । अनिर्वचनीयत्वं च असंगतमिति सदसत्ख्यातिवादिनः लघुमञ्जूषाकाराः । एते सदसद्वादिनः ।

तत्कालोत्पन्नं अभिनवं सदसद्विलक्षणं अनिर्वचनीयं तत्वज्ञाननाश्यं च रजतं भ्रमे भासते इति अनिर्वचनीयख्यातिवादिनः औपनिषदाः सिद्धान्तिनः आतिष्ठन्ते । एते सदसद्विलक्षणानिर्वचनीयवादिनः परीक्षकाः ।

विना इतरपरीक्षकाभिमतमिथ्याज्ञानतद्विषयसमालोचनं न सैद्धान्तिकं अनिर्वचनीयख्यातिसतत्वं निर्धारयितुमलम्,

इति ख्यात्यन्तरपरिशीलनं आवश्यकं भवतीति गहनस्य वेदान्तदर्शनस्य व्युत्पित्सूनां अवबोधाय पुरातनविद्वद्भिः विरचितेषु प्रकरणग्रन्थेषु इतराभिमतख्यातिसमालोचनं विहितमस्ति। परं तु रामानुजीयानां, आनन्दतीर्थीयानां, मञ्जूषाकाराणां च अभिमतख्यातीनां स्वरूपं न समालोचितं तेषु निबन्धेषु। अतः ईदृशख्यातीनामपि समालोचकः कश्चन प्रकरणग्रन्थः यद्यभविष्यत्, तदा वेदान्तदर्शनव्युत्पित्सवः बहु उपकृता अभविष्यन् इति चिन्ता मम मनसि चिरात् प्रादुरभूत्।

एवं अतीते बहुतिथे समये, शास्त्रतत्वार्थबोधकग्रन्थप्रणयनकुतुकिनः स्वयं प्रबन्धारः आयुर्वेदस्येव वेदान्तदर्शनस्याऽपि सेवां कर्तुमुद्यताः मम प्रियसुहृदः आयुर्वेदाचार्याः ब्रह्मश्रीसंपन्नाः वा—बा-नटराजशास्त्रिमहोदयाः मह्यं प्रतमेकं प्राहिण्वन्। तत्र वेदान्तदर्शनतत्वार्थनिरूपकस्य अभिनवग्रन्थस्य रचयिता पण्डितः त्रिशिरःपुरीयाद्वैतसभाद्वारा संमाननीयः इत्यभिलषामि इति निर्दिष्टमासीत्। कतिपयदिनानन्तरं वेदान्तसेवानिरतैः वेदान्ततत्वार्थनिवेदकप्रबन्धप्रकाशनकार्ये कुतुकिभिः अद्वैतसभाकार्यदर्शिभिः ब्रह्मश्रीयुत वेङ्कटेशार्यमहोदयैः सह समालोच्य, प्रणयपरतन्त्राः ते शास्त्रिमहोदयाः जरठमपि मां तादृशनिबन्धरचनभारवाहिनमकुर्वन्। जरया, रुजाभिश्च पीडितः स्खलद्गतिरपि अहं सुहृदां शासनं अनतिलङ्घनीयमिति, विद्याधीशस्य महेश्वरस्य प्रसादमेकमवलम्ब्य, तन्त्रार्थविचारण-

कौतुकेन विमृश्य पूर्वाचार्यविरचितप्रबन्धान्, यथामति अष्टोल्लासात्मिकामिमां ख्यातितत्त्वसमीक्षां व्यरचयम् । तत्र पञ्चमोल्लासे, श्रीभाष्य–तट्टीकानुसारेण रामानुजीयानां यथार्थख्यातिनिर्वाहप्रकारः, परेषां रामानुजीयानां तन्निर्वहणप्रकारश्च विविच्य विस्तरेण निरूपितः समालोचितश्च । स्वाप्नसत्यताऽपि समीक्षिता ।

षष्ठे बुद्धिसत्ताविशिष्टपदार्थमभ्युपगच्छतां, मञ्जूषाकाराणां सदसत्ख्यातिप्रपञ्चनं निरूपितं समालोचितं च । प्रौढानां ग्रन्थोद्धारपूर्वकं, अख्यातिरेव सांख्यसंमता न सदसत्ख्यातिरिति विशदीकृतम् । अनिर्वचनीयख्यातेः ब्रह्मसूत्रभाष्यारूढता स्पष्टीकृता । अनिर्वचनीयत्वदूषणानि च पराकृतानि ।

तृतीये, आनन्दतीर्थीयाभिमता सदुपरागेण असत्ख्यातिः प्रपञ्चिता, समालोचिता च । आत्मख्यातिः, निराधिष्ठानासत्ख्यातिः, अख्यातिः, अन्यथाख्यातिश्च प्रथम–द्वितीय–चतुर्थ–सप्तमेषु संग्रहेण प्रतिपादिता, समालोचिता च वर्तते । अष्टमे, औपनिषदसिद्धान्तसिद्धा अनिर्वचनीयख्यातिः, अवश्यज्ञेयचोद्यतत्परिहारसंकलनेन सह सप्रमाणं भाष्याद्याकरग्रन्थारूढताकथनपूर्वकं विवेचिता वर्तते ।

एतद्ग्रन्थस्थदोषान् दूरीकृत्य गुणलवग्रहणेनानुगृह्णन्तु मां तत्र भवन्त इति ब्रह्मविदः प्रार्थये । विश्वसिमि च ग्रन्थोऽयं व्युत्पित्सूनां कथंचिदुपकाराय कल्पेतेति ।

शास्त्रिवर्याणां प्रेमवशंवदः, ब्रह्मविद्भिः रसिकैः आस्तिकवर्यैश्च भूषितेऽत्र सदसि ख्यातितत्त्वसमीक्षामिमां आयुर्वेदाचार्याणां करकमलयोः समर्पयामि त्रिशिरःपुरीयाद्वैतसभाद्वारा प्रकटीकर्तुम् । शास्त्रिचरणान्, सभाकार्यदर्शिनश्च, चिरात् तदभिलषितात्मानुभवरूपमुख्यविद्याप्रदानेन विद्याधीशो महेशः अनुगृह्णातु इति भगवन्तं प्रार्थये ।

यैराबाल्यात् रक्षितोऽयं जनः येषामनुग्रहात् सर्वमिदं कार्यजातं निर्वर्तितम्, तेषां प्रत्यक्षदैवतानां काञ्चीकामकोटिपीठाधीशानां जगद्गुरूणां, तथा तदादेशेन भगवत्पादकैङ्कर्यं अनारतमनुष्ठातृणां उदारचरितधिषणानां श्रीकाञ्चीकामकोटिपीठाधीश-जगद्गुरु श्रीजयेन्द्रसरस्वती श्रीचरणानां च चरणकमलयोः पादपातैः विधाय प्रणामान् उपसंहरामि इमां प्रस्तावनाम् ।

8-रङ्गरायरग्रहारः
कुम्भघोणम्
27—7—80

ब्रह्मविदामनुचरः,
वे. सुब्रह्मण्यशास्त्री ।

ख्यातितत्त्वसमीक्षायाः विषयानुक्रमणिका

विषयः	पुटसंख्या
मङ्गलम्	1
प्रथमोल्लासः	2-6
आत्मख्यातिनिरूपणम् ।	2-4
तत्समालोचनम् ।	4-6
द्वितीयोल्लासः	6-13
निरधिष्ठानासत्ख्यातिप्रतिपादनम् ।	6-9
तत्समालोचनम् ।	9-13
तृतीयोल्लासः	14-26
दुष्टेन्द्रियं संनिकृष्टमिदमंशं असद्रूप्यात्मना गृह्णाति इति आनन्दतीर्थीयानां साधिष्ठानासत्ख्यातिनिरूपणम् ।	14-18
तन्मतसमालोचनम् ।	18-26
चतुर्थोल्लासः	27-34
भ्रमस्थले, इदमिति ग्रहणात्मकं रजतमिति प्रमुष्टतत्त्वाकं स्मरणं चेति समीचीनमेव ज्ञानद्वयं जायते न विभ्रम इति प्रभाकरगुरुमतानुयायिनां अख्यातिवादप्रतिपादनम् ।	27-29
तत्समालोचनम् ।	29-34

विषयः	पुटसंख्या
पञ्चमोल्लासः	34-98
श्रीभाष्य तट्टीकानुसारेण सर्वापि प्रतीतिः यथार्थेति रामानुजीयानां यथार्थख्यातिप्रपञ्चनम् ।	34-48
त्रिवृत्करणप्रतिनिधिन्यायाभ्यां शुक्तिशकलावयवैः रजतावयवैश्चारब्धं शुक्तिशकलमिति निरूपणमुखेन इदं रजतमिति विशिष्टज्ञानस्य यथार्थत्वनिरूपणम् ।	34-41
जाग्रत्कालिकानां मरीच्युदकादिप्रतीतीनां याथार्थ्यप्रतिपादनम् ।	41-43
जाग्रत्कालिकदेशकालादिविसंवादेऽपि परमेश्वरसृष्टाः स्वप्नकालमात्रे तत्तत्पुरुषमात्रानुभाव्याः अर्थाः सत्याः तद्विषयिणी स्वाप्नप्रतीतिरपि यथार्था ।	44-47
जागरेऽपि शुक्तौ रजतप्रतीतिः तत्काले परमेश्वरसृष्टपरमार्थरजतविषयिणी यथार्थैवेति पक्षप्रतिपादनम् ।	47-48
ज्ञानयाथार्थ्यवादप्रणेतॄणां परेषां रामानुजीयानां मतेन सर्वासां प्रतीतीनां यथार्थत्वनिरूपणम् ।	48-61
सर्वं ज्ञानं यथार्थमिति वाक्यार्थनिष्कर्षः, इदं, रजतमिति च ग्रहणद्वयं, तदीयविषयतयोः निरूप्यनिरूपकभावः,तादृशं ज्ञानद्वयमेव भ्रमपदवाच्यम्, तच्च प्रत्येकं यथार्थमेव, रजतं पश्यामि इत्यनुभवात् रजते इन्द्रियसंनिकर्षाय, त्रिवृत्करण प्रतिनिधिन्यायाभ्यां शुक्तिशकले रजतावयवस्वीकारः भाष्यकारस्येति स्वपक्षनिरूपणम् ।	48-53

विषयः	पुटसंख्या
जागरकालीनानामन्यासामपि प्रतीतीनां ज्ञानद्वय-स्वीकारेण यथार्थ्यनिर्वाहः ।	53-58
स्वप्ने सृष्टस्य सत्यत्वेऽपि, दण्डघटयोः कार्यकारणभावस्य, धूमादेः वह्न्यादिव्याप्यत्वादेश्च निर्वाहः ।	58-60
जाग्रत्कालिकभ्रमविषयस्य सत्यस्य सृष्टिरिति पक्षेऽपि ईश्वरस्य न भ्रान्तत्वं, न वा हेयगुणवत्त्वादिकमिति प्रति-पादनम् ।	60-61
श्रीभाष्य तट्टीकानुसारेण जाग्रत्कालीनप्रतीतीनां यथा-र्थत्वनिर्वाहसमालाचनम् ।	61-72
शुक्तिशकलस्य शुक्त्यवयव—रजतावयवारब्धत्वे, शुक्तौ प्रादेशिकतयैव रजतप्रतीतिः स्यात्, न सामस्त्येन इत्यादिदोषगणनिरूपणम् ।	61-66
नेदं रजतमिति प्रत्ययस्य स्वारसिकभेदविषयकत्वपरि-त्यागः, नञः शुक्तित्वार्थकत्वं, इयं शुक्तिः नेदं रजतं इति वाक्यस्य असामञ्जस्यं च ।	67
सर्वथा अख्यातिमतकुक्षिप्रवेश एव यथार्थख्याति-वादिनामिति सप्रपञ्चं निरूपणम् ।	67-72
ज्ञानयाथार्थ्यवादप्रणेतॄणां परेषां रामानुजीयानां जाग्र-त्कालिकप्रतीतियथार्थत्वनिर्वाहसमालोचनम् ।	73-89
रजतत्वं शुक्तिनिष्ठविषयतावच्छेदकत्वाभाववत् शुक्त्य-वृत्तित्वात् इति प्रयोगे, अन्यतरासिद्धो हेतुः, एतन्मतेऽपि रजतावयवानां शुक्तौ समर्थनेन शुक्त्यवृत्तित्वस्य रजतत्वे असिद्धेः ।	73-74

विषयः	पुटसंख्या
इदं, रजतं इति ग्रहणद्वयस्वीकारे रजतत्वेनेदं जानामि इत्यनुभवविरोधः, रजतत्वप्रकारकत्वविशिष्टज्ञाने इदं-विशेष्यकत्वान्वये एव अवच्छेद्यावच्छेदकभावावगाहन-संभवात् ।	75–76
इदं, रजतमिति ज्ञानद्वयं विभिन्नज्ञानीयविशेष्यतानि-रूपितप्रकारताशालि भ्रमपदवाच्यं प्रवर्तकम्, नेदं रजतं इति बाधज्ञानप्रतिबध्यं च इत्ययुक्तम् ।	77–83
स्थाणौ पुरुषं पश्यामि इत्यनुभवानुरोधेन भ्रमीय लौकिक-विषयतायां दोषविशेषस्य प्रयोजकत्वावश्यकत्वात् तेनैव रजतं पश्यामीत्यनुभवोपपत्तेः, ज्ञानद्वयवादिमते त्रिवृत्कर-णन्यायमाश्रित्य शुक्तौ रजतसद्भावस्वीकारः व्यर्थः ।	83–86
स्वाप्नप्रतीतीनां याथार्थ्यनिर्वाहसमालोचनम् ।	86–95
दृष्टविरुद्धकल्पनया स्वाप्नार्थसत्यतानिरूपणे निमित्त-सृष्टिश्रुत्या, न तत्रेत्यादिना मिथ्यात्वेनैव स्वाप्नार्थ-सृष्टिबोधनात्, आत्मनः स्वयंज्योतिष्ट्वनिर्णयाय स्वप्ना-वतारात्, उतेव जक्षत् इति इवकारानुविद्धतया स्वाप्न-भोगवर्णनाच्च स्वाप्नार्थाः जीवसृष्टाः मिथ्याभूता एव । तेषां आश्चर्यत्वमपि मिथ्यात्वपर्यवसायीति, तत्प्रतीतिः न यथार्था ।	87–93
स्वाप्नार्थानां सत्यत्वे सर्वस्मिन्नपि कार्यकारणभावे कार्य-कोटौ अव्यवहितोत्तरवनिवेशापत्त्या अनुगतकार्यकारण-भावविलोपप्रसङ्गः, धूमस्य वह्न्यभिचारापत्तिश्च ।	93–95

विषयः	पुटसंख्या
शुक्ति रजतादिकमपि ईश्वरसृष्टं सत्यमेवेति पक्षे, भ्रम-विषयज्ञातृत्वेन परमेश्वरस्य भ्रान्तत्वप्रसङ्गः, अनादि-निधनं ब्रह्म हेयगुणवत् इति भ्रमसंभवेन तस्य हेयगुण-वत्त्वापत्तिश्च इति निरूपणम् ।	95-97
अनुभव-स्मृति-अभियुक्तवचनादिस्वारस्यात् भ्रमस्वीकार एवोचितः । अत एव श्रीभाष्यकारस्याऽपि पूर्वमुक्तः अन्यथाख्यातिवादः अभिमतः इत्यपि वदन्ति । तस्मात् यथार्थख्यातिवादः न समीचीनः ।	97-98
षष्ठोल्लासः	99-144
नव्यवैयाकरणानां नागेशभट्टानां सदसत्ख्यातिनिरूपणं अनिर्वचनीयख्यातिनिरासश्च ।	99-113
बौद्धार्थसाधनम् ।	99-101
पूर्वरजतज्ञानजन्यसंस्कारवशात् बुद्धिसिद्धरजतविशिष्टेद-माकारान्तःकरणवृत्तिः भ्रमः । भ्रमे भासमानं रजतं बहिरसत्, बाधज्ञानोदयात्पूर्वमारोपितसत्ववत् इति सदसत्ख्यातिनिर्वहणम् ।	101-105
अनिर्वचनीयोत्पत्तिवादः वेदान्तसूत्र—भाष्यकारयोः नाभिमतः ।	105-106
अनिर्वचनीयस्य भ्रमस्थले उत्पादनिराकरणम् । सांख्य-सूत्रोपन्यासपूर्वकं सदसत्ख्यातिकथनम् ।	106-110
भ्रमः स्थूलाविद्या, तज्जनकसंस्कारः सूक्ष्माविद्या । ततो-ऽतिरिक्ता अनादिरविद्या न भाष्यकारादिसंमता ।	111-113

विषयः	पुटसंख्या
नव्यवैयाकरणोक्तसमालोचनम् ।	114-144
बौद्धार्थनिराकरणम् ।	114-120
अन्तःकरणवृत्तेः सदसत्ख्यातित्वनिरासः ।	120-122
सांख्याः अख्यातिवादिनः इति प्रामाणिकग्रन्थेभ्यो ज्ञायते, विज्ञानभिक्षुसंमतसांख्यसूत्रपाठानुसारेण सदसत्ख्यातिवादिनःइत्युक्तेऽपि, न विज्ञानभिक्षुभाष्यानुसारि इदं सदत्ख्यातिनिरूपणम् ।	122-125
अनिर्वचनीयख्यातेः सूत्रानारूढत्ववचनं अत्यन्तासङ्गतं इति निरूपणम् । तत्तच्छास्त्रसिद्धान्तितानां सर्वेषां तत्तत्सूत्रारूढत्वनियमो नास्ति ।	125-128
मायामात्रमिति सूत्रे मायापदेन असदर्थावभास एव उक्तः इत्यस्य, मायापदस्य सप्रमाणं मिथ्यात्वविशिष्टार्थकत्वस्थापनेन निरासः ।	128-131
अनिर्वचनीयस्य उत्पादः श्रुति—सूत्र—भाष्यादिसिद्धः, आवश्यकश्च ।	131-333
भ्रमविषयस्योत्पादेऽपि ज्ञानस्य भ्रमत्वमव्याहतम् । अनिर्वचनीयस्य रजतस्य ज्ञाननाश्यत्वे न कोऽपि विरोधः ।	133-135
सदसद्विलक्षणत्वं अप्रसिद्धम् इत्यादिनागेशोक्तीनां असंगतत्वनिरूपणम् ।	136-139
सदसद्विलक्षणत्वं न अनिर्वचनीयत्वमिति खण्डनकाराशयः, इत्युक्तेः, खण्डनग्रन्थ-तद्व्याख्यानोपन्यासेन निराकरणम् ।	139-141

विषयः	पुटसंख्या
भ्रम–तत्संस्कारातिरिक्ता अनादिः अनिर्वचनीया सद्-सद्विलक्षणा अविद्या नास्ति, नाऽपि भाष्यकारादिभिरुक्ता इति नागेशोक्तेः पूर्वाचार्यवाक्योद्धारपूर्वकं सप्रमाणं अनाद्यविद्यानिरूपणेन पराकरणम् ।	141–144
सप्तमोल्लासः	145–154
शुक्तिरजतभ्रमे असंनिहितं सत्यमापणस्थं रजतं ज्ञानलक्षणप्रत्यासत्त्या भासते । असतः संसर्गस्य न भानम् । सन्मात्रविषयकं व्यधिकरणप्रकारकं ज्ञानं भ्रमः–अन्यथाख्यातिरिति सप्रमाणं तार्किकमतनिरूपणम् ।	145–148
प्रत्यक्षसामान्यसामग्रीविरहेण, अनावश्यकतया, ज्ञानलक्षणाङ्गीकारे अनुमितिमात्रोच्छेदापत्त्या च ज्ञानलक्षणप्रत्यासत्तेरभावात्, असंनिहितरजतभानं न युक्तम्, सर्वत्र भ्रमे असंनिहितवस्तुभानासंभवश्चेति तार्किकमतसमालोचनम् ।	149–154
अष्टमोल्लासः	155–174
औपनिषदसिद्धान्तसिद्धाया अनिर्वचनीयख्यातेः प्रतिपादनम् । भ्रमविषयस्यानिर्वचनीयत्वे, मिथ्यैव रजतमभादिति प्रत्यक्षं प्रमाणम् । भ्रमविषयस्योत्पादं विना न सर्वत्र निर्वाहः ।	155–157
जले बुद्बुदोत्पादविनाशयोरिव अभिनवरजतोत्पादविनाशयोः कुतो न प्रतीतिरिति शङ्काया निरासः ।	158–159

विषय:	पुटसंख्या
अनुमानमर्थापत्तिश्चानिर्वचनीयत्वे प्रमाणम् । अनिर्वचनीयत्वस्वरूपनिष्कर्षः ।	161-163
अनिर्वचनीयोत्पादप्रकारः, रजताकाराविद्यावृत्तिव्यतिरेकेण रजतस्याप्युत्पाद आवश्यकः ।	163-165
रजतस्य प्रत्यक्षत्वसिद्धये स्मरणहेतुसंस्कारसिध्दये च रजताकारवृत्तिः स्वीकार्या ।	165-167
अनुगतस्य जडानां भाने प्रयोजकस्य चैतन्याकारत्वस्योपपत्तये, अस्वच्छे जडे रजते वृत्तिः स्वीकार्या, इति मतनिरूपणम् ।	167-168
रजताकारवृत्तौ इदंवृत्तितादात्म्यभानात् न वृत्तिद्वयस्वीकारेऽपि अख्यातिमतप्रवेशः । ज्ञानविषययोरैक्याध्यासे ज्ञानयोरैक्याध्यासात् ज्ञानैक्यानुभवः । अथवा रजतमिदन्त्वेनेव, रजतज्ञानमिदंज्ञानत्वेन भासते ।	169-170
भाष्य - भामती- कल्पतरु- परिमलादिग्रन्थोध्दरणपूर्वकमनिर्वचनीयख्यातेः पूर्वाचार्यव्यवस्थापितत्वप्रदर्शनम् ।	171-173
ग्रन्थोपसंहारः ।	173-174

शिवं भूयात्

Prof-M. S. P. SHARMA
C/o-Sadvidya Pratisthanam
W-176 ... -12, Noida-201301
PA... 09

। श्रीगुरुभ्यो नमः ।

॥ख्यातितत्त्वसमीक्षा॥

प्रारम्भाः फलिनः प्रसन्नहृदयो यश्चेत्तिरश्चामपि
नो चेत् विश्वसृजोऽप्यलं विफलतामायान्त्युपायोद्यमाः ।
विश्वैश्वर्यमतो निरङ्कुशमभूद्यस्यैव विश्वप्रभोः
सोऽयं विश्वहिते रतो विजयते विघ्नेश्वरो विश्वकृत् ॥ ॥ १ ॥

विरुद्धधर्मद्वयसंनिपातेऽप्यभेद एवेति विभावयन्तम् ।
पुनातु भेदप्रतिभासशून्यं स्त्रीपुंसरूपं शिवयोः शरीरम् ॥ ॥ २ ॥

यद्वक्त्रमानससरःप्रतिलब्धजन्म-
भाष्यारविन्दमकरन्दरसं पिबन्ति ।
प्रत्याशमुन्मुखविनीतविनेयभृङ्गाः
तान्भाष्यवित्तकगुरून् प्रणतोऽस्मि मूर्ध्ना ॥ ॥ ३ ॥

मिथ्याज्ञानसमुच्छेदितत्त्वज्ञानस्य लब्धये ।
दर्शनानि प्रणीतानि तत्त्वदर्शिमहर्षिभिः ॥ ॥ ४ ॥

भ्रान्तिज्ञानस्य याथात्म्यं सुविमृष्टं परीक्षकैः ।
तेषामुक्तीः समालोड्य स्वकीयमतिशुद्धये ॥ ॥ ५ ॥

महेशानस्य विद्यानामधिपस्य प्रसादतः ।
समासेन ख्यातितत्त्वं निरूपयितुमारभे ॥ ॥ ६ ॥

इह खलु संसारार्णवे भ्रममाणानां प्राणिनां क्लेशजातस्य परमं निदानं मिथ्याज्ञानमेव । अतस्तदुन्मूलनाय तत्त्वदर्शिनो महर्षयः तत्त्वनिरूपकाणि दर्शनानि प्रणिन्युः । अनुष्ठानाय धर्म इव परिहारायाधर्मोऽपि जिज्ञास्य इति आचार्या उपदिशन्ति । एवं निरसनीयस्य मिथ्याज्ञानस्यापि याथात्म्यमवश्यं ज्ञेयमेव । तच्च बौद्धैः वैदिकैश्च परीक्षकैः नैकधा विमृश्य निर्धारितमस्ति । तत्र पराभिमतं तद्याथात्म्यस्वरूपं समालोच्य सैद्धान्तिकं तद्विवरीतुं ख्यातितत्वसमीक्षेयमारभ्यते ।

प्रथमोल्लासः

सौगताः केचन, शुक्तिशकलादौ इदं रजतमिति विभ्रममात्मख्यातिं मन्यन्ते । तथाहि—चतुर्विधेषु सौगतेषु, वैभाषिकः बाह्यं वस्तुसदिति, प्रत्यक्षमिति च मन्यते । सौत्रान्तिकस्तु बाह्यं वस्तुसदपि न प्रत्यक्षम्, किन्तु, विज्ञानगतेन तत्प्रतिबिम्बेनानुमीयते इति वदति । विज्ञानमेव वस्तुसत् । तदतिरेकेण बाह्यमलीकमसत् अविद्यावासनाकल्पितमिति ब्रूते योगाचारः । एषां त्रयाणां मते बाह्ये शुक्तिशकले विज्ञानधर्मस्य—विज्ञानाकारस्य

रजतस्य समारोपः । सर्वं ज्ञानं साकारम् । विज्ञानविषययोश्च न भेदः । किन्तु सहोपलम्भनियमादभेदः । गोर्भिन्नो महिषः कदाचित् गवा सहोपलभ्यते कदाचित्तु न । विज्ञानं न कदापि विषयाननुविद्धमुपलभ्यते । अतः तयोरभेद एव । तदुक्तं- 'सहोपलम्भनियमादभेदो नीलतद्धियोः' इति । नीलादिज्ञानं नीलाद्याकारं भवति । नैयायिकादिभिः ज्ञाने नीलादिनिरूपिता विषयिता स्वीक्रियते । तत्स्थानापन्नोऽयमाकारः । 'अर्थेनैव विशेषो हि निराकारतया धियाम्' इत्याचार्यकारिकायां निराकारतया इति पदं विषयितास्थानीयेनाकारेण रहिततया इति व्याचक्षते ।

इदं रजतमिति विभ्रमे बाह्ये शुक्तिशकले आन्तरस्य विज्ञानाकारस्य रजतस्य समारोपः । विमतं भ्रमे भासमानं रजतं ज्ञानाभिन्नं इन्द्रियसंनिकर्षमन्तरेण भासमानत्वात् संवेदनवत् । न हि रजतेन चक्षुषः संनिकर्षोऽस्ति । अतो न हेतोः विशेषणासिद्धिः । यादृशं रूपमनुभवसिद्धं तादृशमेवोपगन्तव्यमित्युत्सर्गः । बलवद्बाधकप्रत्ययवशादन्यथात्वं भवति । विभ्रमानन्तरजातेन नेदं रजतमिति बाधकप्रत्ययेन यदि रजतस्य बाधोऽङ्गीक्रियते, तदा रजतस्य धर्मिणः, तद्धर्मस्य इदन्त्वस्य-पुरोवर्तित्वस्य चेति द्वयोर्बाध इति गौरवम् । अतो रजते इदन्तारूपधर्मस्यैव बाधः लाघवात् इति

रजते इदन्त्वस्य—बाह्यत्वस्य बाधादान्तरत्वं सिद्ध्यति। आन्तरस्य विज्ञानाकारस्य रजतस्य बाह्ये शुक्तिशकलादावध्यास इति, विज्ञानाकारख्यातिरिति, विज्ञानस्य तन्मते आत्मरूपत्वात् आत्मख्यातिरिति च व्यपदिश्यते इति।

तत्रेदं समालोचनीयम्। साकारवादं व्यवस्थितं कृत्वा; विज्ञानधर्मस्य रजतस्यारोपोऽभिधीयते। विषयस्य विज्ञानाकारता च न युक्त्या अनुभवेन वा सिद्ध्यति। सहोपलम्भनियमात् न विज्ञानविषययोरभेदः सिद्ध्यति। अन्यथासिद्धेः। प्रदीपादिप्रभया जायमाने चाक्षुषप्रत्यक्षे भासमान घटरूपादिकं स्वभिन्नया दीपादिप्रभयाऽनुविद्धमेव भासते, प्रभायाः रूपादिचाक्षुषं प्रत्युपायत्वात्। तथा विज्ञानोपलम्भोपायत्वाद्विषयस्य तेन सहैव विज्ञानस्योपलम्भो नाभेदात्। तदुक्तं-'उपायभावेन सहोपलम्भः' इति। तस्मान्न पूर्वोक्तयुक्त्या विज्ञानाकारता विषयस्य। नाप्यनुभवेन। इदं रजतमित्यनुभवः इदंरजतयोः सामानाधिकरण्य विषयीकरोति, न तु रजतस्य विज्ञानाकारताम्। तस्य विज्ञानाकारतानुभवत्वे, अहं रजतमिति धीः स्यात्। रजताकारस्य विज्ञानस्य प्रतिपत्तुरात्मनः सकाशाद्भेदाभावात्। यदि, वस्तुतः अहङ्कारास्पदतायोग्यमेव रजतं भ्रान्तेन भ्रमरूपेण इदं रजतमित्या-

कारप्रत्ययेन बाह्यतयाध्यवसीयते। तस्य विज्ञानाकारता तु बाधकप्रत्ययेनैवावसीयते इत्युच्यते। तदापि नेदं रजतमिति बाधक प्रत्ययः न साक्षात् रजतस्य विज्ञानाकारतां विषयीकरोति, किन्तु इदमर्थं पुरोवर्तिनं रजताद्विवेचयतीति सर्वानुभवसिद्धम्। इदन्त्वस्य—पुरोवर्तित्वस्य प्रतिषेधात् अर्थात् आन्तरत्वं-विज्ञानाकारत्वं सिद्ध्यतीति न वक्तुं शक्यम्। पुरोवर्तित्वबाधे तस्यासंनिहितत्वं सिद्ध्यति। तच्च व्यवहिते देशान्तरे स्थित्याप्युपपद्यते इति न विज्ञानात्मत्वं सिद्ध्यति।

किञ्च, विज्ञानस्य रजताकारत्वं यदि स्वाभाविकं तदा सर्वज्ञानानां रजताकारतापत्तिः। रजतादितत्तद्गोचरवासनानां वैचित्र्यात् वासनाधीनज्ञानानां वैचित्र्यमित्यपि न साधु। विज्ञानव्यतिरेकेण वासनानामप्यस्वीकारात्।

अपि च, आन्तरं रजतं बाह्ये शुक्तिशकले आरोप्यते इति न युज्यते। शुक्तिशकलस्याधिष्ठानत्वासंभवात् अधिष्ठानस्य स्वाज्ञानद्वारा भ्रमहेतुत्वात् भ्रमोपादानाज्ञानविषयस्यैव चाधिष्ठानत्वात्, बाह्यस्य चालीकस्याज्ञानविषयत्वायोगात्।

आन्तरे रजते इदन्त्वस्य बहिष्ट्वस्यारोपः, बाधकप्रत्ययेन इदन्त्व-निषेधः आन्तररजते बोध्यते इति युज्यते । रजतस्य धर्मिणः बाधानुभवात् । अत एव नेदं रजतं किंतु शुक्तिरिति बाह्या-धिष्ठानावधिको बाधः संगच्छते । अन्यथा रजतमिदं न, किन्त्वान्तरमिति स्यात् । तस्मात् आन्तरविज्ञानाकारस्य रज-तादेरारोपः विभ्रमः आत्मख्यातिरिति पक्षो न साधुरिति सिद्धम् ।

इति आत्मख्यातिसमालोचनं नाम प्रथमोल्लासः

द्वितीयोल्लासः

बाह्या माध्यमिकाः शुक्तौ रजतभ्रममसत्ख्यातिं मन्यन्ते । इदं रजतमिति भ्रमे भासमानं रजतं न सत्, नेदं रजतमिति बाधदर्शनात् । अपितु अत्यन्तासत् । अत एव बाधानन्तरं असदेत्र रजतमभादित्यनुभवो जायते । निरुक्तरजतस्य अर्थ-क्रियाकारित्वरूपं सत्त्वमिव स्वरूपसत्त्वमपि नास्ति ।

अतः निस्तत्त्वमत्यन्तासदित्युच्यते । एतादृशं विभ्रमज्ञानं च स्वपूर्वपूर्वजातस्वसमानाकारप्रत्ययजनितवासनाबलात् जायते। नात्र शुक्तिरधिष्ठानम् । तज्ज्ञानमपि पूर्वप्रत्ययसामर्थ्याधीनमेव । सर्वत्रारोपे अधिष्ठानापेक्षा न दृश्यते । करसंमृदितलोचनरश्मिप्रसरे सति केशपिण्डज्ञानं जायते । इदमेव केशोण्डुकभ्रमः इति व्यवह्रियते । न ह्यत्र किमप्यधिष्ठानं भासते । न च विषयस्य समस्तसामर्थ्यरहितस्य कथं प्रकाश इति शङ्कनीयम्। विज्ञाने असत्प्रकाशनशक्तिर्वर्तते । सा चासाधारणी । सैवाविद्येति सौगतैर्व्यवह्रियते। तया चासतः प्रकाशः । तथाचाहुः– 'अविद्यया असत्प्रकाशनमिति बौद्धाः' इति।

विज्ञानस्यापि पूर्वज्ञानाधीनत्वमेव सत्त्वम् । न कापि स्वरूपसत्त्वम् । असतश्च भानमवश्यमङ्गीकार्यम् तार्किकादिभिरपि । अन्यथाख्यातिवादिनां तेषां मते हट्टस्थं रजतं ज्ञानलक्षणया प्रत्यासत्त्या भसते। तथापि तस्य रजतस्य पुरोवर्तिनि इदमर्थे वैशिष्ट्यमसदेव भासते इति वक्तव्यम् । आरोप्यरजतेन पुरोवर्तिनि इदमर्थे वैशिष्ट्यस्यावस्तुत्वात् । न च विज्ञानगतायाः शक्तेरेवासंभवः, शक्यस्याभावादिति वाच्यम्। असत एव शक्यत्वात् ।

न च शक्यत्वं न विज्ञानगतायाः शक्तेः कार्यत्वं, असति तद्-योगात्। नापि ज्ञाप्यत्वं। असत्प्रकाशनशक्त्याश्रयीभूतज्ञानात् अन्यत् असतो ज्ञानं जायते इत्युक्तौ, तज्ज्ञानगतशक्त्या असतो ज्ञापनाय पुनर्ज्ञानान्तरं जायते इति स्वीकारे, एवमेवोत्तरत्रापीति अनवस्था दोषः। असत्प्रकाशनशक्त्याश्रयात् प्राथमिकज्ञाना-दन्यदसद्विषयकज्ञानमनुभवपराहतं च। ततश्च विज्ञानगतशक्ति-रूपाऽविद्यया असतो भानमसंगतमिति वाच्यम्। विज्ञानस्यैवा-सत्प्रकाशरूपत्वेनोक्तदोषानवकाशात्। न च विज्ञानस्य असता संबन्धो दुर्निरूपः। न ह्यसंबद्धं वस्तु शतमपि विज्ञानानि प्रकाशयितुमर्हन्तीति वाच्यम्। असदन्तरेण विज्ञानं न प्रथते इति अविनाभावस्यैव संबन्धस्य सत्त्वात्।

नचाविनाभावनियामकयोः तादात्म्य—तदुत्पत्त्योरभावा-न्नासद्विज्ञानयोरविनाभावः—

'कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्।
अविनाभावनियमो दर्शनान्न न दर्शनात्॥' इति वदतां
सौगतानां मते, कार्यकारणभावोऽविनाभावनियामकः, यथा वह्नि-

धूमयोः । अयं वृक्षः शिंशपात्वादित्यादौ शिंशपात्वस्य वृक्षस्वभावत्वात् वृक्षत्वशिंशपात्वयोरविनाभावनियामकः स्वभावः । एतदुभयातिरिक्तं नियामकं न तैः स्वीक्रियते । असतः विज्ञानकार्यत्वं तत्कारणत्वं वा न संभवति । विज्ञानस्य सतः असता तादात्म्यसंबन्धोऽपि न युज्यते । अतः असद्विज्ञानयोरविनाभावो न वक्तुमुचित इति वाच्यम् । असदधीननिरूपणत्व विज्ञानस्यासता संबन्धोऽस्तु, विज्ञानस्यासन्निरूप्यत्वात् ।

तथाच निरधिष्ठानः निस्तत्त्वरजतादिविषयकः रजतादिविभ्रमः इति निरधिष्ठानासत्ख्यातिं प्रतिपादयन्ति ।

तत्रेदं चिन्तनीयम् । स्वोपकारिणि कश्चित् प्रत्युपकारः क्रियते इति लोकमर्यादा । प्रकाशस्य निरूपणमसदधीनमपि भवति । परन्तु उपकारिणि असति प्रकाशः न कमपि प्रत्युपकारं करोति । असतः आधारत्वायोगात् । अतश्च स्वस्योपकारिणि कंचिदप्यनुपकुर्वाणं प्रत्ययं अतिसुखीत्युपहसन्ति श्रीवाचस्पतिमिश्राः । 'अहो बतायमतिनिर्वृतः प्रत्ययतपस्वी यस्यासत्यपि

निरूपणमायतते । न च प्रत्ययस्तत्राधत्ते किंचित्, असत आधारत्वायोगात् ।' इति भामती । असत्यप्यायतते—असदधीनमपि भवति । असतीति विषयसप्तमी ।

एवं च प्रत्ययेनासति कस्याप्यनाधानात् असदधीननिरूपणत्वं न प्रत्ययस्यासता संबन्धः । तस्मात् विज्ञानमेवासतः प्रकाशः इत्यसंगतम् ।

ननु शशशृङ्गादिशब्दात् विकल्पाख्या वृत्तिर्जायते, 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' इत्युक्तेः । 'अत्यन्तबाधितेऽप्यर्थे ज्ञानं शब्दः करोति हि' इति न्यायेन निस्तत्त्वस्यापि शब्दजन्यपरोक्षधीविषयत्वं सिद्धान्तिनामपीष्टम् । एवं प्रपञ्चगते असद्वैलक्षण्ये असन्निरूपितत्वमिव असत्प्रतीतावपि असन्निरूप्यत्वमुपपद्यते इति चेत् ।

सत्यं, तावतापि अपरोक्षप्रतीतिविषयत्वमसतो न घटते । प्रत्यक्षसामान्ये इन्द्रियसंनिकर्षः सामग्री । तदभावात् यथा व्यवहितस्य न प्रत्यक्षम्, तथैवासतोऽपि इन्द्रियसंनिकर्षरूपप्रत्यक्षसामान्यसामग्रीविरहान्न प्रत्यक्षम् । तथा च इदं रजतमिति प्रत्यक्ष-

ज्ञाने निस्तत्त्वम् रजतं न विषयो भवितुमर्हति । अनिषेध्यत्वेन साक्षात् प्रत्यक्षविषयता नासतः संभवतीति निष्कर्षः । अत एव, असदेव रजतमभात् इत्यनुभवोऽपि सदन्यत्वमेव रजतेऽवगाहते नात्यन्तासत्त्वम् । ततश्च न तादृशानुभवबलात् भ्रमस्यासद्विषयत्वं सिद्ध्यति । अन्यथाख्यातिवादिनां नैयायिकानामपि मते नासतः पुरोवर्तिगतरजतवैशिष्ट्यस्य संसर्गस्य भ्रमे भानम् । परंतु शुक्तिः रूप्यं तादात्म्यं चेति त्रितयं भ्रमे भासते । त्रयाणामपि सत्यतैव । अथापि व्यधिकरणप्रकारकत्वेन भ्रमत्वमुपपद्यते । विवेचयिष्यते चेदमन्यथाख्यातिसमालोचनावसरे । तस्मान्नात्यन्तासतो रजतस्य इदं रजतमिति भ्रमविषयतेति नासत्ख्यातिर्युक्ता ।

एवं निरधिष्ठानः असद्विषयको विभ्रमः इत्यपि न साधु । पूर्वपूर्वभ्रमसंस्कारजनितं पदार्थज्ञानमात्रं नविभ्रमः । शून्यज्ञानस्य बाह्याभिमतस्य तथात्वापत्तेः । अतः अन्यस्मिन् अन्यात्मतावभास एव विभ्रमः । इदं रजतमिति द्व्याकारतया स्फुरणात् साधिष्ठान एव भ्रमः । इदमादिज्ञानस्यान्वयव्यतिरेकाभ्यां

इदं रजतमित्यादिभ्रमहेतुता । न च केशोण्ड्रकादिभ्रमे अधिष्ठानाभावः शङ्कनीयः । तेजोऽवयवानामेवाधिष्ठानत्वात् । तदुक्तम्– 'न हि निरधिष्ठानोऽध्यासः दृष्टपूर्वः संभवी वा' इति ।

न चाधिष्ठानज्ञानमेव भ्रमहेतुः, नाधिष्ठानम् । अधिष्ठानज्ञानमपि पूर्वपूर्वभ्रमसंस्काराधीनमिति नाधिष्ठानस्य सद्रूपता अपेक्षितेति वाच्यम् । इदं रजतमिति ज्ञानस्य नेदं रजतं, किन्तु शुक्तिः इति प्रत्ययः बाधकः इति सर्वाविवादम् । शुक्तिः रजतबाधावधिः । यदि तादृशं शुक्तित्वविशिष्टं सद्रूपं न स्यात्, तदा तज्ज्ञानस्य बाधकतैव न स्यात् । भ्रमविषयीभूतमारोपितमतत्त्वं, तद्विरुद्धं तदपेक्षयाऽधिकसत्ताकं कंचन विषयीकुर्वतैव प्रत्ययेन बाधनीयम् । अन्यथा भ्रमविषयबाधविषययोरुभयोरप्यध्यस्तत्वे किं केन बाध्येत । न च स्वाग्रगजस्य स्वाग्रेनैव गजाभावेन बाधस्य सिद्धिकारैरुक्तत्वात् समसत्ताकस्यापि बाधकत्वात् न बाधकप्रत्ययस्य बाध्याधिकसत्ताकविषयकत्वमपेक्षितमिति वाच्यम् । तत्रोक्तं बाधकत्वं भ्रमत्वज्ञापकत्वं, नतूच्छेदकत्वम् । स्वसमानाधिकरणस्वान्यूनसत्ताकाभावप्रतियोगित्वं

मिथ्यात्वम् । स्वाप्नगजवति स्वाप्नगजाभावज्ञानमुक्तमिथ्यात्वविषयकं भवति । तेन पूर्वोत्पन्नस्य स्वाप्नगजज्ञानस्य मिथ्याविषयकत्वरूपं भ्रमत्वं ज्ञाप्यते इति भ्रमत्वज्ञापकतारूपं बाधकत्वं स्वाप्नगजाभावज्ञानस्य, न तूच्छेदकतेति न विरोधः । स्पष्टश्चायमर्थः लघुचन्द्रिकायां प्रतिकूलतर्कनिराकरणे । तथा च भ्रमबाधव्यवस्थानुपपत्त्या भ्रमस्य सद्रूपाधिष्ठानविषयकत्वमङ्गीकरणीयम् । तदुक्तमध्यासभाष्ये 'सत्यानृते मिथुनीकृत्य' इति । तस्मात् शून्यवादिसंमतः सद्रूपाधिष्ठानरहितासत्ख्यातिपक्षः न समीचीन इति सिद्धम् ॥

इति निरधिष्ठानासत्ख्यातिसमालोचनं नाम द्वितीयोल्लासः

तृतीयोल्लासः

आनन्दतीर्थीयाः उद्बुद्धरूप्यसंस्कारसचिवं दुष्टेन्द्रियं स्वसंनिकृष्टं शुक्तीदमंशं अत्यन्तासद्रूप्यात्मना गृह्णाति इति अन्यथाख्यातिरेव युक्तेति [1]वदन्ति ।

भ्रमे भासमानस्य रूप्यस्यासत्त्वे असदेव रजतमभादिति बाधक प्रत्यक्षं प्रमाणम् । एवं, [1]विमतमसत् सत्त्वानधिकरणत्वात् नरशृङ्गवत् । [2] अप्रमा असद्विषयिणी सत्त्वानधिकरणविषयकत्वात् इत्याद्यनुमानं च प्रमाणम् । न चासदेव रजतमभादिति प्रत्यक्षं सद्वैलक्षण्यमेवावगाहते इति न तेन भ्रमविषयस्य रजतस्यात्यन्तासत्त्वसिद्धिरिति वाच्यम् । इदं सद्रजतमिति प्रत्यक्षस्यापि असद्वैलक्षण्यमेव विषयः न सत्त्वमिति शुक्तिरूप्यस्य प्रातीतिकं सत्त्वं सिद्धान्ते न सिद्ध्येत् । अतः यथानुभवमसत्त्वमेवाङ्गीकर्तुमुचितं रजतस्येति । न चासतः ख्यातेरङ्गीकारे बाह्यमते इवासत्ख्यात्यापत्तिरिति वाच्यम् । बाह्यमते अधिष्ठानस्य शुक्त्यंशस्यापि सत्त्वानङ्गीकारेण सर्वात्मना असद्विषयिणी ख्यातिः । मम तु मते इदमः सतः असद्रूप्यात्मना भानात्, इदं

---

1 असतः ख्यातिवादिनोऽप्येते असत्ख्यातिशब्दप्रयोगे बाह्यमतसादृश्यं प्रतीयेतेति स्वाभिमतख्यातेरन्यथाख्यातित्वं, क्वचित् अभिनवान्यथाख्यातित्वं च कथयन्तीति बोध्यम् ।

रूप्यमिति ज्ञाने भातस्य सर्वस्याप्यसत्त्वाभावात् न तादृशी असत्ख्यातिः । अन्यथा तार्किकाणामपि बाह्यमतप्रवेशापत्तिर्दुर्वारा । तार्किकमते आपणस्थं सत्यं रजतं पुरोवर्तिनि उपनयवशाद्भासते । तत्र शुक्तिः रूप्यं रूप्यत्वसंसर्गश्च भासन्ते । शुक्तेः रूप्यस्य च सत्त्वेऽपि इदमंशनिष्ठत्वेन भासमानस्य रूप्यतादात्म्यस्य संसर्गस्यासत्त्वात् असत्ख्यात्यापत्त्या बाह्यमतप्रवेशापत्तेर्दुर्वारत्वात् । रूप्यतादात्म्यस्य रूप्यत्वसंसर्गस्य च इदमंशनिष्ठत्वेन भानाभावे विभ्रमस्य इदं रूप्यं च इत्याकारता, इदं रूप्यत्वेन ज्ञातमित्यनुव्यवसायायोगः, पुरोवर्तिनि रजतार्थिनः प्रवृत्त्यनुपपत्तिश्च स्यात् । किंच सन्मात्रविषयकस्य इदं रजतमिति जानस्य भ्रमत्वमेवानुपपन्नं भवेत् । नचासतः विषयत्वाभावेऽपि तदभाववति तत्प्रकारकत्वरूपमप्रमात्वमविरुद्धमिति वाच्यम् । रूप्यत्वप्रकारकत्वस्य रूप्यत्ववैशिष्ट्यविषयकत्वरूपत्वेन असतः इदंरूप्यत्वयोर्वैशिष्ट्यस्य प्रतीतेः दुर्वारत्वात् । न च तदात्मकविशेषणज्ञानजन्यत्वमेव तत्प्रकारकत्वं, न तद्वैशिष्ट्यविषयकत्वमिति वाच्यम् । ईश्वरज्ञानस्याजन्यतया निरुक्तसप्रकारकत्वाभावेन निर्विकल्पकतापत्तेः । तथाचासतः संसर्गस्य भानं तार्किकसिद्धमिति तस्य बाह्यमतप्रवेशापत्तिः । एवमद्वैतिनामपि भ्रमे सद्विलक्षणस्य भानात्, शशशृङ्गादिविषयकपरोक्षज्ञानाङ्गीकाराच्च बाह्यमतप्रवेशापत्तिर्दुर्वारा । तस्मात्

यत्किंचित्साम्यं न तन्मतप्रवेशापादकमिति, नास्माकं अत्यन्तासतो रजतस्य भानाङ्गीकारेऽपि बाह्यमतप्रवेशापत्तिर्भवति ।

अपि च अनिर्वचनीयख्यातिवादिनां अद्वैतिनां मतेऽपि रजतभ्रमे असतो भानमावश्यकम् । इदं सद्रजतमिति भ्रमे अधिष्ठानीभूतशुक्तिगतमिदन्त्वं सत्वं च प्रातीतिके रजते भासते । तत्र प्रातिभासिकसंसृष्टरूपेण इदन्त्वं सच्चं च न सत्, ब्रह्मातिरिक्तस्य सच्चाङ्गीकारे अद्वैतहानेः । नाप्यनिर्वचनीयम्, तथात्वे असद्वैलक्षण्याय सच्चेन प्रतीतिर्वाच्या । इदन्त्वस्य सत्त्वस्य च सत्वेन प्रतीतौ तत्र भासमानसच्चस्य सद्रूपत्वे अद्वैतहानादनिर्वचनीयत्वं वक्तव्यम् । ततश्च तस्यासद्वैलक्षण्याय तत्रापि सच्चेन प्रतीतिर्वाच्या, इत्येवमनवस्था आपद्येत । तस्मात् भ्रमे रजतगततया भासमानं इदन्त्वं सत्वं च असदित्येव वक्तव्यम् इति भ्रमस्य असद्विषयकत्वं आपतति । तदुक्तम्—

"अन्यथात्वमसत्तस्मात् भ्रान्तावेव प्रतीयते ।
सच्चस्याऽसत एवं हि स्वीकार्यैव प्रतीतता ।
तस्यानिर्वचनीयत्वे स्यादेव ह्यनवस्थितिः ॥" इति ।

अन्यथात्वं – शुक्तेः रूप्यत्वादिकम् । भ्रान्तौ – असद्विषयकज्ञाने ।

किं च असतः यदि न ख्यानं, तदा प्रपञ्चे असद्वैलक्षण्यं कथं ज्ञायेत प्रतियोगिज्ञानाभावात् । तथा असत्प्रतीतिनिरासः असद्व्यवहारश्च न संभवेत् । असत् नृशृङ्गम् इति वाक्यात् असतः प्रतीतिः अनुभूयमाना बाध्येत। असतः अप्रतीतौ "असद्विलक्षणः प्रपञ्चः" इति वाक्यस्य संभूयार्थप्रतिपादकता च न स्यात् ।

न च समस्तसामर्थ्यहीनस्यासतः सता ज्ञानेन कथं संबन्धः, विषयत्वस्य वक्तुमशक्यत्वादिति वाच्यम् । अतीतादिस्मृतिकाले अतीतादेरसत्त्वेऽपि यथा विषयत्वं तथैव अत्रापि संभवात् । यदि तत्र प्रतीतिरेव विषयता, तावतैव विषयताव्यवहारः इत्युच्यते । तदा तथैव अत्रापीति सुवचत्वात् ।

न चासतः यथाकथञ्चित् परोक्षज्ञानसंभवेऽपि अपरोक्षज्ञानासंभवः, प्रत्यक्षे इन्द्रियसंनिकर्षस्य हेतुत्वात् असति च तदभावात् । तथाचेदं रूप्यमिति प्रत्यक्षभ्रमः असद्रूप्यात्मना

शुक्तिमवगाहते इत्यसंगतमिति वाच्यम् । प्रत्यक्षप्रमायामेव निर्दुष्टेन्द्रियसंनिकर्षो हेतुः, न तु भ्रमे । भ्रमस्तु विनापि संनिकर्षं दुष्टेन्द्रियाद्भविष्यतीत्यदोषात् ।

न चात्यन्तासतो रजतस्येव शशशृङ्गस्यापि विनैवेन्द्रियसंनिकर्षं कुतो न प्रत्यक्षं जायते इति वाच्यम् । रजतानुभवजन्यसंस्कारस्य सहकारिणः सत्वात् रजतस्य प्रत्यक्षं, सहकारिणः संस्कारस्य विरहान्न शशशृङ्गादीनां प्रत्यक्षमिति सुलभसमाधानत्वादिति वदन्ति ।

तत्रेदं चिन्तनीयम् । प्रत्यक्षसामान्ये यथा इन्द्रियं हेतुः, तथा इन्द्रियसंनिकर्षोऽपि । प्रमाणानां सामान्ये पक्षपातात् । भ्रमे यदि प्रत्यक्षत्वं चाक्षुषत्वं वा स्वीक्रियते, तदा इन्द्रियसंनिकर्षजन्यत्वमावश्यकम् । अन्यथा तत्र प्रत्यक्षत्वे चाक्षुषत्वे वा मानाभावः । अव्यवहितोत्तरत्वसंबन्धेन दोषविशिष्टं प्रति दोषस्य कारणत्वेनैव दोषाधीनभ्रमस्योपपत्तेः । तथाच इन्द्रियेण भ्रमजनने इन्द्रियसंनिकर्षोऽपि प्रत्यक्षसामान्यहेतुः सहकारीति, अत्यन्तासति इन्द्रियसंनिकर्षविरहेण तस्य प्रत्यक्षं कथं युज्यते ।

नचानिर्वचनीयरजतस्यापि प्रत्यक्षं न युक्तम्, तादृश-रजतस्य ज्ञातैकसत्ताकस्य प्रतीतिपूर्वमसत्वेनेन्द्रियसंनिकर्षस्य विरहादिति वाच्यम् । अद्वैतिमते अज्ञाननाशकान्तःकरण-वृत्तिजनने इन्द्रियसंनिकर्षस्योपयोगः । अनिर्वचनीयं रजत साक्षात् साक्षिचैतन्येन संबद्धमिति अज्ञाननिवृत्तेरभावात् अज्ञाननिवर्तकान्तःकरणवृत्तेस्तत्र विरहेण नेन्द्रियसंनिकर्षः तत्रापेक्ष्यते । न चासतोऽपि भ्रमविषयरजतस्य साक्षिणैव प्रत्यक्षमिति वाच्यम् । सदसतोः संबन्धविरहेण असतः सता साक्षिणा संबन्धानुपपत्तेः । न चेन्द्रियसंनिकर्षरूपसहकारिविर-हेण इन्द्रियेणासद्विषयकप्रत्यक्षजननानङ्गीकारे, शशशृङ्गमसत् इति वाक्यात् कथं विकल्पबोधः, योग्यताज्ञानादेः शाब्दज्ञान-सामान्यसामग्र्या विरहादिति वाच्यम् । असंसर्गग्रहरूपे अयोग्यताज्ञाने सति विशिष्टज्ञानं न जायते । अतः अयोग्यताज्ञानाभाव एव शाब्दज्ञानसामान्यसामग्री, न योग्यताज्ञानम् । शशशृङ्गे असत्वं नास्तीति अयोग्यता-ज्ञानवान् शशशृङ्गमसत् इति वाक्यात् नासत्वमवगच्छति । अतः अयोग्यताज्ञानविरहरूपसामान्यसामग्रीसत्वे, शशशृङ्ग-मसत् इति वाक्यात् परोक्षविकल्पो भवत्येव ।

एवं, असदेव रजतमभादिति प्रत्यक्षं नात्यन्तासतः भ्रम-विषयत्वे प्रमाणम्, इन्द्रियसंनिकर्षरूपसहकारिविरहेणासतो विषयत्वासंभवेन सद्विलक्षणत्वस्यैव तेन विषयीकरणात् ।

यत्तु रजतं सदिति प्रत्यक्षमपि असद्वैलक्षण्यविषयकं स्यादिति प्रातिभासिकस्य रजतस्य प्रातीतिकमपि सत्वं न सिद्धेयदित्युक्तम् ।

तन्न । भ्रमविषयसत्वापहारिण एव बाधकत्वव्यवहारात् सद्रजतमिति भ्रमे सत्वस्याविषयत्वे भ्रमविषयसत्वापहारकत्वाभावेन असदेव रजतमभादित्यस्य बाधकत्वमेव न स्यात् । असदेव रजतमित्यस्य सद्वैलक्षण्यविषयकत्वे तु सद्रजतमिति भ्रमविषयसत्वापहारकत्वसंभवेन बाधकत्वमक्षुण्णम् । किञ्च सद्रजतमिति भ्रमे असद्वैलक्षण्यस्य विषयत्वे तत्पूर्वं प्रतियोगिज्ञानविधया असत्वज्ञानमावश्यकम् । ततश्चागृहीतासत्वकस्य पुरुषस्य जायमानः सद्रजतमिति प्रत्ययः असद्वैलक्षण्यविषयको न संभवति ।

अपि च, भवदीयसरण्यापि असदेव रजतमभादिति

अत्यन्तासद्विषयकं प्रत्यक्षं न भवति। न हि सदुपरागमन्तरेणासतः प्रत्यक्षं भवतां संमतम्। शशशृङ्गमसदिति प्रत्यक्षानङ्गीकारात्। असद्रूप्यात्मना सतः इदमंशस्य प्रत्यक्षमङ्गीक्रियते। असदेव रजतमभादिति प्रत्यये न सदुपरागेणासतो भानमस्ति। भ्रमविषये रजते असत्वावगाहित्वेन असदात्मना सतः कस्य चिदभानात्। तस्मात् असदेव रजतमभादिति प्रत्यक्षं भ्रमविषयस्य असत्वे प्रमाणमित्युक्तिरसंगता।

किञ्च, रूप्यादेरसतः प्रत्यक्षत्वे शशशृङ्गस्यापि प्रत्यक्षं स्यादविशेषात्। यदि रूप्यत्वं विशेषः प्रत्यक्षतानियामक इत्युच्यते। तदा रूप्यत्वस्य सतः नासद्रूप्यसंबन्धो घटते। असद्रूपस्तु रूप्यत्वादिर्विशेषः शशशृङ्गादावलीकेऽपि वर्तते इति तस्यापि प्रत्यक्षं स्यात्। न च दुष्टेन्द्रियस्य रजतसंस्कारसाचिव्यात् असद्रजतप्रत्यक्षम्, शशशृङ्गादिसंस्काररूपसहकारिविरहात् नेन्द्रियेण शशशृङ्गादेः प्रत्यक्षम्। अनिर्वचनीयवादिभिरपि संस्कारस्य सहकारिता स्वीकरणीया। अन्यथा रूप्यभ्रमस्थले सर्पादिकमनिर्वचनीयान्तरं कुतो नोत्पद्यते

इति वक्तुमशक्यतापत्तेरिति वाच्यम् । संस्कारः रूप्यादि-प्रतीतौ न साक्षादुपयुज्यते । तथा सति संस्कारजन्यत्वेन रूप्यज्ञानस्य स्मृतित्वापत्तेः । न च प्रत्यभिज्ञाप्रत्यक्षमपि संस्कारजन्यं दृष्टमिति वाच्यम् । नव्यतार्किकमते सोऽय-मिति प्रत्यभिज्ञायां स्मृतिरेव हेतुः, न संस्कारः । वेदान्ति-मते तु तत्तांशे स्मृतिरूपैव प्रत्यभिज्ञा । तस्मात् संस्कारः न साक्षात् रूप्यादिप्रतीतिहेतुः । अपि तु रूप्यात्मकार्थो-त्पत्तिद्वारैव । तथाच संस्कारस्य नियामकत्वमपि रजतस्या-निर्वचनीयतापक्षे एव, नत्वसतः प्रत्यक्षविषयत्वपक्षे ।

अपि च, यस्य पुरुषस्य पूर्वं रजतभ्रमो जातः, तस्य पुरुषस्य असद्रजतसंस्कारस्य सत्वात् तज्जन्ये तत्पुरुषीये भ्रमान्तरे असतो रजतस्यैव भानं, न शशशृङ्गस्य । समा-नप्रकारकत्वेन भ्रमसंस्कारयोः कार्यकारणभावात् । यस्य तु पुरुषस्य प्रथमत एव असद्रजतभ्रमः तदीयतद्भ्रमे सत्यरजत-संस्कार एव हेतुर्वाच्यः, असद्रजतसंस्कारस्याभावात् । तादृ-शसत्यरजतसंस्कारकार्यतावच्छेदकं यदि असत्प्रकारकत्वरूपं

भ्रमत्वं, तदा असत्वाविशेषात् शशशृङ्गादिकमपि उक्तभ्रमे भायादेव ।

यत्तु अनिर्वचनीयवादिनां मतेऽपि शुक्तिरजतप्रत्यक्षे असतो भानमावश्यकम् । रजते भासमानस्य इदन्त्वस्य सत्वस्य च सद्रूपत्वे अद्वैतहानापत्तेः, अनिर्वचनीयत्वं वक्तव्यम् । तथा सति तस्यासद्वैलक्षण्यार्थं सत्वेन प्रतीतिर्वाच्या । तत्र भासमानस्यापि सत्वस्यानिर्वचनीयत्वे, तत्रापि सत्वप्रतीत्या भाव्यम् । एवं तत्र तत्रापीति अनवस्था भवेत् । अतः रजते भासमानमिदन्त्वं सत्वं चासदेवेति स्वीकार्यमिति भ्रमस्यासद्विषयकत्वमावश्यकमिति ।

तन्न । प्रत्यक्षसामान्ये इन्द्रियसंनिकर्षस्य कारणत्वात् अत्यन्तासति तदभावेन रजते भासमानमिदन्त्वं सत्वं च नासद्रूपं भवितुमर्हति, किं तु अनिर्वचनीयमेव । तयोरसद्वैलक्षण्याय सत्वेन प्रतीतिरावश्यकी । परन्तु तत्प्रतीतौ भासमानस्य सत्वस्यानिर्वचनीयस्य न सत्वान्तरेण प्रतीतिरपेक्षिता । सत्वं सदिति प्रतीतौ विशेष्यभूतसत्वातिरिक्तं सत्वं न प्रकारः । घटाभावे घटो नास्ति इति प्रतीतौ प्रकारः घटाभावः न

विशेष्यादतिरिक्तः । स्वात्मकघटाभावेनैव तादृशप्रतीतिरुपपद्यते । अत एव, आत्माश्रयेऽपि लाघवात् घटाभावस्य स्ववृत्तित्वमभिहितं शिरोमणिभट्टाचार्यैः । एवमेव सत्तादात्म्यं सदिति प्रतीत्या सत्तादात्म्ये न सत्तादात्म्यान्तरं स्वीक्रियते । पराक्रान्तं चात्र पूर्वाचार्यैः । एवं चानवस्थाया अप्रसरात् रूप्ये भासमानमिदन्त्वसत्वादिकमनिर्वचनीयमेव नात्यन्तासदिति बोध्यम् । अन्यथा असतः भानपक्षेऽपि, असति भासमानस्य सत्वस्य सद्रूपत्वायोगादसत्वमेवाङ्गीकार्यम् । तस्या सत्वेन प्रतीतौ प्रवृत्तिर्न घटते इति असति भासमानसत्वस्यापि सत्वेन प्रतीतेर्वक्तव्यतया तथैव तत्र तत्रापीति अनवस्था दुर्वारैव ।

अत्रेदं तत्त्वम् । धीत्वाक्रान्तं ज्ञानम् । तदन्यः शब्दज्ञानजन्यः सोपाख्यधर्मानुल्लेखी विकल्पः वृत्त्यन्तरम् । शशशृङ्गमसत् इति वाक्यात् तादृशविकल्पो जायते । असद्विलक्षणः प्रपञ्चः इत्यत्र असदंशे विकल्पः, प्रपञ्चांशे धीरूपा वृत्तिः । तदुभयावच्छिन्नचितमादाय पदानां संभूयकारिता । अत एव भ्रमस्थलीयात् इदं रजतमिति वाक्यात् ज्ञानद्वयं स्वीक्रियते अख्यातिवादिभिः इति ।

एतावता असद्रूप्यात्मना शुक्तीदमंशस्य प्रत्यक्षं न संभवति। अनिर्वचनीयतामते भ्रमे न कथमपि असतो भानम्। असत्तु केवलं शब्दजन्यविकल्पाख्यवृत्तिविषयः इति चिन्तितम्।

भ्रमस्य असद्विषयकत्वे अनुमानमपि पूर्वोक्तं प्रमाणं न भवति। "विमतं असत् सत्वानधिकरणत्वात् नरश्रृङ्गवत्" इत्यत्र संनिकर्षाभावेन असतः प्रत्यक्षाभावात् बाधः, शब्दैकसमधिगम्यत्वं उपाधिश्च। दृष्टान्ते साध्यव्यापकत्वात्, पक्षे भ्रमविषये साधनाव्यापकत्वाच्च। विमता अप्रमा असद्विषयिणी सत्वानधिकरणविषयकत्वात्, शशश्रृङ्गमसत् इति वाक्यजन्यपरोक्षज्ञानवत् इत्यनुमानेऽपि बाधः, परोक्षत्वं उपाधिश्च। तस्मात् न अनुमानमपि भ्रमस्यासद्विषयकत्वे प्रमाणम्।

अपि च असद्रूप्यात्मना शुक्तेर्भाने असत्ख्यात्यङ्गीकारेण बौध्दमतप्रवेशापत्तिः। सौगतमते सर्वात्मना असतो भानम्, अस्मन्मते तु सदुपरागेणासतो भानं इत्युक्तावपि असत्ख्यात्यापत्तिः तदवस्थैव। न च अद्वैतिनोऽपि

असत्ख्यात्यापत्तिः, 'असत् नृश्रृङ्गं' इति वाक्यात् असतोऽपि परोक्षप्रतीत्यङ्गीकारात् इति वाच्यम्। तत्र वाक्यात् विकल्पमात्रं जायते न प्रतीतिः इत्यङ्गीकारेण असत्ख्यात्यापत्तेरयुक्तत्वात्। भ्रमे असतः संसर्गस्य भानमङ्गीकुर्वतां तार्किकाणामपि असत्ख्यात्यापत्तिरेव। वस्तुतः तेषां असतः संसर्गत्वे न निर्भरः। शुक्तिः रजतं तादात्म्यं चेति त्रयः भ्रमविषयाः सत्या एव। भ्रमत्वं न असद्विषयकत्वम्, किं तु व्यधिकरणप्रकारकत्वम्। प्रकारत्वं न भासमानवैशिष्ट्यप्रतियोगित्वम्, किं तु ज्ञानविषययोः स्वरूपसंबन्धः। स च व्यधिकरणप्रकारकत्वनिर्वाहकः इत्यादिकं प्रपञ्चितमन्यत्र। तस्मात् इदं रजतमिति भ्रमे असद्रूप्यात्मना शुक्त्यंशः भासते इति मतं न समीचीनमिति सिद्धम्॥

इति साधिष्ठानासत्ख्याति समालोचनं नाम तृतीयोल्लासः॥

चतुर्थोल्लासः

प्रभाकरगुरुमतावलम्बिनो मीमांसकाः, विभ्रमज्ञानमनङ्गीकृत्य अख्यातिवादमातिष्ठन्ते । शुक्तिकायां रजतज्ञानं विभ्रमः इति न वक्तुं शक्यते । ज्ञानेन हि अर्थानां सिद्धिर्भवति । ज्ञानमपि यद्यर्थव्यभिचारि स्यात्, तदा सर्वत्र ज्ञाने ज्ञानत्वसामान्यात् व्यभिचारित्वसंशयेन कुत्रापि निष्कम्पप्रवृत्तिः न स्यात् । तद्धेतोः प्रामाण्यनिश्चयस्याभावात् । यदाहुः—

"अहो बत महानेषः प्रमादो धीमतामपि ।
ज्ञानस्य व्यभिचारित्वे विश्वासः किंनिबन्धनः ॥" इति ।

शुक्तिविशेष्यकं रजतत्वप्रकारकं हि भ्रमज्ञानमिष्यते । न च तत्संभवति । रजताकारज्ञाने शुक्तिकाया भासमानत्वाभावेन आलम्बनत्वाभावात् । भासमानताया एवालम्बनपदार्थत्वात् । पुरोवर्तिनि शुक्तिकाशकले संनिकर्षात् चक्षुषा जायमाने प्रत्यक्षे रजतं वा कथं भासेत । प्रत्यक्षहेतोः रजतेन्द्रियसंयोगस्य व्यवहिते आपणस्थरजते अभावात् । अपिच, इन्द्रियाणां समीचीनज्ञानजनने एव सामर्थ्यं दृष्टमिति

तैः असमीचीनं ज्ञानं जनयितुं न शक्यते । न चाजानतः इन्द्रियाणां समीचीनज्ञानजननसामर्थ्येऽपि दोषसाचिव्ये सति भ्रमजनकत्वं संभवतीति वाच्यम् । दोषाणां हि कार्यप्रतिबन्धे एव सामर्थ्यम्, नत्वपूर्वकार्योत्पादने । अन्यथा दोषयुक्तात् कुटजबीजात् वटाङ्कुरोत्पत्त्यापत्तेः । अपि च, शुक्तिविशेष्यकरजतत्ववैशिष्ट्यावगाहिनो विभ्रमस्याङ्गीकारे, विभ्रमस्य तद्विषयरजतस्य च नेदं रजतमिति ज्ञानबाध्यता कल्पनीया । भ्रमानङ्गीकारे रजतव्यवहारमात्रस्य बाध्यता । सा च सर्वसंप्रतिपन्नेति लाघवम् ।

तदयमत्र निष्कर्षः । पुरोवर्तिशुक्तिशकलेन्द्रियसंनिकर्षेण इदमिति ग्रहणं जायते । ततः तद्वतचाकचक्यो-द्बोधितरजतसंस्कारात् आपणस्थरजतस्य स्मरणं रजतमित्याकारकं जायते । पुरोवर्तिगतं शुक्तित्वमिव, सन्नपि ज्ञानद्वयस्य परस्परभेदः, ज्ञानविषययोः शुक्तिरजतयोश्च भेदः दोषबलान्न गृह्यते । स्मृतिः गृहीतग्रहणस्वभावा अनुभवविषयत्वादिरूपतत्तांविषयिणी यद्यपि भवति । तथापि अत्र दोषवशात् तत्तांशस्य प्रमोषात् तत्तामविषयीकुर्वाणा रजतमिति स्मृतिर्जायते।

रजतार्थी पुरुषः पुरोवर्तिनि स्वेष्टरजतभेदस्याग्रहात् इदं रजतमिति व्यवहरति । तमादातुं प्रवर्तते च । इष्टभेदाग्रह एव भ्रमपदव्यपदेश्यः । स्वरूपतः विषयतश्चागृहीतभेदं ग्रहणस्मरणात्मकं ज्ञानद्वयमेव वा भ्रमपदार्थः । एतदधीना प्रवृत्तिः विसंवादिनी । तत्र इष्टभेदाग्रहः हेतुः । सत्यरजतस्थले तु इन्द्रियेण पुरोवर्तिनि रजतत्ववैशिष्ट्यविषयकं इदं रजतमिति ज्ञानं जायते सामग्रीसत्त्वात् । तत्रेष्टाभेदज्ञानात् संवादिनी प्रवृत्तिर्जायते । नेदं रजतमिति बाधज्ञाने सति इष्टभेदग्रहेण इष्टभेदाग्रहाभावात् न प्रवर्तते इति प्रवृत्तेर्बाधः । इति सर्वं समञ्जसम् । तथाच विमताः सर्वेऽपि प्रत्ययाः यथार्थाः प्रत्ययत्वात् संप्रतिपन्नप्रत्ययवदिति सिद्धमिति वदन्ति ।

अत्रेदं चिन्तनीयम् । चेतनप्रवृत्तिः ज्ञानपूर्विकैव, नाग्रहणमात्राद्भवितुमर्हति । इदं रजतमिति भ्रमस्थले यदि इष्टरजतभेदग्रहाभावात् प्रवृत्तिरित्युच्यते, तदा इष्टरजताभेदज्ञानाभावात् कुतो रजतार्थी नोपेक्षेत । ततश्च उपादानोपेक्षाभ्यामाकृष्यमाणः चेतनः अव्यवस्थितः, इदंकारास्पदे रजतसमारोपेण उपादाने एव व्यवस्थाप्यते इति भेदाग्रहः रजत-

समारोपोत्पादक्रमेणैव प्रवृत्तिहेतुः। तथाच नियमेन रजतार्थि-प्रवृत्तिहेतुत्वात् रजतज्ञानं पुरोवर्तिविशेष्यकं सिद्ध्यतीति विभ्रमसिद्धिः।

किञ्च, सुषुप्तेऽपि भेदाग्रहसत्वात् प्रवृत्त्यापत्तिः। न च उपस्थितेष्टभेदाग्रहः हेतुः, सुषुप्ते रजतोपस्थितेरभावात् न प्रवृत्तिरिति वाच्यम्। रजते इदं न रजतमिति ज्ञानवतः रजतार्थिनः प्रवृत्त्यापत्तेर्दुर्वारत्वात्। तत्र नेदं रजतमिति ज्ञानस्य रजते रजतभेदावगाहित्वे विभ्रमस्वीकारापत्त्या, इद-मिति, न रजतमिति च ज्ञानद्वयमेव स्वीकरणीयम्। तथाच पुरोवर्तिनि (रजते) इष्टरजतभेदाग्रहस्य हेतोः सत्वात् प्रवृत्त्या-पत्तिर्दुर्वारा। यदि च स्वतन्त्रेष्टभेदाग्रह एव हेतुः। स्वा-तन्त्र्यं च निषेधप्रतियोगित्वेनानुपस्थितत्वम्। तथा चात्र रजते निरुक्तस्वतन्त्रत्वाभावात् न प्रवृत्तिरिति मन्यते। तदा रजतं घटनिष्ठनिषेधप्रतियोगि इति ज्ञानदशायां रजते प्रवृत्तिर्न स्यात्, रजते निषेधप्रतियोगित्वेनानुपस्थितत्वस्याभावात्। पुरो-वर्तिनिष्ठनिषेधप्रतियोगित्वेनानुपस्थितत्वं स्वतन्त्रत्वमित्युक्तौ तु रजते नेदं रजतमिति ज्ञानवतः प्रवृत्त्यापत्तिर्दुर्वारैव। इद-मर्थे पुरोवर्तिनि (रजते) रजतभेदावगाहने भ्रमस्वीकारापत्त्या

Bhagavati Sankaracharya Sanskrit Mahavidyalaya 126

BVBSSMV

रजतस्य पुरोवर्तिनिष्ठभेदप्रतियोगित्वेनानुपस्थितत्वेन स्वतन्त्रत्वात् ।

अपि च, मण्यादेः दाहप्रतिबन्धकत्वं न दाहकारणीभूताभावप्रतियोगित्वं, प्रतिबन्धकाभावस्याहेतुत्वात् । किन्तु दाहानुकूलशक्तिविघटकत्वं दाहप्रतिबन्धकत्वमिति अतिरिक्तशक्तिवादिनो मीमांसकाः । तन्मते इष्टभेदग्रहाभावस्य प्रतिबन्धकाभावस्य प्रवृत्तिकारणताकथनं न संगच्छते । न च अगृहीतेष्टभेदपुरोवर्तिविषयकत्वविशिष्ट — अगृहीतेष्टज्ञानभेद — ज्ञानत्वेन सत्यरजतस्थलीयज्ञानसाधारणेन रूपेण, भ्रमस्थलीय – ग्रहण – स्मरणात्मकज्ञानद्वयस्य प्रवृत्तिहेतुता स्वीक्रियते । तथाचाभावस्य न कारणता, प्रवृत्तेः ज्ञानपूर्वकत्वनियमनिर्वाहः, रजतप्रमा-भ्रमस्थलभेदेन प्रवृत्तिकारणताभेदविरहश्चेति सर्वसामञ्जस्यमिति वाच्यम् । ईदृशातिगुरुभूतधर्मेण कारणत्वकल्पनापेक्षया सत्यरजतस्थले क्लृप्तेन लघुना पुरोवर्तिविशेष्यकेष्टतावच्छेदकरजतत्वप्रकारकज्ञानत्वेन प्रवृत्तिहेतुताया एव युक्तत्वात्, भ्रमस्थलेऽपि प्रवृत्त्यनुरोधेन इदमि रजतत्वप्रकारेकज्ञानस्यावश्यकत्वात्, तादृशविशिष्टज्ञानकल्पनागौरवस्य फलमुखत्वेनादोषत्वात् ।

किञ्च, यत्र रङ्गरजतयोः इमे रजतरङ्गे इति भ्रमः. तत्राख्यातिमते रङ्गे रजते च युगपत् प्रवृत्तिः निवृत्तिश्च स्यात् । रङ्गे रजतभ्रमजनकदोषविशेषेण रङ्गे रजतभेदाग्रहस्य प्रवृत्तिकारणस्य, रङ्गे रङ्गभेदग्रहे विभ्रमस्वीकारापत्त्या रङ्गे रङ्गभेदाग्रहस्य निवृत्तिकारणस्य सत्वात् रङ्गे एकक्षणे प्रवृत्तिनिवृत्ती स्याताम् । एवमत्र रजते रङ्गभ्रमजनकदोषेण रङ्गभेदाग्रहस्य निवृत्तिकारणस्य, रजते रजतभेदग्रहे विभ्रमस्वीकारापत्त्या रजतभेदाग्रहस्य प्रवृत्तिकारणस्य च सत्वात् रजते युगपत् निवृत्तिः प्रवृत्तिश्च स्यात् । यदि च रङ्गे रजतभेदाग्रहप्रयोजकदोषस्य निवृत्तिप्रतिबन्धकताकल्पनात् न रङ्गे निवृत्तिरिति न युगपत् प्रवृत्तिनिवृत्त्यापत्तिरिति मन्यते । तदापि विभ्रमस्वीकारः आवश्यकः । यदि पक्षे व्याप्यवद्भेदाग्रहः अनुमितिहेतुः, तदा ह्रदे वह्निव्याप्यवद्भेदाग्रहदशायां असति बाधज्ञाने ह्रदो वह्निमानिति भ्रमानुमितिर्निराबाधा । यदि च पक्षे व्याप्यवत्ताज्ञानमनुमितिहेतुः, तदा अयोगोलकं वह्निमदिति अनुमितेः यथार्थत्वेन प्रभाकरसंमतत्वात् तत्कारणेन वह्निव्याप्यवदयोगोलकमिति परामर्शेन भवितव्यम् । स च परामर्शः भ्रमरूप एवेति विभ्रमसिद्धिर्दुर्वारा ।

यदि च व्याप्यवद्भेदाग्रह एवानुमितिहेतुः, अतो नायोगोलके वह्न्यनुमितिजननाय भ्रमात्मकपरामर्शः स्वीकरणीयः। ह्रदे वह्निव्याप्यवद्भेदाग्रहे ह्रदो वह्निमानिति विशिष्टानुमितिर्न जायते, परं तु अगृहीतासंसर्गकं ज्ञानद्वयमेवेति मन्यते। तदापि शुक्तिं रजततया अवेदिषमिति मानसप्रत्यक्षं शुक्तिविशेष्यकरजतत्वप्रकारकज्ञानरूपं विभ्रमं साधयत्येव। तादृशमानसस्यापि इदंविशेष्यकज्ञाने रजतत्वप्रकारकत्वासंसर्गाग्रहरूपत्वमेवेति हठेन कल्पनं तु सर्वानुभवविरुद्धम्। तस्मात् यथानुभवमपलापमकृत्वा विभ्रमस्वीकरणमेव युक्तं बोध्यम्।

इन्द्रियाणां समीचीनज्ञानजननसामर्थ्यवत्वेऽपि दोषविशिष्टानां विभ्रमजनकत्वमुपपद्यते भस्मकदोषविशिष्टोदर्याग्नेः बह्वन्नपचनवत्, दावदग्धवेत्रबीजादेः कदलीकाण्डजनकत्ववच्च इति मन्तव्यम्। ज्ञानस्य कस्य चित् अर्थव्यभिचारेऽपि न सर्वत्र अनाश्वासो भविष्यति, संवादिप्रवृत्तिजनकत्वादिना प्रामाण्यज्ञानसंभवात्।

यदुक्तं, कस्य चित् ज्ञानस्य अप्रामाण्योपगमे सर्वस्याऽपि अप्रामाण्यसंशयसंभवेन न क्वापि निष्कम्पप्रवृत्तिः स्यादिति। तदपि न। अख्यातिमतेऽपि क्वचित् दोषात् विद्यमानासंसर्गाग्रहे सर्वत्रापि तत्सन्देहेन निष्कम्पप्रवृत्तिर्न स्यादिति तुल्यम्। परतः प्रामाण्यपक्षे अर्थक्रियासंवादज्ञानेन अव्यभिचारिनिश्चयः, तस्याऽपि अप्रमाण्यसन्देहे ज्ञानान्तरेण प्रामाण्यनिश्चयः। यदि न सन्देहः तदा अगृहीताप्रामाण्यकात् ज्ञानात् निष्कम्पप्रवृत्तिः। स्वतःप्रामाण्यपक्षे प्रथमत एव प्रामाण्यनिश्चयात् अर्थनिश्चय इति प्रवृत्तिः न विहन्यते। तस्मात् अनुभवापलापमकृत्वा यथानुभवं भ्रमज्ञानाङ्गीकरणमेव साधु इति बोध्यम्॥

इति अख्याति समालोचनं नाम चतुर्थोल्लासः॥

पञ्चमोल्लासः

यथार्थख्यातिवादिनो रामानुजीयाः, शुक्तौ इदं रजतमिति ज्ञानं यथार्थज्ञानमिति वदन्ति। तथाहि—शुक्तिः

भूयोभिः शुक्तेरवयवैः तदपेक्षया न्यूनैः रजतावयवैश्चारब्धा । तत्र रजतावयवानां सत्त्वेऽपि शुक्त्यवयवानां भूयस्त्वात् शुक्तिरिति लोके व्यवहारः । दोषवशात् शुक्त्यवयवभूयस्त्वस्याज्ञाने सति इदं रजतमिति जानाति । रजतार्थी तदानेतुं प्रवर्तते । दोषापनये शुक्तिरिति ज्ञानोदये रजतज्ञानं नोत्पद्यते। रजतज्ञानस्य बाधो नाम बाधितप्रवृत्तिजनकतैव । बाधकज्ञानेन रजतज्ञानं तद्विषयो वा न बाध्यते । किन्तु प्रवृत्तिरेव । प्रवृत्तेः बाध्यत्वं प्रतिबध्दोत्पत्तिकत्वं, विफलत्वं वा । इयं शुक्तिरिति ज्ञानं रजतज्ञानस्य प्रतिबन्धकम् । तारतरशब्दग्रहे सति मन्दतरशब्दग्रहो न भवति । अनुभवबलात् अभिभावकज्ञानविधया तारतरशब्दग्रहः तदभावाद्यनवगाह्यपि प्रतिबन्धकः । तथा भूयोभिः शुक्तेरवयवैः संसृष्टात्पत्तररजतांशग्रहणं प्रति अभिभावकज्ञानविधया प्रतिबन्धकम् । पूर्वस्य रजतज्ञानस्य बाध्यत्वं बाध्यप्रवृत्तिकत्वं, शुक्तिज्ञानस्य बाधकत्वं पूर्वज्ञानजन्यप्रवृत्तिनिवारकत्वमिति फलितम् ।

ननु शुक्तौ रजतावयवानां सद्भावे किं प्रमाणमिति चेत् । उच्यते—

त्रिवृत्करण–प्रतिनिधिन्यायाभ्यां शुक्तौ रजतावयवानां सिद्धिः । शुद्धैः महाभूतैः पृथिव्यप्तेजोभिः अण्डारम्भो न

संभवतीति पृथिव्यादिके एकैकस्मिन् भूते जलादिभूतद्वयसंयोजनं सर्गादौ परमेश्वरश्चकार । अण्डोत्पत्त्यभावप्रयोजकाभावप्रतियोगि—भूतानुयोगिक — भूतान्तरप्रतियोगिकविलक्षणसंयोगः त्रिवृत्करणम् । 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य' (छा) इति श्रुत्या अग्नेः साक्षादेव पृथिव्यप्तेजोरूपता दर्शिता । तथाच शुक्तिरूपपृथिव्यां रजतांशरूपतेजस्संयोगसिद्धिः । न च पृथिव्यां तेजःप्रतियोगिकविलक्षणसंयोगस्योक्तश्रुतिसिद्धत्वेऽपि शुक्तिरूपपृथिव्यां रजतांशरूपतेजस्संयोगसिद्धिः न संभवतीति वाच्यम् । शुक्तौ तेजोऽन्तरसंयोगे सति शुक्तौ रजतावयवाभावेन रजतासत्त्वात् देशान्तरस्थितेन रजतेन चक्षुषः संनिकर्षाभावात् चाक्षुषप्रत्यक्षं नोपपद्यते । अतः रजते चक्षुषः ज्ञानलक्षणप्रत्यासत्तिः कल्पनीया । एवं सुरभिः चन्दनखण्डः इति चाक्षुषप्रत्यक्षे उपनयमर्यादया भासमाने सौरभे लौकिकविषयताया विरहेण सौरभं पश्यामि इत्यनुव्यवसायो न भवति । एवं पुरोवर्तिशुक्तौ रजतावयवाभावे रजते लौकिकसंनिकर्षविरहात्, ज्ञानलक्षणास्वीकारेऽपि देशान्तरीयरजते लौकिकसंनिकर्षविरहाच्च रजतं पश्यामीत्यनुभवो न स्यादिति तदुपपादनाय दोषविशेषस्यापि लौकिकविषयताप्रयोजकत्वं कल्पनीयमिति च

गौरवम् । शुक्तौ रजतावयवरूपतेजोंऽशसद्भावे चक्षुषो लौकिक-संनिकर्षसत्त्वेन ज्ञानलक्षणायाः प्रत्यासत्तित्वस्य, दोषविशेषे लौकिकविषयताप्रयोजकत्वस्य चाकल्पनेन लाघवम्, इति लाघव-ज्ञानसहकृतेन त्रिवृत्करणवाक्येन शुक्तौ रजतांशरूपतेजस्संयोगः सिद्ध्यति । न च शुक्तौ प्रतीयमानानामवयवानां रजतावयवत्वं नास्ति, रजतादिभ्यः आनीय निवेशितत्वाभावादिति वाच्यम् । रजतावयवतावच्छेदकधर्मावच्छिन्नत्वमेव रजतावयवत्वम् । तच्च शुक्त्यन्तर्गतावयवानामप्यव्याहतम् । न ह्यापणस्थरजतावयवा अपि कुतश्चिद्रजतान्तरादेरानीय निवेशिताः । तथाच यादृशधर्मावच्छिन्नतेजोंऽशात् रजतारम्भः, तादृशधर्मावच्छिन्नाः केचित् सूक्ष्मांशाः शुक्तौ सन्ति । यादृशधर्मावच्छिन्नतेजोंशात् रजतारम्भः, तादृशधर्मावच्छिन्नानामप्यंशानां महाभूतात्मकतेजसि सत्त्वेन, शुक्त्यारम्भकतावच्छेदकधर्मावच्छिन्नानां पृथिवीभागानामपि महापृथिव्यां सत्त्वेन महाभूतत्रिवृत्करणदशायामेव उभयोरंशयोः मेलनसंभवात् शुक्त्यादौ रजतसद्भावः उपपद्यते । न च रजतावयवस्य शुक्तौ सिद्धावपि रजतस्यासिद्ध्या संनिकर्षाभावात् कथं रजतस्य प्रत्यक्षमुपपद्यते इति वाच्यम् । अस्मन्मते (विशिष्टाद्वैतिमते)

अवयवसङ्घातस्यैवावयवित्वात् रजतावयवस्यैव रजतत्वाश्रयत्वात्, रजतत्वस्यावयवावयविसाधारणत्वाच्च । न च शुक्तिगतैः रजतावयवैः तत्सङ्घातरूपरजतेन वा शुक्त्यन्तर्गतेन कटकादिकं जायतामिति वाच्यम् । क्षीरान्तर्गतजलस्य जलपानप्रयोज्यपिपासाविशेषशमनादिकार्यकारित्वाभावस्येव शुक्त्यवयवेषु भूयःसु अन्तर्गतरजतावयवस्य तत्सङ्घातस्य च कटकाद्यर्थक्रियाकारित्वाभावसंभवात् । तस्मात् त्रिवृत्करणन्यायेन शुक्तौ सदेव रजतं भासते इति शुक्तिशकले इदं रजतमिति ज्ञानं यथार्थज्ञानमेव । तदुक्तं जिज्ञासाधिकरणश्रीभाष्ये –

यथार्थं सर्वविज्ञानमिति वेदविदां मतम्।
श्रुतिस्मृतिभ्यः सर्वस्य सर्वात्मत्वप्रतीतितः ॥ ॥ १ ॥
बहु स्यामिति संकल्पपूर्वसृष्ट्याद्युपक्रमे ।
तासां त्रिवृतमेकैकामिति श्रुत्यैव चोदितम् ॥ ॥ २ ॥
त्रिवृत्करणमेवं हि प्रत्यक्षेणोपलभ्यते ।
यदग्ने रोहितं रूपं तेजसस्तदपामपि ॥ ॥ ३ ॥
शुक्लं, कृष्णं पृथिव्याश्चेत्यग्नावेव त्रिरूपता ।
श्रुत्यैव दर्शिता, तस्मात्सर्वे सर्वत्र संगताः ॥ ॥ ४ ॥
सूत्रकारोऽपि भूतानां त्रिरूपत्वं तथाऽवदत् ।
त्र्यात्मकत्वात्तु भूयस्त्वादिति तेनाभिधाभिदा ॥ ५ ॥ इति

तेन—भूयस्त्वेन। अभिधाभिदा—अभिधानस्य व्यवस्था इत्यर्थः।

ननु त्रिवृत्करणन्यायेन शुक्तौ रजतावयवव्यवस्थापनेन तत्र रजतज्ञानस्य यथार्थत्वोपपादनसंभवेऽपि स्थाणौ पुरुषबुद्धेः यथार्थज्ञानत्वं नोपपादयितुं शक्यते। यतः स्थाणुः पुरुषश्च पार्थिव एव। तयोश्च न त्रिवृत्करणं, भूतान्तरे भूतान्तरसंयोगस्य त्रिवृत्करणरूपत्वात्। अतो न तन्न्यायेन स्थाणौ पुरुषावयवाः सिद्ध्यन्ति। न च यादृशधर्मावच्छिन्नात् पार्थिवांशात् पुरुषारम्भः, तादृशधर्मावच्छिन्नत्वं पुरुषान्तर्गतावयवेष्विव स्थाण्वन्तर्गतावयवेष्वपि संभवतीति वाच्यम्। पुरुषान्तर्गतावयवेषु पुरुषारम्भकतावच्छेदकधर्मावच्छिन्नत्वस्य प्रत्यक्षेण सिद्धिवत् स्थाण्ववयवेषु तादृशधर्मावच्छिन्नत्वस्य प्रत्यक्षादिप्रमाणेनासिद्धेः। तथा च स्थाणौ पुरुषबुध्देः कथं यथार्थज्ञानत्वमिति चेत्। न—

प्रतिनिधिन्यायेन स्थाणावपि पुरुषावयवसिद्ध्या यथार्थत्वोपपादनसंभवात्। तथाहि — सोमयागे अभिषवणाय सोमलताया अलाभे तत्सदृशपूतीकलताया अभिषवणं कर्तव्यं,

सोमलतासादृश्येन तदवयवानां पूतीकादौ सत्त्वादिति पूतीकं सोमलताप्रतिनिधित्वेनोक्तम् । एवं यागे पुरोडाशादिकरणाय विहितव्रीहीणामलाभे, तत्प्रतिनिधितया नीवारो ग्राह्यः, नीवारेषु व्रीहिसादृश्येन व्रीह्यवयवसद्भावादिति प्रतिनिधिपेटिकायां मीमांसकैरभिहितम् । यत्र यत्सादृश्यबुद्धिर्भवति, तत्र तदवयववत्त्वमिति प्रतिनिधिन्यायफलितार्थः । शुक्तौ रजतसादृश्यस्योपलम्भात् रजतावयववत्त्वम् । तथा स्थाणौ पुरुषसादृश्यस्योपलम्भात् पुरुषावयववत्त्वं सिद्ध्यति ।

ननु यत्र यत्सादृश्यं तत्र तदवयववत्त्वमिति न व्याप्तिः 'अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ।' इति सूत्रोक्तव्योमसादृश्यवति ब्रह्मणि व्योमावयववत्त्वाभावात्, 'शुनि चैव श्वपाके च पण्डिताः समदर्शिनः' (भ-गी.) इत्युक्तपरस्परसादृश्यवत्सु जीवेषु परस्परावयववत्त्वाभावा च्चेति चेत् । न– यत्र यत्सादृश्यप्रकारकबहिरिन्द्रियजन्यप्रत्यक्षविषयत्वं तत्र तदवयववत्त्वमिति व्याप्तेः उक्तव्यभिचाराभावेनादुष्टत्वात् ।

तथा च स्थाण्वादिः पुरुषाद्यवयववान् पुरुषसादृश्यप्रकारकबहिरिन्द्रियजन्यप्रत्यक्षविषयत्वात् । यः यत्सादृश्यप्रकारकबहिरिन्द्रियजन्यप्रत्यक्षविषयः सः तदवयववान् यथा पूतीकादिः इत्यनुमानेन स्थाण्वादौ पुरुषावयवसद्भावसिद्धया स्थाणौ प्रत्यक्षात्मिका पुरुषबुद्धिः सिद्ध्यतीति निष्कृष्टार्थो बोध्यः ।

यदाहुः—

सोमाभावे च पूतीकग्रहणं श्रुतिचोदितम् ।
सोमावयवसद्भावादिति न्यायविदो विदुः ॥ १ ॥
व्रीह्यभावे च नीवारग्रहणं व्रीहिभावतः ।
तदेव सदृशं तस्य यत्तद्द्रव्यैकदेशभाक् ॥ ॥ २ ॥
रूप्यादिसदृशश्चायं शुक्त्यादिरुपलभ्यते ।
अतस्तस्यात्र सद्भावः प्रतीतेरपि निश्चितः ॥ ॥ ३ ॥ इति ।

शुक्तिकायां रजतबुद्धिरिव मरुमरीचिकासु जलबुद्धिरपि यथार्थैव । त्रिवृत्करणन्यायेन तैजसमरीचिकास्वपि जलावयवानां सत्त्वात्, दोषेण तेजःपृथिव्योरग्रहणे विद्यमानस्यैव जलस्य ग्रहणम् । तत्र चादृष्टं नियामकम् । सर्वैरपि ख्यातिवादिभिः अदृष्टस्य नियामकत्वं स्वीकरणीयम् । अन्यथा सर्वेषां सर्वदा सर्वत्र सर्वविषयकभ्रमप्रसङ्गात् । कदाचिदपि भ्रमाभावप्रसङ्गाच्च ।

पित्तोपहतनयनस्य पीतः शङ्खः इति बुद्धिरुदेति । तत्र नयनगतपित्तद्रव्यसंयुक्ताः नयनरश्मयः शङ्खेन संयुज्यन्ते । पित्तद्रव्यं पीतिमा च साक्षात्क्रियते। शङ्खे विद्यमानमपि शौक्ल्यं पीतिमाभिभूतत्वात् न गृह्यते । प्रत्यक्षेण पीतरूपवता पित्तद्रव्येण सह शङ्खे भेदाग्रहात् सुवर्णानुलिप्ते शङ्खे इव पीतः शङ्खः इति व्यवहारः ।

यत्र जपाकुसुमसंनिहितः स्फटिकः, तत्र संनिहितजपाकुसुमप्रभा विततता स्वच्छे स्फटिकमणौ स्फुटमुपलभ्यते । लौहित्याभिभूतत्वात् शौक्ल्यं न प्रतीयते । प्रभायाः भेदाग्रहात् स्फटिके लोहितव्यवहारः ।

दिङ्मोहऽपि यथार्थ एव । 'दिशः श्रोत्रात्' इति श्रुतेः दिशः अनेकाः । प्राच्यां प्रतीचीत्वभ्रम इत्युच्यते । तत्र स्वदेशात् प्राच्यामपि ततः प्राचीनात् प्रतीचीत्वं वर्तते । स्वावधिकत्वं तत्र प्रतीचीत्वे नास्ति । अतः प्रतीचीत्वे स्वावधिकत्वासंसर्गाग्रहः इति बोध्यम् ।

दर्पणे निजमुखप्रतीतिरपि यथार्था । नयनरश्मयः दर्पणदेशं गत्वा ततः प्रतिहतगतयः दर्पणग्रहणपूर्वकं स्वीयमुखं गृह्णन्ति । अतिशैघ्र्यात् निजमुखस्य दर्पणस्य चान्तरालरूप-

विप्रकर्षाग्रहणात् मुखे दर्पणस्थत्वासंसर्गाग्रहः । एवं दर्पण-स्थमलिनत्वस्य अभिमुख्यादेश्चासंसर्गाग्रहो बोध्यः ।

एवमेव आकाशे द्वौ चन्द्राविति प्रतीतिरपि द्रष्टव्या । अङ्गुल्यवष्टम्भादिना तिमिरादिना च चक्षुषः गतिभेदो भवति। एका ऋज्वी, अपरा वक्रगतिः । एवं गतिभेदेन चाक्षुषसामग्री-द्वयं जातम् । तच्च परस्परनिरपेक्षं चन्द्रग्रहणद्वयं जनयति । एका सामग्री स्वदेशस्थितचन्द्रग्रहणं जनयति । अन्या च चन्द्रसमीपदेशग्रहणपूर्वकं तद्विशेषितचन्द्रग्रहणं जनयति । अतिशैघ्र्यात् ग्रहणद्वयस्य क्रमः भेदश्च न गृह्यते । संस्कार-सहितस्यैव चक्षुषः ऐक्यप्रतिपत्तिसामर्थ्यं दृष्टम् ।अत्र च संस्कारः न संभवति । विलम्बेनैव तज्जननात् । संस्का-राभावाच्च चक्षुः चन्द्रैक्यं न गृह्णाति । चन्द्रगतैकत्वा-ग्रहणात् चन्द्रदेशे द्वाविति न प्रतीयते । इत्थं च चन्द्र-विशेषणदेशगतद्वित्वस्य चन्द्रे असंसर्गाग्रहः । ततः द्वौ चन्द्राविति व्यवहारः । प्राभाकरा अख्यातिवादिनः नेव-जन्या वृत्तिः वित्तिगतद्वित्वं अगृहीतासंसर्गं चन्द्रं च गृह्णातीति वदन्ति । एते वादिनः देशगतं द्वित्वं चन्द्रं चागृहीतासंसर्गं गृह्णातीति संगिरन्ते इति विशेषोऽवसेयः ।

एवं जागरे भ्रमस्थलेषु प्रतीतियाथार्थ्यं चिन्तितम् । अथ स्वाप्नप्रतीतिः निरूप्यते ।

स्वाप्नप्रतीतिरपि यथार्थैव । तद्विषयाणां पदार्थानां परमेश्वर-सृष्टानां सत्यत्वात् । जगत्कर्ता परमेश्वरः प्राणिनां पुण्यपापानुरोधेन तत्तत्पुरुषमात्रानुभाव्यान् स्वप्नकालावसानांश्च पदार्थान् सृजति । अतः ते सत्या अपि न सकलपुरुषानुभाव्याः, न वा जागरे दर्शनयोग्याः । स्वप्ने सकलपुरुषानुभाव्याः रथाः, अश्वाः, पन्थानश्च न सन्ति । भगवान् रथादीन् तत्तत्प्राणिमात्रानुभाव्यान् स्वप्नकालमात्रस्थायिनः पदार्थान् सृजति इति बोधयति—'न तत्र रथा न रथयोगा न पन्थानो भवन्ति । अथ रथान् रथयोगान् पथः सृजते । न तत्रानन्दा मुदः प्रमुदो भवन्ति । अथानन्दान् मुदः प्रमुदः सृजते । न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्ति । अथ वेशान्तान् पुष्करिण्यः स्रवन्त्यः सृजते । स हि कर्ता ।' (बृ.) इति श्रुतिः । अत्र रथादीनां सर्वानुभाव्यत्व-चिरकालस्थायित्वादि-रूपेण निषेधः । तत्तत्पुरुषमात्रानुभाव्यत्व-स्वप्नकालमात्र-स्थायित्वादिना विधानमिति न विरोधः । एतादृशार्थस्रष्टा न जीवो भवितुमर्हति, तन्निष्ठस्य सत्यसंकल्पत्वस्य संसारदशायां

तिरोधानेनाविर्भावाभावात् । स्वप्ने जीवानिष्टमपि सृज्यते । न हि जीवः स्वानिष्टं स्वयं सृजेत् । भगवतः सत्यसंकल्पस्य आश्चर्यशक्तेः कर्तृत्वं संभवतीति 'स हि कर्ता' इति श्रुतेराशयः । तेन सृजते इत्यनेन न पौनरुक्त्यं भवति ।

'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः ।
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ।

तस्मिल्लोकाः श्रिताः सर्वे तदु, नात्येति कश्चन ॥' (का.) इति काठकश्रुतिश्च स्पष्टमेव ब्रह्मणः स्वाप्नसृष्टिकर्तृत्वमाह ।

बादरायणोऽपि, 'सन्ध्ये सृष्टिराह हि' 'निर्मातारं चैके पुत्रादयश्च' इति सूत्रद्वयेन जीवकर्तृका स्वाप्नसृष्टिः इत्या- 'शङ्क्य' 'मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्' इति

सूत्रेण, न जीवस्य संकल्पमात्रेण स्रष्टृत्वमुपपद्यते, जीवस्य स्वाभाविकसत्यसंकल्पत्वादेः कृत्स्नस्य संसारदशायामनभिव्यक्तस्वरूपत्वात्, ईश्वरस्यैव तत्तत्पुरुषमात्रानुभाव्यतया आश्चर्यरूपा सृष्टिरिति परिहरति । (अत्र सूत्रे मायाशब्दः

आश्चर्यबोधकः) तथाच जागरकालिकस्येव स्वाप्नस्य पदार्थ-जातस्य सत्यत्वात् तत्प्रतीतिरपि यथार्थैव ।

ननु स्वाप्नानामर्थानां उचितदेशकालनिमित्तसंपत्तिः न दृश्यते । अतः एषां कथं सत्यत्वम् । अन्तर्देहे स्वप्न-दर्शनं भवति । न हि संवृते देहदेशे रथादयः अवकाशं लभेरन् । एवं कालविसंवादोऽपि भवति । रजन्यां सुप्तः भारते वर्षे दिवसमनुभवति । भारतवर्षे रात्रिसमये केतुमाल-वर्षे सूर्यरश्मीनां प्रसरात् दिवसो भवति न तु भारतवर्षे । एवं मुहूर्तमात्रवर्तिनि स्वप्ने कदाचित् वर्षपूगानतिवाहयति । च-क्षुरादीनां करणानामुपसंहरात् चाक्षुषं दर्शनमपि न संभवति । योजनशतप्राप्यस्यापि देशस्य क्षणेन गमनम्, क्षणेन च ततः प्रत्यागमनं स्वाप्नं नोपपद्यते । स्वप्नदृष्टानां सत्यानां रथा-दीनां जागरे कुतो न चक्षुरादिना उपलम्भः । तस्मात् स्वाप्नार्थाः मिथ्यैवेति तज्ज्ञानं भ्रान्तिरेव इति चेन्न ।

स्वप्नकाले परमेश्वरेण तत्तत्पुरुषमात्रोपभोगाय सृष्टानां आश्चर्यभूतसूर्यकिरणानां प्रसरसत्वेन रजन्यामपि भारतवर्षे स्वप्ने दिवसोपलम्भः उपपद्यते । मनुष्याणामेको वर्षः देवाना-मेको दिवसः ।

देवकालोपाध्यपेक्षया मनुष्यकालोपाधीनां सूक्ष्मत्वमिव जागरकालोपाध्यपेक्षया स्वाप्नकालोपाधीनां सूक्ष्मत्वकल्पनेन स्वप्ने क्षणेन वर्षपूगातिवाहनं युज्यते । स्वाप्नशरीरस्य आश्चर्यरूपस्य भगवता सृष्टस्य जागरितशरीराद्विलक्षणत्वेन क्षणेनैव योजनशतप्राप्यदेशगमनं, ततः प्रत्यागमनं चोपपद्यते । अपवरकादिषु शयानस्य स्वप्नदृशः स्वदेहेनैव देशान्तरगमन– राज्याभिषेक– शिरश्छेदादयः पुण्यपापफलभूताः शयानदेहसंस्थानसरूपसंस्थानदेहान्तरसृष्ट्या उपपद्यन्ते । सरूपे देहान्तरे शयानदेहव्यवहारः भेदाग्रहात्, न तु अन्यथाख्यातेः । स्वाप्नपदार्थेषु जागरकालीनसर्वपुरुषानुभाव्यपदार्थभेदाग्रहादेव प्रवृत्तिर्भवति । स्वाप्नपदार्थानां स्वाप्नचक्षुरादिमात्रग्राह्यत्वकल्पनात्, स्वप्नावसाने भगवतैव तेषामुपसंहारकल्पनाच्च जागरिते स्वाप्नानां अप्रत्यक्षतापि उपपद्यते।

अथवा स्वप्ने भासमानान् पदार्थानिव जागरिते शुक्तिरजतादिज्ञानादावपि भासमानान् तत्तत्पुरुषैकानुभाव्यान् पुण्यपापानुरोधेन तत्कालावसायान् पदार्थान् भगवानेव

सृजति । "इदं सर्वमसृजत" इति श्रुतेः, इदमिति शब्देन प्रतीयमानानामभिधानात् । ते च पदार्थाः तत्तत्पुरुषैकानुभाव्य—स्वल्पकालावस्थायिसुखदुःखविशेषा इव सत्या एवेति तत्प्रतीतिरपि यथार्थैव इति सर्वमपि ज्ञानं यथार्थमेवेति वर्णयन्ति।

रामानुजीयाः परे, सर्वं ज्ञानं यथार्थज्ञानमित्यस्य, यथार्थत्वं ज्ञानत्वव्यापकमित्यर्थाङ्गीकारे, अन्यथाख्यातिवादिभिः नैयायिकैरपि 'धर्म्यंशे सर्वमभ्रान्तं प्रकारे तु विपर्ययः इत्यङ्गीकारात्

"अथवा किमनेन बहुनोपपादनप्रकारेण । प्रत्यक्षानुमानागमाख्यं प्रमाणजातम् । आगमगम्यं च निरस्तनिखिलदोषगन्धमनवधिकातिशयासंख्येयकल्याणगुणगणं सर्वज्ञं सत्यसंकल्पं परं ब्रह्माभ्युपगच्छतां किं न सेत्स्यति, किं नोपपद्यते । भगवता हि परेण ब्रह्मणा क्षेत्रज्ञपुण्यपापानुगुणं तद्भोग्यत्वाय अखिलं जगत् सृजता सुखदुःखोपेक्षाफलानुभवानुभाव्याः पदार्थाः सर्वसाधारणानुभवविषयाः, केचन तत्तत्पुरुषमात्रानुभवविषयाः तत्तत्कालावसानाः तथा तथानुभाव्याः सृज्यन्ते । तत्र बाध्यबाधकभावः सर्वानुभवविषयतया तद्रहिततया चोपपद्यते इति सर्वं समञ्जसम् ।" इति श्रीभाष्यम् ।

तत्र "अथवा किमनेन इत्यादिपाठः बहुषु कोशेषु दृश्यते । व्याख्यातृभिः व्याख्यातश्च" । इति श्रुतप्रकाशिका ।

सिद्धसाधनं भवेत् । अतः तदवृत्तिर्धर्मः तन्निष्ठविषयतावच्छेदकत्वाभाववान् इति निष्कृष्टार्थः । नैयायिकैः शुक्त्यवृत्तिरजतत्वावच्छिन्न–शुक्तिविशेष्यताशालिज्ञानमभ्युपगम्यते । तन्न साधु, रजतत्वं शुक्तिनिष्ठविषयतावच्छेदकं न भवति । शुक्तिनिष्ठविशेष्यतानिरूपितप्रकारतावत् न भवति इति फलितोऽर्थः । विषयतावच्छेदकताया विषयतारूपत्वात् । तथाच रजतत्वं शुक्तिनिष्ठविषयतावच्छेदकत्वाभाववत् शुक्त्यवृत्तित्वात्–यो यदवृत्तिः सः तन्निष्ठधर्मावच्छेदकत्वाभाववान् इति सामान्यव्याप्तौ दण्डनिष्ठकारणतावच्छेदकत्वाभाववत् दण्डावृत्तिघटत्वादिकं दृष्टान्तः । एवं च न सिद्धसाधनदोषावकाशः ।

ननु इदं रजतमिति भ्रमस्थले रजतत्वेनेदं जानामीत्यनुभवो वर्तते । तेन रजतत्वावच्छिन्न–शुक्तिनिष्ठविशेष्यताशालिज्ञानं सिद्ध्यति । अतः रजतत्वे शुक्तिनिष्ठविषयतावच्छेदकत्वस्य सिद्धत्वात् निरुक्तानुमाने बाधः । आवश्यकं च रजतत्वस्य शुक्तिनिष्ठविषयतावच्छेदकत्वम् । अन्यथा भ्रमस्थले रजतत्वप्रकारकशुक्तिविशेष्यकप्रवृत्तेरसंभवापत्तिः । तद्विशेष्यकतत्प्रकारकप्रवृत्तौ तद्विशेष्यकतत्प्रकारकज्ञानस्य हेतुत्वादिति चेत् । न–

भ्रमस्थले इदमिति रजतमिति च ग्रहणद्वयं जायते । युगपत् ज्ञानद्वयानुत्पादनियमश्चाप्रामाणिकः । विभिन्न-ज्ञानीययोरपि रजतत्वप्रकारता–इदन्त्वावच्छिन्नविशेष्यतयोः निरूप्यनिरूपकभावः स्वीक्रियते । ततश्च विशिष्टज्ञानस्येव निरुक्तज्ञानद्वयस्यापि रजतत्वनिष्ठप्रकारतानिरूपितेदन्त्वावच्छिन्नविशेष्यताशालिज्ञानत्वात्, ज्ञानद्वयेन रजतत्वप्रकारकेदन्त्वावच्छिन्न (शुक्ति) विशेष्यकप्रवृत्तेर्नानुपपत्तिः । आवश्यकश्च ज्ञानद्वयीयविषयतयोर्निरूप्यनिरूपकभावः । अन्यथा नेदं रजतमिति बाधज्ञानप्रतिबध्यता न स्यात् । रजतत्वप्रकारतानिरूपितेदन्त्वावच्छिन्नविशेष्यताशालिज्ञानत्वरूपस्य प्रतिबध्यतावच्छेदकस्याभावात् । न च तथा सति रजतत्वाभाववच्छुक्तिनिष्ठविशेष्यतानिरूपितरजतत्वप्रकारताकज्ञानत्वरूपमन्यथाख्यातित्वं स्वीकृतं स्यात् । पूर्वोक्तानुमाने रजतत्वे पक्षे शुक्तिनिष्ठविषयतावच्छेदकत्वाभावरूपसाध्याभावेन बाधश्च स्यादिति वाच्यम् । स्वाश्रयाभाववन्निष्ठत्व–स्वनिरूपितत्व–स्वनिरूपकज्ञाननिरूपितत्वैतत्त्रितयसंबन्धेन प्रकारताविशिष्टविशेष्यतावत्त्वमेवान्यथाख्यातित्वम् । ज्ञानद्वये च ज्ञानभेदात् प्रकारतानिरूपकज्ञाननिरूपितत्वस्य विशेष्यतायामभावेन स्वनिरूपकज्ञाननिरूपितत्वरूपतृतीयसंबन्धाभावात् निरुक्तप्रकारता-

विशिष्टविशेष्यतावत्त्वरूपमन्यथाख्यातित्वं न स्वीकृतं भवति। अस्मन्मते च स्वनिरूपकज्ञानानिरूपितत्व–स्वनिरूपितत्वोभय-संबन्धेन प्रकारताविशिष्टविशेष्यताशालित्वमेव भ्रमपदशक्यतावच्छेदकम्। भ्रमस्थले एव विभिन्नज्ञानीयविषयतयोः निरूप्य-निरूपकभावः स्वीक्रियते इति बोध्यम्। रजतत्वेनेदं जानामीत्यनुभवोऽप्युपपद्यते। इमे रजतशुक्ती इति ज्ञाने रजतत्व-प्रकारकत्व-शुक्तिविशेष्यकत्वयोः सत्त्वेऽपि तदनन्तरं, रजतत्वेन शुक्तिं जानामीत्यनुभवो नोदेति। तत्र तादृशानुभववारणाय द्वितीयान्तशब्दोल्लेख्येदमादिविशेष्यकत्वस्य तृतीयान्तशब्दोल्लेख्यरजतत्वादिप्रकारकत्वस्य चावच्छेद्यावच्छेदकभावोऽपि निरुक्तानुभवे भासते इत्यङ्गीकरणीयम्। ययोः विषयितयोरवच्छेद्यावच्छेदकभावः तन्निरूपितप्रकारताविशेष्यतयोः निरूप्यनिरूपकभावः इति नियमसिद्धः रजतत्वप्रकारता-इदन्त्वावच्छिन्नविशेष्यतयोः निरूप्यनिरूपकभावः इति, इदं, रजतमिति ज्ञानद्वयानन्तरं निरुक्तानुभव उपपन्नो भवति।

नचैवं ज्ञानद्वयीयविषयतयोः निरूप्यनिरूपकभावोपगमे इदन्त्वावच्छिन्नविशेष्यतानिरूपितप्रकारतात्मकविषयतारूपस्य इदन्त्वावच्छिन्नशुक्तिविशेष्यतावच्छेदकत्वस्य रजतत्वे

सत्त्वेन रजतत्वं शुक्तिनिष्ठविषयतावच्छेदकत्वाभाववत् इति पूर्वोक्तानुमाने बाधो दुर्वार इति वाच्यम् । शुक्तौ रजतत्व-प्रकारकमेकं विशिष्टज्ञानमन्यथाख्यातिः नैयायिकैः स्वीक्रियते। अस्माभिस्तु ज्ञानद्वयम् । शुक्तिनिष्ठविशेष्यताशालिज्ञानीय-विशेष्यतानिरूपितप्रकारतारूपस्य रजतत्वे नैयायिकाभिमतस्य निरुक्तशुक्तिनिष्ठविषयतावच्छेदकत्वस्य अभावः साध्यते । तथाच स्वनिरूपकज्ञाननिरूपितत्व–स्वनिरूपितत्वोभयसंबन्धेन शुक्तिनिष्ठविषयताविशिष्टा या अवच्छेदकता तदभावः साध्यः इति निर्गलितार्थः । तथाच न बाधो दोषः ।

ननु एवं सति अख्यातिमते इव ग्रहण–स्मरणात्मक-ज्ञानद्वयस्वीकारेणाप्युपपत्तौ, त्रिवृत्करण–प्रतिनिधिन्यायाभ्यां शुक्तौ रजतावयवसद्भावनिरूपणं श्रीभाष्यकृतां व्यर्थमिति चेत् । न-रजतज्ञानस्य स्मृतिरूपत्वे रजतं स्मरामीत्यनुभवः स्यात्, न तु रजतं पश्यामीति । रजतं पश्यामीत्यनुभवसिद्धरजतनिष्ठ-लौकिकविषयता रजतेन्द्रियसंयोगप्रयुक्तेति इन्द्रियसंयोग-निर्वाहाय निरुक्तन्यायाभ्यां शुक्तौ रजतावयवसाधनं सार्थकमेव। संप्रतिपन्नेनापणस्थेन इन्द्रियसंनिकर्षाभावात्, ज्ञानलक्षणायाश्च प्रत्यासत्तित्वानङ्गीकारात् ।

लौकिकविषयतासंबन्धेन प्रत्यक्षं प्रति इन्द्रियसंयोगस्येव दोषविशेषस्यापि हेतुत्वात् संनिकर्षाभावेऽपि रजते चाक्षुष-लौकिकविषयता संभवतीति न मन्तव्यम् । परस्परं व्यभिचारवारणाय तत्तदव्यवहितोत्तरत्वस्य कार्यतावच्छेदके प्रवेशेन अनेककार्यकारणभावकल्पनायां गौरवात् ।

एकभूतप्रकृतिके पदार्थे भूतान्तरप्रकृतिकपदार्थभ्रमस्थले त्रिवृत्करणन्यायेन भूतान्तरावयवसंबन्धसिद्धावपि, पृथिवीप्रकृतिके स्थाणौ पार्थिवपुरुषस्य भ्रमस्थले स्थाणौ पुरुषावयवसंबन्धः त्रिवृत्करणन्यायेन नोपपादयितुं शक्यते इति प्रतिनिधिन्यायोऽप्याहतः । बाह्यप्रत्यक्षविषयपदार्थेषु सादृश्ये अवयवसंबन्ध-प्रयुक्तत्वस्य सर्वसिद्धत्वात्, शुक्तौ रजतसादृश्यं रजतावयव-संबन्धं विना, स्थाणौ पुरुषसादृश्यं पुरुषावयवसंबन्धं च विना नोपपद्यते । अत एव श्रीहर्षकविना नैषधे, दमयन्तीवदने चन्द्रसादृश्योपपादकतया चन्द्रावयवसंबन्ध आवश्यक इति इन्दुमण्डले दमयन्तीवदननिर्माणाय हृतसारांशत्वोत्प्रेक्षा वर्णिता 'हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा' इति ।

नयनगतपित्तद्रव्यं नयनरश्मिभिस्सह शङ्खेन संसृष्टं भवति । पीतिम्नः तदाश्रयस्य पित्तस्य च नयनसंनिकर्षात् प्रत्यक्षत्वम् ।

दोषेण शङ्खमात्रं गृह्यते न शौक्ल्यम् । अतः पीत इति पीतिमप्रकारकपित्तद्रव्यविशेष्यकप्रत्यक्षम्, शङ्खप्रत्यक्षं चेति प्रत्यक्षद्वयं जायते । विभिन्नज्ञानीययोरपि पीतत्वप्रकारताशङ्खविशेष्यतयोः निरूप्यनिरूपकभावः, ज्ञानद्वयस्य भ्रमपदवाच्यता च पूर्ववत् ।

विभिन्नज्ञानीययोरपि पीतत्वप्रकारता—शङ्खत्वावच्छिन्नविशेष्यतयोः निरूप्यनिरूपकभावः "पीतशङ्खादौ तु" इति प्रयुञ्जानस्य भाष्यकारस्य संमतः । अन्यथा "पीतशङ्खः" इति समासस्यासाधुतापतेः । अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतां इत्यादौ राजपदस्य पुत्रपदेन समासवारणाय, साक्षात् परम्परया वा तत्पदप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वरूपतदेकवाक्यतात्मकसामर्थ्यसद्भावे एव समासस्य साधुत्वात् । पीतविषयताशङ्खविषयतयोः निरूप्यनिरूपकभावस्य अभावे पीतपदशङ्खपदयोः सामर्थ्याभावेन पीतशङ्खेति समासस्यासाधुत्वात् ।

जपाकुसुमप्रभा स्फटिके संक्रान्ता । कुसुमप्रभागतलौहित्ये स्फटिके च चक्षुःसंयोगस्य सत्वात् लौहित्यप्रकारकप्रभाविशेष्यकप्रत्यक्षम्, स्फटिकप्रत्यक्षं चेति प्रत्यक्षद्वयं

जायते । ज्ञानद्वयीयलोहित्यप्रकारतास्फटिकविशेष्यतयोः निरूप्यनिरूपकभावः, ज्ञानद्वयं भ्रमपदवाच्यम्, प्रत्येकं यथार्थ-ज्ञानमेव इत्यादि पूर्ववत् ।

मरीचिकाजलज्ञानमपि यथार्थमेव । त्रिवृत्करणन्याये-न तेजसि स्थितं जलमेव दोषवशात् गृह्यते । मरीचिकात्व-प्रकारकं ज्ञानं तदन्तर्गतजलज्ञाने प्रतिबन्धकम् । तादृश-ज्ञाने दोषः प्रतिबन्धकः । अतः दोषसत्त्वे प्रतिबन्धकस्या-भावात् जलज्ञानमुदेति । जलज्ञानप्रतिबन्धकस्य मरीचि-कात्वप्रकारकज्ञानस्योत्पत्तिकाले जलज्ञानं न जायते, तद्धे-तोरदृष्टस्याभावात् ।

दर्पणादौ मुखादिप्रतीतिस्थलेऽपि नान्यस्यान्यथा भानम् । चाक्षषतेजसः प्रसरणेन दर्पणसंयोगे सति, तेन मुखसंयोगजनिका प्रतिहतिक्रिया तेजसि जायते । स्वच्छदर्पणसंयोगस्य तद्धे-तुत्वात् । तथाच मुखे दर्पणे च चक्षुस्संयोगसत्वात्, दर्पण-वृत्तित्वप्रकारकं ज्ञानं, मुखत्वप्रकारज्ञानं चेति प्रत्यक्षद्वयं जायते । विभिन्नज्ञानीययोः दर्पणवृत्तित्वप्रकारता– मुखविशेष्यतयोश्च निरूप्यनिरूपकभावः इति दर्पणवृत्ति मुखमिति प्रती-तिनिर्वाहः । दर्पणवृत्तित्वप्रकारकप्रत्यक्षे दर्पणांशे आभि-

मुख्यमलिनत्वादेर्भाने दर्पणविशेषणाभिमुख्य-मलिनत्वादि-प्रकारतायाः ज्ञानान्तरीयमुखविषयतायाश्च निरूप्यनिरूपकभावः स्वीक्रियते। एवं च दर्पणे ममाभिमुखं मलिनं मुखमिति प्रतीति-निर्वाहः ।

'अनवस्थितेरसंभवाच्च नेतरः' ब्र. सू.) इति सूत्र-श्रीभाष्यस्वरससिद्धं, मुखसंनिधानेन दर्पणे मुखसजातीयं प्रति-बिम्बं सत्यं वस्त्वन्तरं जायते, इति कल्पान्तरमपि वर्तते । स्पर्शशून्यस्य प्रतिबिम्बस्य न त्वाचप्रत्यक्षं, परन्तु उद्भूतरूप-वत्त्वात् चाक्षुषं प्रत्यक्षं भवति । तत्र प्रतिबिम्बे तिलकोत्पत्तिं प्रति बिम्बगततिलकस्य क्रियोत्पत्तिं प्रति बिम्बगतक्रियायाश्च स्वाश्रयसांनिध्यसंबन्धेन हेतुता । बिम्बसांनिध्यनाशात् प्रति-बिम्बनाशः इत्यनुभवानुरोधात् कल्प्यते । दर्पणे मुखं प्रति-फलति इत्यस्य दर्पणनिष्ठप्रतिबिम्बजनकं मुखमित्यर्थः इति तत्कल्पनिष्कर्षः । एवं च सत्यस्य प्रतिबिम्बस्य प्रतीतिर्य-थार्थैव ।

उपाधिविशेषविशिष्टगगनमेव दिक्, नातिरिक्तं तत्त्वम् । प्राच्यां इयं प्रतीची इति भ्रमस्थले, इदन्त्वेन प्राचीप्रत्यक्षं, संनिकृष्टप्रतीचीत्वरूपोपाधिविशेषप्रकारकप्रत्यक्षं चेति ज्ञानद्वयं प्रत्येकं यथार्थमेव जायते । तदीयप्रकारता-विशेष्यतयोः निरूप्यनिरूपकभावः पूर्ववत् ।

द्विचन्द्रप्रतीतिस्थलेऽपि नान्यथाख्यातिः। चक्षुर्मध्यदेशसंयुक्तेन अङ्गुलिना तिमिरादिना दोषेण वा मध्ये चक्षुर्वृत्तेः प्रसरणप्रतिबन्धो भवति। ततः अङ्गुलिपार्श्वद्वये चाक्षुषं तेजः प्रसरति। तत्र एकया चाक्षुषसामग्र्या, चन्द्र-तदधिकरणदेशयोः संबन्धसत्त्वेन, एकत्वविशिष्टैतद्देशे चन्द्रः इत्याकारकं विशिष्टप्रत्यक्षं जायते। अपरया वक्रगतियुक्तया सामग्र्या एकत्वविशिष्ट–चन्द्रदेशसमीपदेशप्रकारकं चन्द्रविशेष्यकं प्रत्यक्षज्ञानद्वयं एकत्वविशिष्टैतद्देशे चन्द्रः इत्याकारकं भ्रमात्मकं च जायते। वक्रगत्या जातप्रत्यक्षद्वयविषयतयोः समीपदेश-निष्ठाधेयतासंबन्धावच्छिन्नप्रकारता–चन्द्रविशेष्यतयोः निरूप्य-निरूपकभावः। इत्थं च चन्द्रदेश–तत्समीपदेशयोः द्वित्व-प्रत्यक्षोत्पादाय द्वित्वं संपन्नं भवति। अपेक्षाबुद्धिविषयत्व-स्यैव द्वित्वरूपत्वात्। नैयायिकैः अनेकविशेष्यकैकत्वप्रकारकसमूहालम्बनबुद्धिरेव अपेक्षाबुद्धिरिति स्वीक्रियते। अस्माभिस्तु समूहालम्बनज्ञान–ज्ञानद्वयोभयसाधारण्येवैकत्व-बुद्धिः सेत्युच्यते। एवं देशद्वये अपेक्षाबुद्धिविषयत्वरूपस्य द्वित्वस्य संपत्तेः, देशगत द्वित्वप्रकारकप्रत्यक्ष-चन्द्रविषयकप्रत्यक्ष-ज्ञानद्वयात्मकं द्वौ चन्द्रौ इत्याकारकं भ्रमात्मकं ज्ञानमुदेति।

अत्र ज्ञानद्वयीयद्वित्वप्रकारता–चन्द्रविशेष्यतयोः निरूप्य-निरूपकभावः पूर्ववत् । इदं ज्ञानद्वयमपि प्रत्येकं यथार्थमेव देशगतद्वित्वस्य चन्द्रस्य चाबाधितत्वात् । तदयं निर्गलितोऽर्थः– अङ्गुल्यवष्टम्भादिजनितचाक्षुषतेजःप्रसरद्वयजनित – ज्ञानद्वयात्मकापेक्षाबुद्धिविषयत्वरूप– देशनिष्ठद्वित्वावगाहि द्वौ, चन्द्रौ इति ज्ञानद्वयात्मकमुत्पद्यते इति ।

स्वप्नेऽपि तत्तत्पुरुषपुण्यपापानुसारेण तत्तदात्ममात्रानुभाव्याः तत्कालावसानाः पदार्थाः भगवता सृज्यन्ते । ते च सत्या एवेति तद्विषयकं स्वाप्नज्ञानमपि यथार्थमेव ।

ननु स्वप्ने सृष्टिस्वीकारे दण्डं विनापि स्वाप्नघटस्य जायमानत्वेन व्यभिचारात् घटत्वावच्छिन्नं प्रति दण्डत्वेन कारणता न स्यात् । न च स्वाप्नभिन्नघटत्वस्य कार्यतावच्छेदकत्वस्वीकारान्न स्वाप्नघटे व्यभिचार इति वाच्यम् । दण्डं विनापि जातोऽयं स्वाप्नभिन्नघटः इति यत्र स्वप्नः, तत्र स्वाप्नभिन्नघटत्वावच्छिन्नस्यापि दण्डं विना जातत्वेन व्यभिचारतादवस्थ्यात् । न च स्वाप्नभिन्नघटः इति स्वप्ने प्रतीयमानघटे विद्यमानः स्वाप्नभेदोऽपि स्वाप्न एव । तथाच जाग्रत्कालिको यः स्वाप्नत्वावच्छिन्नभेदः, तस्य तद्व्यक्तित्वेन

कार्यतावच्छेदके निवेशात् न व्यभिचार इति वाच्यम् । यादृशस्वप्ने दण्डजन्यत्वेन घटो दृष्टः, तादृशघटे दण्डजन्यताया आवश्यकतया दण्डकार्यतावच्छेदकस्य तत्साधारण्यावश्यंभावेनासंगतेरिति चेत् । न—

अगत्या दण्डाव्यवहितोत्तरत्वस्य दण्डकार्यतावच्छेदके निवेशेन कार्यकारणभावकल्पनात् ।

नन्वेवमपि धूमस्य वह्निव्याप्यता न स्यात्, वह्निचभाववति ह्रदादावपि स्वप्ने धूमदर्शनसंभवेन स्वाप्नधूमस्य सत्वात् । न च स्वाप्नभिन्नधूमत्वमेव वह्निव्याप्यतावच्छेदकमिति न दोष इति वाच्यम् । तथासति वह्निव्याप्यत्वेन स्वप्नदृष्टधूमस्य व्याप्यत्वानापत्तिरिति चेत् । न— केवलधूमत्वमेव वह्निव्याप्यतावच्छेदकधर्मः । वह्निमदनुयोगिकसंयोगः व्याप्यतावच्छेदकसंबन्धः इति स्वीक्रियते । यादृशस्वप्ने वह्निं विनापि धूमो दृष्टः तत्र धूमे वह्निमदनुयोगिकसंयोगेन वह्न्यभावव्रद्वृत्तित्वविरहेण व्याप्यत्वमुपपद्यते ।

ननु स्वप्ने रजतज्ञानात् तत्र रजते प्रवृत्तिर्भवति । स्वाप्नत्वेन तद्रजतज्ञाने न तत्र पुरुषः प्रवर्तेत । अतः

स्वप्ने तादृशरजते जाग्रत्कालिकरजततादात्म्यभानमावश्यकमिति अन्यथाख्यातिस्वीकारप्रसङ्ग इति चेत् । न— तत्रापि इदमिति स्वाग्ररजतविषयकं ज्ञानं, जाग्रत्कालिकरजतमिति तत्ताद्रात्म्यावगाहिज्ञानं चेति ज्ञानद्वयमेव जायते । तादृशज्ञानद्वयस्यैव भ्रमपदबोध्यता । तदीयविषयतयोश्च निरूप्यनिरूपकभावः पूर्ववदिति सामञ्जस्यात् नान्यथाख्यातिस्वीकारप्रसङ्गः ।

एवं जागरेऽपि पुरुषस्य यथा यथा भ्रमो भवति. तथा तथा तत्तत्कालावसानान् तत्तत्पुरुषमात्रानुभाव्यान् पदार्थान् भगवान् सृजतीति कल्पः 'अथवा' इत्यादिना भाष्योक्तः । तत्रापि कल्पे, रजतभ्रमस्थले चिरकालस्थायिरजतार्थिनः प्रवृत्तिनिर्वाहाय, भ्रमविषयरजते चिरकालस्थायिरजततादाम्यज्ञानमावश्यकम् । तावतापि नान्यथाख्यात्यापत्तिः । इदम्, चिरस्थायिरजतमिति ज्ञानद्वयं जायते, तदीयविषयतयोश्च पूर्ववत् निरूप्यनिरूपकभावः इति स्वीकारेण सामञ्जस्यात् । न च हेयास्पदं ब्रह्मेति भ्रमस्थले ब्रह्मणि हेयसृष्टेरावश्यकतया ब्रह्मणः हेयप्रत्यनीकत्वं न सिद्ध्यतीति वाच्यम् । तत्र हेयाश्रयस्यान्यस्य ब्रह्मणः सृष्टत्वेऽपि तदतिरिक्तस्य परब्रह्मणः हेयप्रत्यनी-

कत्वं न विरुध्यते । एवं, भगवान् भ्रान्तः इति कस्य चित् भ्रमे सति भ्रान्तत्वविशिष्टब्रह्मणः—सृष्टिस्वीकारेऽपि तदन्यस्य अनाद्यनन्तपुरुषोत्तमस्य भ्रान्तत्वासंभवात् । एवं, साध्याभाववद्भ्रमाविषयवृत्तित्वमेव व्यभिचारः । तेन साध्याभाववति निर्वह्नौ कस्य चित् धूमवत्त्वभ्रमेऽपि न व्यभिचारः इत्यादिकं बोध्यमिति निरूपयन्ति ।

इदमत्रावधेयम्—भाष्यतद्व्याख्याभिमते प्रथमे पक्षे शुक्तौ, इदं रजतमिति एकमेव विशिष्टज्ञानं यथार्थं स्वीक्रियते । त्विवृत्करणन्यायाप्रवृत्तिस्थले पीतः शङ्खः इत्यादौ न शङ्खः विशेष्यकं पीतत्वप्रकारकं ज्ञानम्, अन्यथाख्यात्यापातात् । परन्तु संनिकृष्टपीतद्रव्येण शङ्खस्यासंसर्गाग्रहात् पीतः शङ्खः इति व्यवहारः । शङ्खः पीतः इत्यादिभाष्यस्यायमेवाशयः ।

द्वितीये ज्ञानयाथार्थ्यवादकर्तॄणां परेषां पक्षे, सर्वत्र इदं रजतं, पीतः शङ्खः, लोहितः स्फटिकः, द्वौ चन्द्रौ इत्यादिके भ्रमस्थले ज्ञानद्वयमेव भ्रमपदवाच्यम् । तदीयप्रकारताविशेष्यतयोः निरूप्यनिरूपकभावः । प्रत्येकज्ञानं यथार्थमेव । असंसर्गाग्रहात् व्यवहारो नास्ति इति विशेषोऽवसेयः । निरूप्यनिरूपकभावापन्नप्रकारता—विशेष्यताशालिज्ञानद्वया-

भिप्रायकतया भाष्यादियोजनाप्रकारः नास्माकमुपयोगीति स नं वर्णितोऽत्रास्माभिरिति ।

इदमत्र चिन्त्यते– भूयोभिः शुक्त्यवयवैः ततो न्यूनैः रजतावयवैश्चारब्धे शुक्तिशकले दोषेण शुक्तित्वाग्रहे सति विद्यमानमेवावगाह्य जायमाना इदं रजतमिति प्रतीतिः यथार्था, इति यथार्थत्वसमर्थनं न समीचीनम् ।

शुक्त्यवयवैः रजतावयवैश्चारब्धे रजतत्वं प्रादेशिकमेव भवेत्, न व्याप्यवृत्ति । ततश्च शुक्तिशकले किञ्चिदवयवावच्छेदेन रजतप्रतीतिः स्यात् । यथा घटे सर्वावयवावच्छेदेन घटत्वबुद्धिरुदेति, तथैव शुक्तिशकले सकलावयवावच्छेदेन रजतप्रतीतिरुदेति । शुक्तिशकलमभिव्याप्य रजतत्वसंबन्धस्य वक्तुमशक्यत्वात् कथं सा प्रतीतिर्यथार्थेति निर्वोढुं शक्यते । नानारूपवद्भिः तन्तुभिरारब्धे चित्रपटे सामस्त्येन पटावगाही रक्तः पटः इति यथार्थप्रत्ययो नाभ्युपगम्यते, तत्रातिरिक्तस्य चित्ररूपस्यैव सत्त्वेन रक्तरूपाभावात् रूपस्य व्याप्यवृत्तित्वनियमात् । यदि 'लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः' इत्यादिप्रामाणिकवचनानुरोधेन रूपस्याव्याप्यवृत्तित्वमङ्गीक्रियते । तदापि रक्ततन्तुसंयोजनभागावच्छेदेन रक्तः

पटः इति प्रमोदेति, न तु सर्वः पटः रक्त इति प्रमा । तद्व-दत्रापि प्रादेशिकतया रजतप्रतीतिर्भवेत्, न तु सर्वशुक्त्यव-यवावच्छेदेन रजतमिति प्रमात्मिका प्रतीतिर्भवेत् । एवं, पञ्चलोहारब्धप्रतिकृतावपि रजतादिप्रतीतिः यथार्थतया न व्यवह्रियते इत्यपि बोध्यम् ।

अपिच, शुक्तौ रजतावयवा न सन्ति प्रमाणाभावात् । अग्निना दाहे सति रजतं द्रवीभवति । न तथा अग्निदाहे शुक्तिशकलस्य द्रवीभावो दृश्यते । अतो न तत्र रजतावयव-संबन्धोऽस्ति ।

किंच, आधानार्थं रजतालाभे शुक्तिशकलग्रहण-प्रसङ्गः । व्रीह्यलाभे यथाकथंचित् व्रीहिशब्दानुगुण्यसंपादनाय नीवारग्रहणवत् ।

अपिच मृदादिमिश्रितरजतदाहे मृदादीनां नाशे सति रजतं परिशिष्यते । तथैव शुक्तिदाहे सति रजतस्य परिशेषः स्यात् । न चैवं दृश्यते । अतो न रजतावयवैरारब्धः शुक्तिशकलः । न च औषधपुटसंयुक्तस्य रजतस्य दाहे सति, न परिशेषः, किन्तु भस्मीभावो दृश्यते । एवमनुभवानुरोधात्

शुक्त्यन्तर्गतरजतस्यापि अग्निदाहे सति न परिशेषः इति वाच्यम् । एतत्कल्पनायाः सर्वदा शुक्तौ रजतसद्भावस्य प्रमाणान्तरेण सिद्ध्यनन्तरमेव कल्पयितुं युक्तत्वात् । शुक्तौ रजतावयवसद्भावसाधनावसरे तथा वक्तुमयुक्तत्वात् ।

त्रिवृत्करणश्रुत्या शुक्तौ रजतावयवाः सिद्ध्यन्तीति न मन्तव्यम् । तया श्रुत्या पृथिवीत्वादिभूतविभाजकधर्मावच्छिन्नानामेव मिश्रणं बोध्यते । न तु पृथिवीत्व–तेजस्त्वादिव्याप्यशुक्तित्व–रजतत्वाद्यवच्छिन्नावयवानामपि । अत एव त्रिवृत्करणप्रक्रियायां, 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपां, यत्कृष्णं तदन्नस्य' इति तेजस्त्व–जलत्व–पृथिवीत्वाद्यवच्छिन्नानामेव मेलनमभिहितम्, न तु तेजस्त्वादिव्याप्यधर्मावच्छिन्नानाम् । 'आपः पुरुषवचसो भवन्ति' इत्यत्राहुतीनामप्शब्दबोध्यत्वे अब्बाहुल्यं निमित्तमित्युक्तं 'त्र्यात्मकत्वात्तु भूयस्त्वात्' ब्र. सू.) इत्यत्र । तथा च न त्रिवृत्करणश्रुतिः शुक्तित्वावच्छिन्नावयवानां रजतावयवानां च मिश्रणे प्रमाणं भवति ।

किं च शुक्तौ रजतावयवानां सत्त्वे ततः कटकाद्यर्थक्रियापि स्यात् । यदि च क्षीरान्तर्गतजलस्य जलप्रयोज्यार्थ-

क्रियाकारित्वाभाववत् शुक्त्यन्तर्गतरजतावयवस्य कटकाद्यर्थ-क्रियाकारिता नास्तीति मन्यते। तदा राजतकटकादिकं प्रति प्रचुरविजातीयभूतावयवासंसृष्ट-रजतावयवानां कारणत्वेन तदा-रब्धस्य रजतस्य निरुक्तरूपाक्रान्तरजतावयवारब्धरजतत्वेन गुरु-धर्मेणावच्छिन्ना कारणता कल्पनीयेति गौरवम्।

अपिच, शुक्तित्वाभिमतस्य विजातीयरजतावयवसंबन्धे न पुष्कलं शुक्तित्वं स्यात्। पुरुषमृगस्य पुरुषविजातीयमृगावयव-संबन्धात् यथा न पुष्कलं पुरुषत्वम्, तद्वत्। यदि च पुरुषमृगे न विकलं पुरुषत्वं मृगत्वं वाऽस्ति। अपि तु पुरुषमृगत्वं नाम विलक्षणं जात्यन्तरमेवेति मन्यते। तद्वदेव शुक्तितयाभिमते-ऽपि शुक्तित्व-रजतत्वविलक्षणं जात्यन्तरमेव स्यात्। ततश्च पुरुषमृगे पुरुषव्यवहारो यथा न मुख्यः पुरुषेण सौसादृश्या-भावात्, तथा शुक्तितयाभिमतायां विजातीयावयवसंसृष्टायां शुक्त्यन्तरेण सौसादृश्याभावात् शुक्तिरिति व्यवहारो न मुख्यः स्यात्। न च पुरुषत्वं अवयवसङ्घातविशेषे एव वर्तते, नाव-यवे। पुरुषमृगे च सङ्घातवैकल्यात् पुरुषत्वं पुष्कलं न वर्तते। यथा रजतत्वपृथिवीत्वादय अवयवेषु अवयवसङ्घा-तात्मके अवयविनि च वर्तन्ते, न पुरुषत्व—घटत्वादिवत् अवय-

विमात्रवृत्तयः, तथा शुक्तित्वमपि अणुमात्रेऽपि शुक्त्यवयवे अवयवसङ्घातविशेषे च वर्तते । न पुरुषत्व–घटत्वादिवत् अवयवसङ्घातमात्रे वर्तते । शुक्त्यवयवेषु विरुद्धजात्यन्वयाभावात् शुक्तित्वं तद्व्यवहारश्चोपपद्येते । शुक्तितयाभिमते सङ्घाते शुक्त्यवयवप्राचुर्यात् शुक्तिशब्देन व्यवहारः अर्थक्रियाकारिता चोपपद्यते । एवं शुक्त्यन्तर्गतरजतावयवेऽपि विरुद्धजात्यन्वयाभावात् पुष्कलं रजतत्वं वर्तते । दोषे सति प्रचुरशुक्तिग्रहणस्याभिभावकस्याभावात् रजतव्यवहारो भवति, रजतप्रतीतिरपि यथार्थेति वाच्यम् । शुक्तित्वं पुरुषत्ववत् अवयवसङ्घातविशेषमात्रवृत्ति, न शुक्त्यवयवसाधारणम् । शुक्तेरणुमात्रावयवे शुक्तिव्यवहारस्याप्रामाणिकत्वात् । ततश्च शुक्तित्वस्यावयवसाधारण्याभावात्, न विरुद्धजात्यन्वयरहित–पुष्कलशुक्तित्वाक्रान्त–शुक्त्यवयवप्राचुर्यात् शुक्त्यादिव्यवहारादिकमुपपद्यते । वस्तुतः त्रिवृत्करणेन महाभूतानां त्रयाणामपि मिश्रणात्, तादृशपृथिव्यारब्धे शुक्त्यवयवे रजतावयवसंमिश्रणस्य भवदभिमतत्रिवृत्करणन्यायेन सत्त्वात् तत्र पुष्कलं शुक्तित्वमित्यस्यासंभवात् तादृशशुक्त्यवयवप्राचुर्यात् शुक्त्यादिव्यवहारोपपादनं न युज्यते । तस्मात् रजतावयवसंबन्धात् शुक्तौ इदं रजतमिति प्रतीतिर्यथार्था इति न समञ्जसम् ।

किंच नेदं रजतमिति वाक्यजप्रतीतिः इदमि रजतभेदमवगाहते । समानविभक्तिकप्रतियोग्यनुयोगिबोधकपदसमभिव्याहृतनञो भेदार्थकत्वात् । इत्थं च नञुल्लेख्या तादृशबाधकप्रतीतिरपि इदमि रजतभेदविषयिणी इत्येव स्वारसिकम् । शुक्तौ रजतसद्भावे च रजतभेदस्य बाधितत्वात् न तादृशी बाधकप्रतीतिर्घटते ।

यदि च, शुक्तित्वमेव नञर्थः, तदेव क्वचित् शुक्तिशब्देन, क्वचित् प्रतियोगिसापेक्षनञादिशब्देन चोच्यते । तदुक्तं–'नेदं रजतमित्यत्र नञर्थः कः इति चेत् । शुक्तित्वमेवेति ब्रूमः ।' इति । इति मन्यते । तदा इयं शुक्तिः न रजतमिति शुक्तित्वेन रजतभेदं स्वरसतः साधयतो वाक्यस्यासामञ्जस्यं स्यात्, हेतोः साधनीयस्य च शुक्तित्वस्यैकत्वात् । तस्मात् बाधकप्रतीतेः नेदं रजतमित्याकारिकायाः शुक्तित्वविषयकत्वं न स्वारसिकमिति बोध्यम् ।

किंच, संप्रतिपन्नसमीचीनरजतार्थी भ्रान्तः शुक्तिशकलमादातुं प्रवर्तते । अतः तस्य संप्रतिपन्नसमीचीनरजततादात्म्यज्ञानमावश्यकम् । तच्चेदं सद्रजतमित्याकारकम् । पुरोवर्तिनि रजते संप्रतिपन्नसमीचीनरजततादात्म्यं चेत् तज्ज्ञाने

भासते, तदा अन्यथाख्यात्यापत्तिः । तादृशतादात्म्यस्य पुरोवर्तिशुक्तिगतरजते बाधितत्वात् । अतः, इदं सद्रजतमिति ज्ञानद्वयम् । तद्विषययोः पुरोवर्तिरजत–संप्रतिपन्नसमीचीनरजतयोश्च दोषेण भेदाग्रहात् प्रवृत्तिरिति च वक्तव्यमिति अख्यातिवादकुक्षिप्रवेशो बोध्यः ।

एवं पृथिव्यादिके शुक्त्यादौ तेजोरूपभूतान्तररजतावयवसंसर्गस्य कथं चित् त्रिवृत्करणन्यायेन सद्भावकथनेऽपि, पार्थिवे स्थाणौ पार्थिवपुरुषभ्रमस्थले पुरुषावयवसंबन्धः, पार्थिवे वल्मीके पार्थिवघटादिभ्रमस्थले घटावयवसंबन्धश्च न त्रिवृत्करणन्यायेन सिद्ध्यति । परं तु प्रतिनिधिन्यायेन । यत्सादृश्यप्रकारकबहिरिन्द्रियप्रत्यक्षविषयः यः तत्र तत्सादृश्यं, इति व्याप्तेः स्थाणु–वल्मीकादौ पुरुषावयव–घटावयवसद्भावः साधनीयः । तावताऽपि स्थाण्वादौ पुरुषत्वज्ञानस्य यथार्थता न वक्तुं शक्यते । पुरुषत्वस्य घटत्वस्य च नियतसंस्थानव्यङ्ग्यत्वेन स्थाण्वादौ तादृशावयवसंङ्घातविशेषाभावेन अभावात् ।

एवं नीवारेषु व्रीहिभ्रमस्थलेऽपि नीवारेषु व्रीह्यवयवसद्भावेऽपि व्रीहित्वस्य अभावात् तत्प्रतीतेः यथार्थता न

संभवति । व्रीहित्वस्य नीवारेषु सत्वे नीवाराणां प्रतिनिधित्वमेव व्याहन्येत् । अतः ईदृशस्थलेषु पुरुष–घट–व्रीहिविषयकं स्मरणात्मकं ज्ञानम्, पुरोवर्तिस्थाणु–वल्मीक–नीवारविषयकं ग्रहणात्मकं ज्ञानं चेति ज्ञानद्वयं, तद्विषययोः, भेदाग्रहं च प्रवृत्तिहेतुं स्वीकृत्य प्रत्येकं ग्रहणस्मरणयोः याथार्थ्यात् सर्वज्ञानयथार्थता उपपादनीयेति अख्यातिवादकुक्षिप्रवेशः सुदृढः ।

अपि च मल्लिकादिकुसुमगन्धे अन्यादृशकुसुमगन्धभ्रमो भवति । न हि तत्रापि अवयवानुप्रवेशेन प्रमात्वं समर्थयितुं शक्यते । गुणानां निरवयवत्वात् ।

एवं नीलोत्पलं सूर्यरश्मिभिः अभिव्याप्तं नीलं गृह्यते । रात्रौ दीपाभिव्यक्तं रक्तं गृह्यते । तत्र उत्पले नीलिमा, उत्पले रक्तिमा इति ज्ञानयोः प्रमात्वं निर्वोढुं न शक्यम् । निरवयवेषु गुणेषु अवयवानुप्रवेशासंभवात्, पृथग्भूतयोः नीलिमारुणगुणयोः व्याप्यवृत्तितया एकत्र समावेशासंभवाच्च ।

पीतः शङ्खः इत्यत्र, इन्द्रियसंनिकर्षेण पीतत्वविशिष्टपित्तद्रव्यस्य पीतः इति ग्रहणं, दोषात् शौक्ल्यविषयकं शङ्खः

इति प्रत्यक्षं च जायते । उभयोः असंसर्गाग्रहः । परन्तु तत्र "पित्तपीतिम शङ्खद्रव्यं च निरन्तरं गृह्येते इति प्राभाकरैरुक्तम् । अत्र तु रूपिद्रव्ये चक्षुषः सामर्थ्यात् पित्तद्रव्यं गृह्यते इत्युक्तमिति विशेषः ।" इति श्रुतप्रकाशिका अख्यातिमतात् स्वमतस्य किंचिद्वैलक्षण्यमभिधत्ते ।

दिङ्मोहेऽपि, दिगन्तरस्य निरन्तरं भानमिति प्रतीकमुपादाय "यस्मिन् प्रदेशे प्रत्यक्त्वभ्रमो जायते तत्र प्रत्यक्त्वमवध्यन्तरापेक्षया अस्त्येव । स्वाश्रयदेशापेक्षया परं नास्ति । ततश्चान्यावधिके प्रत्यक्त्वे स्वाश्रयदेशावधिकत्वासंसर्गाग्रह इत्यर्थः ।" इति व्याचक्षते व्याख्यातारः ।

एवं द्विचन्द्रज्ञानस्थलेऽपि, चन्द्रे चन्द्रदेश–तत्समीपदेशोभयगतद्वित्वासंसर्गाग्रह उपपादितः । तदनु, प्राभाकरोक्तात् स्वौक्तौ किञ्चिद्वैलक्षण्यमभिहितम् श्रुतप्रकाशिकायाम् । "द्वौ इति चन्द्रौ इति ज्ञानगतद्वित्वासंसर्गाग्रहः तैरुक्तः, अस्माभिस्तु देशगतद्वित्वासंसर्गाग्रह उक्त इति । नेत्रवृत्तिः वित्तिगतद्वित्वं चन्द्रञ्चागृहीतभेदं गृह्णातीति प्राभाकराः । यथा संवित्सिद्धौ प्राभाकरमतोपन्यासे–

नेत्रवृत्तिर्द्विधा भूता द्वे तु वृत्ती वितन्वती ।
द्वित्वं चन्द्रं च युगपत् निर्भासयति तत्र नः ॥ इति ।

देशगतं द्वित्वं चन्द्रञ्चागृहीतभेदं गृह्णातीति ततोऽत्र वैषम्यम् ।" इति श्रुतप्रकाशिका ।

एवमेव दर्पणस्थमुखप्रतीतावपि, दर्पणस्थाभिमुख्य—मलिनत्वादीनामसंसर्गाग्रहेण निर्वाहः कृतः ।

इत्थं बहुषु स्थलेषु अख्यातिवादसंमतः असंसर्गाग्रह एव स्वहस्तितः सर्वज्ञानयाथार्थ्यसमर्थनाय । तस्मादख्याति-वादशेषभूतोऽयं रामानुजीयानां यथार्थख्यातिवादः । शुक्ति-रजतज्ञानादिकतिपयस्थलेषु त्रिवृत्करणन्यायेन भूतान्तरावयव-सद्भावसमर्थनप्रयासः परमधिकः । अभिहितं च त्रिवृत्करण-न्यायेनावयवान्तरसंसर्गप्रतिपादन — स्वाप्नार्थसृष्टिकथनाभ्याम-ख्यातिमतवैलक्षण्यं टीकायाम्—

"प्राभाकरैः मन्त्रार्थवादार्थं प्रामाण्यानभ्युपगमात् केवल-भेदाग्रहेणैव निर्वाहः कृतः । अत्र तु मन्त्रार्थवादयोः प्रतीय-मानार्थे प्रामाण्याभ्युपगमात् उपनिषद्भागावगतं त्रिवृत्करणं,

ईश्वरकृतं सर्गविशेषं, तथा प्रतिनिधिन्यायं भेदाग्रहमप्युपजीव्य निर्वाहः कृतः ।" इति ।

वयं तु ब्रूमः—

समीचीनसंप्रतिपन्नरजतार्थिप्रवृत्त्यनुरोधेन प्रसिद्ध-शुक्तिरजतभ्रमस्थलेऽपि भवद्भिः सद्रजतभेदाग्रहस्यावश्याश्रयणीयतया शुक्तावपि रजतभेदाग्रहमाश्रित्यैव निर्वाहसंभवात् शुक्तौ रजतावयवानुप्रवेशसमर्थनायासो वृथेति ।

एवं मरीचिकाजलज्ञानस्थले, त्रिवृत्करणन्यायेन मरीचिकासु स्थितं भूतान्तरं जलमेवादृष्टवशात् प्रत्यक्षविषयः इति निर्वाहे, तादृशजलज्ञानानन्तरं समीपगमने सति जायमानानां अत्र जलं नास्ति, एतावन्तं कालमिदं जलतया अभ्राम्यम्, असदेव जलमभात् इत्यादीनां परीक्षितप्रामाण्यानां प्रत्यक्षाणां गतिर्दुर्निरूपा । यदि तेषां जलाभावासंसर्गाग्रहणरूपत्वमनुभवविरुद्धं कल्प्यते । तदा अल्पीयसां मरीचिकाजलप्रत्यायानामेव जलासंसर्गाग्रहत्वकल्पनमुचितं स्यादिति ।

एतावता श्रीभाष्य—तट्टीकानुसारेण जाग्रत्कालीनप्रतीतीनां सर्वासां रामानुजीयाभिमतः याथार्थ्यनिर्वाहप्रकारः समा-

लोचितोऽस्माभिः । अथेदानीं तदीयानामेव परेषां ज्ञानयाथार्थ्यवादप्रणेतॄणां तन्निर्वाहप्रकारं समालोचयामः ।

यथार्थं सर्वविज्ञानम् इति रामानुजभाष्यस्य तदवृत्तिधर्मः तन्निष्ठविषयतावच्छेदकत्वाभाववान् इति फलितार्थमुक्त्वा, रजतत्वं शुक्तिनिष्ठविषयतावच्छेदकत्वाभाववत् शुक्त्यवृत्तित्वात्, यो यदवृत्तिः, सः तन्निष्ठधर्मावच्छेदकत्वाभाववान् इति सामान्यव्याप्तौ दण्डावृत्तिः घटत्वादिः दण्डनिष्ठकारणतानवच्छेदकः दृष्टान्तः इति एते निरूपयन्ति ।

अन्यथाख्यातिवादिनं प्रति यथार्थख्यातिवादिनामयं प्रयोगः । रजतत्वे पक्षे शुक्त्यवृत्तित्वं न्यायमतसिद्धम् । एते तु त्रिवृत्करणप्रतिनिधिन्यायाभ्यां शुक्तौ रजतावयवसद्भावं निरूप्य, चक्षुः संयोगस्य सत्वेन रज तेचाक्षुषलौकिकविषयतायाः विद्यमानत्वेन रजतं पश्यामीति अनुभवस्योपपादनात् शुक्तिवृत्तित्वं रजतत्वस्याभ्युपगच्छन्ति । अतश्च रजतत्वे शुक्त्यवृत्तित्वं हेतुः स्वमते असिद्धः इति अन्यतरासिद्धोऽयं हेतुरिति, पटावृतिधर्मस्य घटत्वस्य घटत्वेन पटाभावीय—पटनिष्ठप्रति-

योगितायां व्यधिकरणतया अवच्छेदकत्वस्य सत्त्वेन व्यभिचारः इति च चिन्तनीयम् ।

एते पूर्वोक्तरामानुजीया इव बहुषु स्थलेषु असंसर्गाग्रहं नाद्रियन्ते । अथापि अख्यातिवादिन इव शुक्तिरजतभ्रमस्थले इदं, रजतमिति ज्ञानद्वयं स्वीकुर्वन्ति । परन्तु ते रजतज्ञानं देशान्तरस्थितरजतविषयकं प्रमुष्टतत्त्वाकस्मरणमिति मन्यन्ते । एते तु रजतं पश्यामीत्यानुभवात् रजतज्ञानं इन्द्रियसंनिकृष्ट-रजतविषयकं ग्रहणात्मकमिच्छन्ति । संज्ञाविशिष्टसंज्ञिज्ञाने संज्ञाया विषयतामनङ्गीकुर्वन्तः प्राभाकराः संज्ञादेः तटस्थज्ञान-विषयस्य संज्ञिनिष्ठविषयतावच्छेदकत्वं स्वीकुर्वन्ति । तथा इद-मिति ज्ञानीयविशेष्यतायाः रजतमिति ज्ञानीयरजतत्वप्रकारता-याश्च निरूप्यनिरूपकभावं स्वीकृत्य, विशिष्टैकज्ञानस्याभावेऽपि ज्ञानद्वयस्य विशिष्टज्ञानसाधारणरूपेण प्रवृत्तिकारणत्वमुपपाद-यन्त इमे न असंसर्गाग्रहं कुत्रापि भ्रमस्थले अवलम्बन्ते। अतः मार्गान्तरेण इमेऽपि ज्ञानयाथार्थ्यवादिनः अख्यातिमार्गगामिनः इति बोध्यम् । ज्ञानद्वयीयविषयतयोः निरूप्यनिरूपकभाव-स्वीकारेण निर्वाहप्रकारः भाष्यकाराभिमत इति भाष्यवाक्यानि योजयन्तो निरूपयन्ति । परं तु सा चिन्ता नास्माकमपेक्षिता ।

इदं रजतमिति भ्रमानन्तरं रजतत्वेनेदं जानामीत्यनुभवो जायते । स च रजतत्वप्रकारकमिदंविशेष्यकं च ज्ञानं गोचरयति, न ज्ञानद्वयम् । तृतीयान्तार्थरजतत्वप्रकारकत्वं द्वितीयान्तार्थेदंविशेष्यकत्वं च एकस्मिन्नेव ज्ञाधात्वर्थे अन्वेति । अतः तच्छब्दोल्लेखिनिरुक्तानुभवस्यापि रजतत्वप्रकारकत्वेदंविशेष्यकत्वयोराश्रयीभूतज्ञानविषयकत्वमेव न ज्ञानद्वयविषयकत्वमिति उक्तानुभवविरोधो दुर्वारः । न च रजतत्वप्रकारकत्वस्य इदमर्थशुक्तिविशेष्यकत्वस्य च इमे रजतशुक्ती इत्याकारके यथार्थज्ञाने सत्त्वात्, तज्ज्ञानानन्तरं रजतत्वेन शुक्तिं जानामि इत्यनुभवापत्तेर्वारणाय, निरुक्तानुभवे रजतत्वेनेति तृतीयान्तशब्दोल्लेख्यरजतत्वप्रकारकत्वस्य द्वितीयान्तशब्दोल्लेख्येदमादिविशेष्यकत्वस्य च अवच्छेद्यावच्छेदकभावभानस्योपगन्तव्यतया, ययोर्विषयतयोः निरूप्यनिरूपकभावः तन्निरूपितविषयितयोरवच्छेद्यावच्छेदकभावः इति न्यायेन रजतत्वप्रकारतायाः इदंविशेष्यतायाश्च निरूप्यनिरूपकभावसिद्ध्या, इदं, रजतमिति ज्ञानद्वयस्यापि रजतत्वप्रकारतानिरूपितेदमर्थविशेष्यताशालित्वात् रजतत्वेनेदं जानामीत्यनुभवः उपपद्यते इति वाच्यम् । रजतत्वेनेदं जानामि इति वाक्यस्थले, तृतीयान्तार्थरजतत्वप्रकारकत्वविशिष्टे धात्वर्थे द्वितीयान्तार्थस्य इदमर्थ-

विशेष्यकत्वस्यान्वये, उद्देश्यतावच्छेदक–विधेययोः अवच्छेद्यावच्छेदकभावभानस्य व्युत्पत्तिसिद्धत्वात् अवच्छेद्यावच्छेदकभावः शाब्दबोधे भासते । इत्थं च रजतत्वप्रकारकत्वविशिष्टज्ञानस्येदमर्थविशेष्यकत्वमावश्यकम् । तस्मात् रजतत्वप्रकारकमिदमर्थविशेष्यकं चैकज्ञानमवगाह्य रजतत्वेनेदं जानामीति वाक्यात् बोधो जायते । ततश्च तादृशशब्दोल्लेख्यानुभवस्यापि एकज्ञानावगाहित्वे एव रजतत्वप्रकारकत्वइदंविशेष्यकत्वयोरवच्छेद्यावच्छेदकभावावगाहिता संभवति इति ज्ञानद्वयस्वीकारे निरुक्तानुभवानुपपत्तिर्दुर्वारा ।

न च रजतत्वेन इदं जानामीत्यत्र तृतीयार्थप्रकारतायाः निरूपितत्वसंबन्धेन इदंपदोत्तरद्वितीयार्थविशेष्यतायामन्वयः । तस्याश्च धात्वर्थे इति स्वीकारात्, रजतत्वप्रकारकारतानिरूपितेदमर्थविशेष्यतानिरूपकज्ञानाश्रयः इति बोधः । एवं च अवच्छेद्यावच्छेदकभावभानं विनैवोपपत्तिरिति ज्ञानद्वयस्थलेऽपि तादृशशब्दोल्लेखी अनुभवः उपपद्यते इति वाच्यम् । तस्मात् चैत्रस्य इत्यत्र षष्ठ्यर्थस्वत्वसंबन्धे, तस्मात् पचतीत्यादौ आख्यातार्थकृतौ, तस्मादिति हेतुपञ्चम्यर्थप्रयोज्यत्वस्यान्वयेऽपि हेतुविभक्त्यर्थातिरिक्तविभक्त्यर्थस्य विभक्त्यन्तरार्थे

अन्वयस्याव्युत्पन्नत्वात् हेतुत्वातिरिक्त–प्रकारतारूप वैशिष्ट्यस्य तृतीयार्थस्य द्वितीयार्थे विशेष्यत्वे अन्वयासंभवेन तादृशशब्दोल्लेखिनः अनुभवस्य अनुपपत्तिर्दुर्वारैव । स्पष्टश्चायमर्थः व्युत्पत्तिवादे द्वितीयाविचारे ।

किंचान्यत्, ज्ञानद्वयमेव समुदितं भ्रमपदवाच्यम् । स्वनिरूपकज्ञानानिरूपितत्व—स्वनिरूपितत्व—उभयसंबन्धेन प्रकारताविशिष्टविशेष्यताशालिज्ञानत्वं भ्रमपदशक्यतावच्छेदकम् । एवं तद्विशेष्यकतत्प्रकारकप्रवृत्तिं प्रति तद्विशेष्यकतत्प्रकारकज्ञानस्य हेतुतया शुक्तौ रजतभ्रमस्थले शुक्तिविशेष्यकरजतत्वप्रकारकप्रवृत्तेरनुरोधेन तत्कारणतया अवश्यापेक्षितं शुक्तिविशेष्यकरजतत्वप्रकारकं ज्ञानमपि निरुक्तज्ञानद्वयमेव । ज्ञानद्वयीयरजतत्वप्रकारत्व–इदमर्थशुक्तिविशेष्यतयोश्च निरूप्यनिरूपकभावात् । नेदं रजतमिति ज्ञानप्रतिबध्यमपि उक्तज्ञानद्वयमेव निरुक्तप्रतिबध्यतावच्छेदकाक्रान्तत्वात् ।

यद्यपि विषयतावच्छेदकतायाः विषयतारूपत्वेन रजतत्वे शुक्तिनिष्ठविषयतावच्छेदकत्वमस्ति । तथाऽपि शुक्ति-

निष्ठविशेष्यतानिरूपकज्ञाननिरूपितत्वं रजतत्वप्रकारतायां नास्ति । तस्मात् रजतत्वं शुक्तिविषयतानिरूपकज्ञानीय-प्रकारतारूपं यदवच्छेदकत्वं तद्भाववत्, इत्येव सर्वं ज्ञानं यथार्थमित्यस्य फलितार्थः । ज्ञानद्वयस्य भ्रमपदवाच्यस्यापि प्रत्येकं यथार्थत्वमेव इति परेषां वर्णनं न समीचीनम् ॥

भ्रमस्थलीयरजतमिति ज्ञाननिरूपितायाः रजतत्वप्रकारतायाः इदमिति ज्ञानीयविशेष्यतानिरूपितप्रकारतात्वासंभवात् । तथाहि—यस्मिन् यस्य वैशिष्ट्यं भासते तस्मिन् स प्रकार इत्युच्यते । अयं घटः इति ज्ञाने घटव्यक्तौ इदमि घटत्वस्य वैशिष्ट्यं भासते । अतः वैशिष्ट्यप्रतियोगि घटत्वं प्रकारः वैशिष्ट्यानुयोगी इदमर्थः विशेष्यः इति चोच्यते । भासमान-वैशिष्ट्यस्य भासमानप्रतियोगित्वानुयोगित्वे प्रकारता—विशेष्यते इति तार्किकसिद्धान्तः । तदंशे प्रकारता च तदनुयोगिक-भासमानवैशिष्ट्यप्रतियोगिता । ज्ञानान्तरीयविषयतायाः ज्ञानान्तरीयविषयतया निरूप्यनिरूपकभावः तार्किकादिभिः स्वीकृतः । द्वित्वनाशकालीना द्वित्वाविषयिणी द्वे द्रव्ये इति बुद्धिः द्वित्वरूपविशेषणज्ञानजन्यत्वात् द्वित्वविशिष्टद्रव्यविषयि-

णीति उदयनाचार्या मन्यन्ते । तत्र द्रव्यविषयताशालिप्रत्यक्ष-निरूपितत्वं द्वित्वविषयतायां नास्ति । परं तु प्रत्यक्षीयद्रव्य-विषयतानिरूपितत्वं कारणीभूतपूर्वकालीनद्वित्वज्ञानीयद्वित्व-विषयतायामेवेति विभिन्नज्ञानीयप्रकारताविशेष्यतयोः निरूप्य-निरूपकभावः स्पष्टः । प्राभाकरमते संज्ञाविशिष्टसंज्ञिज्ञाने संज्ञाया विषयत्वं नाङ्गीक्रियते । परन्तु संज्ञायाः संज्ञिनिष्ठविषयतावच्छेद-कत्वं स्वीक्रियते । उक्तविषयतावच्छेदकता च तादृशविषयता-निरूपितप्रकारतारूपा । सा च प्रकारता तटस्थज्ञानीया न विशिष्टज्ञानीया । एवं निर्वह्निर्ह्रदो वह्निमानिति ज्ञानं निर्वह्नि-ह्रदांशे प्रत्यक्षं वह्न्यंशे स्मरणात्मकमिति पक्षोऽस्ति । अवयव-संस्थानमात्रव्यङ्ग्या जातिरिति निरवयवगुणात्मकज्ञाने जातिः नाङ्गीक्रियते । अतश्च एकस्मिन्नेव ज्ञाने प्रत्यक्षत्व–स्मरणत्वयोः समावेशेऽपि न जातिसांकर्यं दोषः । इत्थं च तज्ज्ञाननिष्ठ-स्मरणत्वनिरूपकवह्निविषयतायाः प्रत्यक्षत्वनिरूपकनिर्वह्नित्व-विशिष्टविशेष्यतानिरूपितत्वमस्ति । अत एव तज्ज्ञानस्य स्वनिरूपितत्व–स्वावच्छेदकविरोधितावच्छेदकधर्मावच्छिन्नत्वोभ-यसंबन्धेन विशेष्यताविशिष्टप्रकारताशालिज्ञानत्वरूपमाहार्यत्व-मव्याहतम्, प्रत्यक्षत्वनिरूपकविशेष्यतानिरूपितत्वस्य स्मरण-त्वनिरूपकवह्निनिष्ठप्रकारतायां सत्त्वात् ।

अथापि निरुक्तस्थलेषु प्रकारतयाभिमतधर्मवैशिष्ट्यं विशेष्यतयाभिमते भासते । प्रथमे द्वित्वस्य द्रव्ये, द्वितीये संज्ञायाः संज्ञिनि, तृतीये वह्नेः निर्वह्नित्वविशिष्टे च वैशिष्ट्यं भासते । अतः द्वित्व–संज्ञा–वह्न्यादिषु भासमान द्रव्यानुयोगिकवैशिष्ट्यप्रतियोगित्व– संज्ञ्यनुयोगिकवैशिष्ट्यप्रतियोगित्व-भासमानह्रदानुयोगिकवैशिष्ट्यप्रतियोगित्वानां सत्त्वात् तेषु ज्ञानान्तरीय विशेष्यतानिरूपित प्रकारता वर्तते । प्रकृते इदं, रजतमिति ज्ञानद्वयान्तर्गते रजतज्ञाने रजतत्वं प्रकारः । तच्च निर्धर्मितावच्छेदकतया भासते । इदमिति ज्ञानीयेदन्त्वावच्छिन्न-विशेष्यताश्रये रजतत्ववैशिष्ट्यं न भासते । अन्यथाख्यात्यापत्तेः यथार्थख्यातिवादासंभवात् । तस्मात् भासमानेदमर्थानुयोगिकवैशिष्ट्यनिरूपितभासमानप्रतियोगित्वस्य रजतत्वे अभावात्, इदमर्थविशेष्यतानिरूपितरजतत्वप्रकारतात्वस्य रजतज्ञानीयप्रकारतायामभावेन भ्रमस्थले प्रवर्तकज्ञाननिर्वाहो न संभवति । अतएव, सर्वज्ञानयाथार्थ्यवादिभिः प्राभाकरैः इदमनुभवरजतस्मरणयोः द्वयोर्ज्ञानयोः स्वीकारेऽपि, स्मरणनिरूपितरजतत्व प्रकारतायाः इदमिति ग्रहणनिरूपितविशेष्यतायाश्च निरूप्यनिरूपकभावो नाभ्युपगम्यते । ज्ञानद्वयस्य भ्रमपदबोध्यत्वे, रजतत्वप्रकारकज्ञानत्वस्य इदं रजतमिति प्रमायाममि सत्त्वेन

भ्रमपदवाच्यतापत्तिः । एककालावच्छिन्नैकात्मवृत्तित्वसंबन्धेन रजतत्वप्रकारकज्ञानविशिष्टेदन्त्वप्रकारकज्ञानत्वस्य स्वात्मक-रजतज्ञानविशिष्टेदंज्ञाने सत्त्वात्, इत्याक्षेपः समुद्भावितः । भ्रमस्थले सर्वत्र ज्ञानभेदः, तत्रैव विभिन्नज्ञानीयप्रकारता-विशेष्यतयोः निरूप्यनिरूपकभावश्च स्वीक्रियते । स्वनिरूपक-ज्ञानानिरूपितत्व–स्वनिरूपितत्वोभयसंबन्धेन प्रकारताविशिष्ट-विशेष्यताशालिबुद्धित्वमनुगतं भ्रमपदशक्यतावच्छेदकमिति न प्रमायां भ्रमपदवाच्यतापत्तिः । ज्ञानभेदाभावात् स्वनिरूपक-ज्ञानानिरूपितत्वघटितोभयसंबन्धेन प्रकारताविशिष्टविशेष्यता-शालिबुद्धित्वस्य इदं रजतमिति प्रमायामभावात्, इति निरुक्ता-क्षेपस्य समाधानं चाभ्यधायि ।

ततश्च ज्ञानद्वित्वं, ज्ञानद्वयीयविषयतयोः निरूप्यनिरू-पकभावं च प्रति भ्रमस्थलीयदोषस्य प्रयोजकत्वं कल्पनीय-मिति गौरवं बोध्यम् ।

एवं, रामानुजीयैरेभिरपि, रजतं पश्यामीत्यनुभवानु-रोधात् अवश्यं स्वीकरणीये रजतचाक्षुषे कारणीभूतस्य रजत-

चक्षुःसंयोगस्य निर्वाहाय, देशान्तरस्थितरजते चक्षुषः संयोगाभावात् पुरोवर्तिनि त्रिवृत्करण–प्रतिनिधिन्यायाभ्यां रजतावयवसद्भावसमर्थनेन रजतत्वं स्वीकृतम् । विभिन्नज्ञानीयविषयतयोः निरूप्यनिरूपकभावोपगमे, इदं रजतमिति भ्रमस्थले, तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालिबुद्धित्वरूपमन्यथाख्यातित्वं स्वीकृतं स्यादिति स्वयमाक्षेपः उद्भावि । अन्यथाख्यातिवादिभिः ज्ञानभेदास्वीकारात् स्वाश्रयाभाववन्निष्ठत्व –स्वनिरूपितत्व—स्वनिरूपकज्ञाननिरूपितत्त्वैतत्त्रितयसंबन्धेन प्रकारताविशिष्टविशेष्यतानिरूपकत्वरूपमन्यथाख्यातित्वं स्वीकृतम् । तच्च नास्माभिः स्वीक्रियते । सर्वत्र भ्रमस्थले ज्ञानभेदाभ्युपगमेन स्वनिरूपकज्ञाननिरूपितत्वात्मकतृतीयसंबन्धस्य विशेष्यतायां विरहादिति आक्षेपसमाधानं वर्णितम् ।

अत्र स्वनिरूपकेत्यादि तृतीयसंबन्धविरहोक्त्या स्वाश्रयाभाववन्निष्ठत्वरूपप्रथमसंबन्धः अनुज्ञात इति जानीमः । पुरोवर्तिनि रजतत्वं स्वीकुर्वतामेतेषां मते, स्वपदग्राह्यप्रकारताश्रयरजतत्वाभावाश्रयनिष्ठत्वं कथमिदंविशेष्यतायां घटते इति चिन्त-

नीयम् । वस्तुतः अन्यथाख्यातित्वं स्वीकृतं स्यादित्याक्षेप-ग्रन्थोऽपि चिन्त्यः इति बोध्यम् ।

एवं रजतत्वप्रकारकज्ञानविशिष्टेदन्त्वप्रकारकज्ञानरूपस्य इदं रजतमिति भ्रमस्य नेदं रजतमिति ज्ञानप्रतिबध्यत्वमुपपद्यते, रजतत्वप्रकारतानिरूपितेदन्त्वावच्छिन्नविशेष्यताशालिबुद्धित्वरूपतत्प्रतिबध्यतावच्छेदकाक्रान्तत्वादिति प्रतिपादनमपि चिन्तनीयमेव । इदमि पुरोवर्तिनि रजतभेदस्य तैरपि वक्तुमशक्यत्वात् नेदं रजतमिति ज्ञानस्य अन्यथाख्यात्यापत्त्या रजतभेदावगाहित्वासंभवात् ।

किं च ज्ञानद्वयस्वीकारे पुरोवर्तिनि रजतस्वीकारो व्यर्थः । अख्यातिमते इव भवद्भिरपि इदमिति रजतमिति, च ज्ञानद्वयमिष्यते । परं तु तन्मते रजतज्ञानं प्रमुष्टतत्ताकस्मरणात्मकम् । भवन्मते तु ग्रहणात्मकम् । इष्टभेदाग्रहः तेषां प्रवर्तकः । भवतां तु सत्यरजतस्थलवत् इदंत्वावच्छिन्नविशेष्यतानिरूपित रजतत्वप्रकारताशालि ज्ञानविशिष्टज्ञानमेव । ज्ञानद्वयीयविषयतयोः भ्रमस्थले निरूप्यनिरूपकभावाङ्गीकारात् । समुदितस्य

ज्ञानद्वयस्य भ्रमपदवाच्यता । प्रत्येकं यथार्थता । अतः सर्वज्ञानानां यथार्थता इति भवदभिमतलाभसंभवात् शुक्तौ रजतावयवसद्भावस्य त्रिवृत्करण–प्रतिनिधिन्यायाभ्यां व्यवस्थापनप्रयासो व्यर्थः संपद्यते । न च रजतं पश्यामीत्यनुभवेन भ्रमस्थलेऽपि रजते लौकिकविषयता आवश्यकी । लौकिकविषयतायां चेन्द्रियसंयोगो हेतुः, इति संनिकर्षसिद्धये पुरोवर्तिनि रजतावयवसद्भावसमर्थनमावश्यकमित्युक्तमिति वाच्यम् । चाक्षषप्रमीयलौकिकविषयतायां इन्द्रियसंयोगस्य, भ्रमीयलौकिकविषयतायां दोषस्य हेतुत्वकल्पनेन सर्वसामञ्जस्यात् । भवन्मते भ्रमस्थले विशिष्टविषयकमेकं ज्ञानं न जायते । किन्तु, परस्परनिरूप्यनिरूपकभावापन्न स्वीयविषयताकं ज्ञानद्वयं दोषात् जायते इति वक्तव्यम् । तत एव दोषात् भ्रमीया साक्षात्वव्यञ्जकविषयतापि सिद्ध्यति इति कल्प्यताम् ।

आवश्यकं च भवतां दोषे लौकिकविषयताप्रयोजकत्वकल्पनम् । कथमन्यथा, स्थाणौ पुरुषभ्रमानन्तरं पुरुष पश्यामीति, नीवारेषु व्रीहिभ्रमानन्तरं व्रीहीन् पश्यामीति चानुभव उपपद्यते । नीवारेषु व्रीह्यवयवस्वीकारेऽपि व्रीहित्वाभावात् तद्व्यञ्जकावयवसंस्थानस्याभावात् । अन्यथा तत्र व्रीहित्व-

सत्त्वे नीवारेषु व्रीहिप्रतिनिधित्वानुपपत्तेः । एवं स्थाणौ प्रतिनिधिन्यायेन पूर्वोक्तरीत्या पुरुषावयवसिद्धावपि पुरुषत्वजातिर्नास्ति । तद्व्यञ्जकावयवसङ्घातविशेषाभावात्, अवयविनः अवयवानतिरिक्तत्वेऽपि अवयवसङ्घातविशेषस्यैवावयवित्वात्, तस्य चाभावात् । तथा च नीवारेषु स्थाणौ च व्रीहित्वपुरुषत्वयोरभावात् चक्षुस्संनिकर्षस्य लौकिकविषयताप्रयोजकस्याभावात् दोषविशेषस्यैव तादृशभ्रमीयव्रीहित्वपुरुषत्वादिलौकिकविषयतायां प्रयोजकत्वकल्पना आवश्यकी। तथा च स्वनिरूपकज्ञानानिरूपितत्व — स्वनिरूपितत्वोभयसंबन्धेन विशेष्यताविशिष्टसाक्षात्कारित्वव्यञ्जकविषयताशालिबुद्धि प्रति दोषस्य हेतुता । स्वनिरूपकज्ञानानिरूपितत्व–स्वनिरूपितत्वोभयसंबन्धेन विशेष्यताविशिष्टान्य साक्षात्कारित्वव्यञ्जकविषयतासंबन्धेन चाक्षुषादिकं प्रति इन्द्रियसंयोगस्य अपरा हेतुता ।

इत्थं च, दोषस्यापि लौकिकविषयताप्रयोजकत्वोपगमेन लौकिकसंनिकर्षं विनापि रजतनिष्ठलौकिकविषयताशालिप्रत्यक्षोपगमे, संयोग–दोषयोरुभयोरेव हेतुत्वे परस्परव्यभिचारवारणायाव्यवहितोत्तरत्वस्य कार्यतावच्छेदके निवेशेन, दोषस्य रजत

भ्रमं प्रति हेतुत्वकल्पनेन च गौरवमिति परास्तम्। ज्ञान-द्वित्वे भिन्नज्ञानीयविषयतयोः निरूप्यनिरूपकभावे च प्रयोजकत्वस्य दोषे अवश्यकल्पनीयतया दोषजन्यतावच्छेदके साक्षात्कारत्वव्यञ्जकविषयताविशेषस्य निवेशेन, भ्रमस्थलीया एका हेतुता, प्रमास्थलीया अपरा इति हेतुताद्वयकल्पनेनैव सामञ्जस्यात्। तस्मात् शुक्तौ रजतावयवसद्भावसमर्थनप्रयासो निरर्थकः इति ध्येयम्।

प्रतिबिम्बभ्रमस्थले 'अनवस्थितेरसंभवाच्च नेतरः' ब्र॰सू॰ इति सूत्रभाष्यस्वरससिद्धः दर्पणे तत्कालानुभाव्य–सत्य–मुखादिप्रतिबिम्बोत्पत्तिपक्षस्तु, शुक्तिरजतवत् दर्पणे मिथ्याभूतं प्रतिबिम्बं जायते इत्यद्वैतविद्याचार्यपक्षसदृशः। परन्तु तस्य सत्यत्वोक्तिरेवारितिच्यते इति ज्ञेयम्।

एतावता जाग्रत्कालिकप्रतीतीनां याथार्थ्यवादः चिन्तितः।

अथेदानीं स्वाप्नप्रतीतीनां याथार्थ्योक्तिश्चिन्त्यते। तत्तत्प्राणिकर्मानुरोधेन तत्तन्मात्रानुभाव्यान् तत्कालावसायिनः सत्यानेव पदार्थान् स्वप्ने भगवान् सृजति। अतः सत्यार्थविषयिणी स्वाप्नप्रतीतिरपि यथार्थेति वदन्ति यथार्थख्यातिवादिनः।

अत्र ब्रूमः—कालदेशविपर्यासादीनां सत्त्वात् स्वाप्नानामर्थानां मिथ्यात्वमेव, न सत्यत्वं घटते ।

ननु भारते रजनीसमयेऽपि भगवता सृष्टाश्चर्यसूर्यकिरणप्रसरात् स्वप्ने दिवसः भवति । देवमनुष्यादिकालोपाधीनां सूक्ष्मतारतम्यस्येव जागरितकालोपाधीनां सूक्ष्मतारतम्यस्येव जागरितकालोपाध्यपेक्षया स्वाप्नकालोपाधीनां सूक्ष्मताकल्पनात् मुहूर्तमात्रस्वप्नेऽपि वर्षपूगातिवाहनं संगच्छते । जागरितदेहविलक्षणत्वात् स्वाप्नदेहस्य क्षणेनैव सुदूरदेशान्तरगमनं ततः प्रत्यागमनं च युज्यते । जाग्रद्देशे मूर्तगजादिमत्स्वपि प्रदेशेषु स्वाप्नमूर्तानामप्यश्वानामवस्थानं संभवति । यथा मूर्तस्य जलस्याधोभागमालोकः प्रविश्य तिष्ठति । आलोकपूर्णे च वियति मूर्तः पवनस्तिष्ठति । तयोर्मूर्तयोरिव जागरितगजस्वाप्नाश्वयोरपि मूर्तयोः परस्परप्रतिघातकत्वं नास्तीति कल्प्यते। स्वाप्नान् सर्वानपि स्वप्नावसाने भगवानुपसंहरति । अतो जागरे स्वप्नोपलब्धा नोपलभ्यन्ते । अथवा स्वाप्नाः स्वाप्नचक्षुरादिनैव गृह्यन्ते इति कल्पनात् न जागरे तेषामुपलम्भः । एवं जागरितदेशकालविपर्ययदोषपरिहारात् स्वाप्नानां सत्यत्वे न काप्यनुपपत्तिरिति चेत् ।

एवं लोकदृष्टविरुद्धानां कल्पनायां किं मूलमिति विचारे, 'बहिष्कुलायादमृतश्चरित्वा' इति श्रुतिः 'अथ रथान् रथयोगान् पथः सृजते' इति श्रुतिश्च मूलमिति वक्तव्यम् । 'स्वे शरीरे यथाकामं विपरिवर्तते' इति श्रुतिविरोधात् बहिष्कुलायश्रुतिः बहिरिव कुलायादिति एतद्देहाभिमानत्यागाभिप्रायिका व्याख्येया । न च स्वाप्नशरीरान्तरमपि स्वीयमेवेति स्वाप्नशरीरान्तरेण बहिः गमनेऽपि 'स्वे शरीरे' इत्यस्य न विरोध इति वक्तव्यम्। तस्य पूर्वशरीरवत् स्वीयत्वमनुक्तिसिद्धमिति स्वीयत्वं न वक्तव्यं भवति । तस्मात् स्वप्ने सदृशस्य विसदृशस्य वा शरीरान्तरस्य परिग्रहदर्शनेऽपि, बहिः सञ्चारदर्शनेऽपि स्वे शरीरे शेते — पूर्वशरीर एव परिवर्तते, नापि बहिः सञ्चरतीति स्वाप्नस्य सर्वस्यापि मिथ्यात्वबोधनेनैव स्वे शरीरे इत्यस्य साफल्यमुपपद्यते ।

एवं, 'अथ रथान् रथयोगान् पथः सृजते' इति स्वाप्नसृष्टिश्रुतिरपि भाक्तैव । यतः 'न तत्र रथा न रथयोगा न पन्थानः' इत्युपक्रान्तम् । तत्र सृजते इति न भवन्ति इति च लडाख्याताभ्यां रथादिसृष्टि–रथाद्यभावादीनां समानकालिकत्वं प्रतीयते । तथाच स्वावच्छेदककालावच्छेदेन स्वाधिकरण-

वृत्त्यन्ताभावप्रतियोगित्वरूपं मिथ्यात्वं लभ्यते । 'अथ रथान्' इत्यत्राथशब्दः नानन्तर्यार्थकः । अपि तु अथापीत्येवमर्थकः । तथाच उपक्रमपर्यालोचनायां स्वाप्नार्थानां मिथ्यात्वमेव स्पष्टं प्रतीयते । अतः सृष्टिश्रुतिः न स्वार्थपरा । इयं रथादिसृष्टिः प्राज्ञकर्तृकत्वात् वियदादिसृष्टिवत् पारमार्थिकी इत्यपि न मन्तव्यम् । 'स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति ।' (बृ. 6-3-9) इति जीवस्य निर्माणव्यापाराभिधानात् । स्वयं—आत्मा जाग्रद्देहं विहत्य—निश्चेष्टमापाद्य देहव्यापारो हि आत्मभोगार्थः, भोगार्थं कर्मणां कर्ता आत्मा । जाग्रद्भोगप्रदकर्मणामुपरमे स्वप्नकाले देहपातात् आत्मा देहविहन्ता इत्युच्यते । स्वयं निर्माय—स्वप्नदेहमदृष्टद्वारा निर्माय स्वेन भासा—वासनाजन्यज्ञानयुक्तः स्वेन ज्योतिषा—वासनाजन्यज्ञानसाक्षिभूतचित्प्रकाशेन, इत्थंभूतलक्षणे तृतीया । प्रस्वपिति—वासनामयीः वृत्तीः पश्यन्नास्ते इति निष्कृष्टः श्रुत्यर्थो बोध्यः । सुप्तः पुरुषः रथादीन् सृजति । स्वाप्नरथादिदर्शनेन मोदादिदर्शनात् तद्धेतुसुकृतादिकर्तृत्वात् तस्य

निमित्तत्वं 'स हि कर्ता' इति श्रुत्या बोध्यते । न तु स्वसंकल्प-पूर्वकं स्वाप्नान् सुप्तः पुरुषः सृजति । अनिष्टस्य स्वप्ने दर्शनेन तत्स्रष्टृत्वानुपपत्तेः ।

एवं, 'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः' इति काठकश्रुतौ यः, एषः इति शब्दाभ्यां प्रसिद्धवदनुवादात् कामानां निर्माता जीवः इति ज्ञायते । अन्ते 'तदेव शुक्रं तद्ब्रह्म' इति वाक्येन जीवमनूद्य शुद्धं जीवस्वरूपं ब्रह्माभेदेनोपदिशति तत्त्वमसीति श्रुतिरिव । अतश्च ब्रह्मप्रकरणस्य न विरोधोऽस्ति । स्वप्नेऽपि अन्तर्यामितया सर्वाधिष्ठातृतया प्राज्ञव्यापारो न निवार्यते । तथाच भगवत्पादभाष्यम्—"नचास्माभिः स्वप्नेऽपि प्राज्ञव्यवहारः प्रतिषिध्यते । तस्य सर्वेश्वरत्वात् सर्वास्ववस्थासु अधिष्ठातृत्वोपपत्तेः । पारमार्थिकस्तु नायं सन्ध्याश्रयः सर्गः वियदादिसर्गवत् इत्येतावत् प्रतिपाद्यते ।" इति ।

अपि च, जागरावस्थायां आदित्यादिज्योतिरन्तरसंभेदात् आत्मनः स्वयंज्योतिष्ट्वं दुर्विवेचनमिति उपनिषदि स्वप्नावस्था अवतारिता । तत्रापि सृष्ट्यादिश्रुतेः स्वार्थे तात्पर्योपगमेन यदि सत्या सृष्टिरङ्गीक्रियते, तदा जागरे इव आदित्यादिज्योति-

रन्तरसंभेदावश्यकतया स्वयंज्योतिष्ट्वं दुर्विवेचनं स्यात् । अतः प्रधानविरोधात् सृष्ट्यादिश्रुतेः न स्वार्थे तात्पर्यमिति स्वीकरणीयम्। तस्मान्न स्वाप्नाः सत्याः, किन्तु अनिर्वचनीयाःमायामया एव । इयं च रीतिः मीमांसकैरादृता । तथाहि– स्वर्गार्थंज्योतिष्टोम-विधानप्रकरणे, यागशालायां वातायनविधानार्थवादः 'को हि तद्वेद यद्यमुष्मिन् लोकेऽस्ति वा न वेति ।' इति श्रूयते । अत्र प्रथमार्थे सप्तमी । स्वर्गलोकः अप्रामाणिकः इति स्वार्थे तात्पर्योपगमे स्वर्गार्थयागविधानरूपप्रधानविरोधो भवति । अतः तादृशवचनस्य न स्वार्थे तात्पर्यमित्यवधारितं मीमांसकैः ।

किं च, स्वप्ने महासेनायां गजतुरगोष्ट्रवृषभभटाः पारे-परार्धं चेतना दृश्यन्ते । एवमेकैकस्य स्वप्नं निर्वोढुं कियन्त-श्चेतनाः कुतः समानीय परमेश्वरेणापि मेलनीयाः । न हि स्वप्ननिर्वाहार्थमेव तेन क्वचित् केचन चेतनाः पृथक् निवेशिताः सन्ति । चेतनांशे स्वप्नज्ञानानामयथार्थत्वे अचेतनांशेऽपि तथैवास्तु । किमर्धजरतीयेन ।

एवं प्रबोधे, आरुक्षमिव शैलाग्रम्, आविविक्षमिव काननमित्यादिकः स्वाप्नविषयकानुभवोऽस्ति । तेनापि स्वप्न-ज्ञानस्य भ्रमत्वं प्रतीयते । मिथ्यात्वद्योतकेवकारानुविद्धवाक्यो-

ल्लेखित्वात्, दूरे तिष्ठन् देवदत्त इवाभातीत्यादौ भ्रमस्यैव विषयीकरणात्। इदं लोकानुभवसिद्धं स्वप्नज्ञानभ्रमत्वमनुवदति "उतेव स्त्रीभिः सह मोदमानः जक्षदुतेवापि भयानि पश्यन्।" इति इवकारानुबद्धा श्रुतिः। तस्मात् देशकालादिविपर्ययेण स्वाप्नार्थाः मिथ्याभूता एव।

तदेतत्सर्वमभिप्रेत्य बादरायणः स्वाप्नं वस्तुजातं मायामात्रमिति निरूपयति 'मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्' (ब्र. सू. 3-2-3) इति सूत्रेण। मायाशब्दो मिथ्यार्थवाची।

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि।
तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः॥

इति भागवतस्मृतेः। मायाशब्दस्य मिथ्यार्थकत्वादेव मात्रशब्दोऽपि स्वारसिको भवति।

यत्तु मायाशब्दः आश्चर्यबोधकः। स्वाप्नसृष्टिराश्चर्यभूता। सा सत्यसंकल्पेन परमेश्वरेणैव संकल्पमात्रात् कर्तुं शक्यते, न जीवेन। प्रजापतिविद्यास्थवाक्योदितस्य जीवगतसत्यसंकल्पत्वस्यासंसारं तिरोधानात् इति सूत्रतात्पर्यमिति।

तत्र स्वाप्नस्याश्चर्यत्वं किंरूपमिति वक्तव्यम् । जाग्रत्पुरुषाननुभाव्यत्वं नाश्चर्यत्वम् । जाग्रत्पदार्थानामपि स्वप्नदृगननुभाव्यत्वेनाविशेषात् । नापि जाग्रत्कालिककार्याक्षमत्वम्, जाग्रदर्थानामपि स्वप्नद्रष्टरि स्वकार्यजनकत्वाभावस्याविशिष्टत्वात् । नापि, यथा जाग्रदर्थाः अन्येन जाग्रत्पुरुषेण दर्शनयोग्या भवन्ति, न तथा स्वाप्नार्थाः अन्यस्वप्नदृशः दर्शनयोग्या भवन्ति, इति जागरितवैलक्षण्यमेवाश्चर्यरूपत्वमिति शङ्कनीयम् । बहूनां स्वप्नसंवादे अन्यस्वप्नदृग्दर्शनयोग्यत्वस्य स्वाप्नार्थेऽपि संभवात् । नापि वस्तुतः रथादिमति देशे तदप्रतिघातेन स्वाप्नगजादीनामवस्थानमाश्चर्यरूपत्वम् । जागरितरथादीनामपि स्वाप्नगजाविरोधेनावस्थानस्याविशेषात् । किंतु, रथोऽयमिति कदाचित् स्वप्ने निर्धारितः क्षणेन मनुष्यः संपद्यते । मनुष्योऽयमिति निर्धारितः क्षणेन वृक्षः संपद्यते । एवमेकस्य वस्तुनः परस्परविसदृशानेकभ्रमविषयत्वसमावेशास्पदत्वमाश्चर्यरूपत्वमित्यङ्गीकारे, स्वाप्नार्थानामसत्यत्वेनैवाश्चर्यरूपत्वमुपपादितं भवति ।

एवं, स्वाप्नार्थानां सत्यत्वे दण्डाभावेऽपि स्वाप्नघटोत्पत्त्या व्यभिचारवारणाय, दण्डान्यवहितोत्तरत्वं दण्डकार्यतावच्छेदके

निवेशितं भवद्भिः । एवमेव वह्निं विनापि स्वाप्नस्य धूमस्य, तन्तुं विनापि स्वाप्नस्य पटस्योत्पत्त्या च व्यभिचारः । किं बहुना, जागरे येन येन यद्यत्कार्यं जायते, स्वप्ने तस्य सर्वस्यापि जाग्रत्कालिकं तत्कारणं विनापि जायमानत्वात् सर्वत्र कार्यकारणभावे व्यतिरेकव्यभिचारस्य निष्प्रत्यूहतया तत्तदव्यवहितोत्तरत्वस्य सर्वत्र कार्यतावच्छेदके निवेशनीयतया अनन्तकारणताकल्पनया महागौरवम् ।

एवं धूमे वह्निव्याप्यत्वं न स्यात्, स्वप्ने वह्न्यभाववति हृदादौ धूमदर्शनसंभवेन धूमस्य सत्त्वात् । न च धूमत्वं व्याप्यतावच्छेदकधर्मः । व्याप्यतावच्छेदकसंबन्धः न संयोगसामान्यम् । किं तु वह्निमदनुयोगिकसंयोगः । निर्वह्नौ च तादृशसंबन्धेन धूमाभावान्न दोष इति वाच्यम् । निर्वह्नौ वह्निमदनुयोगिकसंयोगेनापि धूमस्य स्वप्ने भानसंभवेन तेन संबन्धेन धूमसत्त्वात् वह्निव्याप्यत्वानुपपत्तेः तदवस्थत्वात् । न हि स्वप्ने कस्य चिदभानं संभाव्यते ।

एवमेव स्वप्ने सदसद्विलक्षणत्वस्य दर्शनसंभवात् स्वाप्नसृष्टेरङ्गीकारेण सदसद्विलक्षणत्वविशिष्टस्य स्वाप्नस्य प्रसिद्धेः सुलभत्वात्, स्वाप्नसत्यत्वाङ्गीकर्तॄणां सर्वज्ञानयाथार्थ्यवादिनां

शतदूषण्यादौ मिथ्यात्वानुमाने सदसद्विलक्षणत्वरूपसाध्याप्रसिद्धिदोषोद्भावनमसंगतमेव । जाग्रति अत्यन्तासंभावितस्य स्वशिरश्छेदनदर्शनादेः प्रदर्शके स्वप्ने सदसद्विलक्षणत्वदर्शनमसंभावितमिति न केनापि निरूपयितुं शक्यते ।

वस्तुतस्तु, मिथ्यात्वानुमाने साध्यतयोक्तं सदसद्विलक्षणत्वं बाध्यत्व–सत्तादात्म्योभयपर्यवसितं शुक्तिरूप्यादौ प्रसिद्धमस्ति । पराक्रान्तं चात्र पूर्वाचार्यैरित्यनुसंधेयम् । तस्मात् स्वाप्नार्थानां सत्यत्वाभावात् तत्प्रतीतिः न यथार्था भवितुमर्हतीति सिद्धम् ।

एवं, भ्रमस्थले सर्वत्र भ्रमविषयोऽर्थः सत्यः भगवता सृज्यते । स च भ्रान्तपुरुषमात्रानुभाव्यः यावत्प्रतिभासमनुवर्तते । शुक्तितत्त्वज्ञाने जाते निवर्तते । अथवा स्वसृष्टं रजतादिकं भगवानुपसंहरति, इति पक्षः, 'अथवा' इत्यादिना भाष्योक्तः न साधुः ।

शुक्तिरूप्यस्य भ्रमविषयस्य सत्यस्येश्वरसृष्टत्वे, सर्वज्ञे भगवति तज्ज्ञानावश्यकत्वेन भ्रान्तत्वापत्तेर्दुर्वारत्वात् । न च स्वनिरूपकज्ञानानिरूपितत्वस्वनिरूपितत्वोभयसंबन्धेन प्रकार-

ताविशिष्टविशेष्यतानिरूपकबुद्धित्वरूपं भ्रमपदशक्यतावच्छेदकं ज्ञानद्वये एव वर्तते। भ्रमविषयज्ञातर्यपीश्वरे ज्ञानद्वयस्याकल्पनान्नेश्वरस्य भ्रान्तत्वम्। विद्यमानसर्वविषयिण्यामीश्वरेच्छायां तीरे गङ्गापदजन्यबोधविषयत्वस्य प्रकारतया भानस्यावश्यकत्वेऽपि, तीरं गङ्गापदवाच्यमिति व्यवहाराभावानुरोधेन, विषयतात्वरूपेण गङ्गापदजन्यबोधविषयत्वं तीरे विशेषणतया अवगाह्यमाना 'विषयता गङ्गापदजन्यबोधीया भवतु' इत्याकारिका ईश्वरेच्छा कल्प्यते नैयायिकैः। तद्वदेव भ्रमविषयज्ञातर्यपीश्वरे भ्रान्तत्वव्यवहाराभावानुरोधेन भ्रमपदवाच्यज्ञानद्वयवत्त्वं न कल्प्यते इति वाच्यम्। तथापि तादृशज्ञानद्वयात्मकभ्रमवानीश्वरः इति कस्य चित् भ्रमसंभवेन तादृशभ्रमस्य ईश्वरे सृष्टेरावश्यकत्वेन भ्रान्तत्वापत्तेर्दुर्वारत्वात्।

एवं, ईश्वरे हेयगुणाः सन्ति इति कस्यचित् भ्रमे, हेयगुणानामपि भगवति सृष्टेरावश्यकतया भगवतः हेयगुणवत्त्वप्रसङ्गश्च। न च भ्रमविषयपदार्थसामान्यस्यैव सृष्टिस्वीकारेण, तत्र भ्रम—हेयगुणादिविशिष्टब्रह्मणः सृष्टिः स्वीक्रियते। तावतापि अनाद्यनन्तभूते पुरुषोत्तमे भ्रान्तत्वादिकं न संभवतीति वाच्यम्। अनाद्यनन्तभूतः पुरुषोत्तमः ज्ञान-

द्वयात्मकभ्रमवान्, हेयगुणवानिति कस्य चित् भ्रमसंभवेन तद्विषय भ्रम–हेयगुणादिमत्त्वस्यापत्तेर्दुर्वारत्वात् ।

वस्तुतः, यावत् शुक्तितत्त्वाज्ञानं रजतं भासते । तावत्कालमेव वर्तते । भ्रान्तपुरुषेणैवानुभूयते । शुक्तितत्त्वज्ञाने जाते निवर्तते इत्यभिधानं, भ्रमविषयस्य रजतस्य प्रतिभासमात्रशरीरत्वेन प्रातिभासिकतां शुक्तितत्त्वज्ञाननिवर्त्यतां च गोचरयति । परं तु तस्येश्वरसृष्टत्वेन परमार्थसत्यत्वाभिनिवेशोऽधिकः । समानमन्यत्, सिद्धान्तेऽपि शुक्तिरजतादिभ्रमस्थले सर्वान्तर्यामिणो भगवतः अधिष्ठातृत्वस्वीकारात् ।

अपि च विनेयानां दुःखोपधायकमिथ्याज्ञानापनोदनाय तत्त्वज्ञानमुत्पादयितुं उपदेशान् कुर्वन्ति महान्तः । सर्वज्ञानयाथार्थ्ये स्वीकृते, निरसनीयमिथ्याज्ञानस्याभावादुपदेशानां सर्वेषां निरर्थकतैवापद्यते । अतस्मिन् तद्बुद्धिरूपभ्रान्तेः स्वीकारे एव,

१ शुक्तितत्त्वज्ञानानन्तरं, शुक्तिशकलमेव मया रजततया गृहीतमिति अनुभवः,

२ 'योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ।' इति स्मृतिः,
३ 'अयथावद्विजानाति बुद्धिः सा पार्थ राजसी' इति भगवद्गीता,
४ 'तदेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम्' इति विष्णुपुराणं,
५ 'अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः' इत्याद्यभियुक्तोक्तिश्च स्वारसिकतया संगच्छन्ते ।

अत एव, रामानुजीयाः केचित्, सर्वज्ञानयाथार्थ्यनिरूपणात् पूर्वं निरूपिता अन्यथाख्यातिरेव श्रीभाष्यकाराभिमता इत्यपि वदन्ति ।

तत्सिद्धं रामानुजीयानां यथार्थख्यातिवादः न समीचीनपद्धतिमध्यास्ते इति शिवम् ।

इति यथार्थख्यातिसमालोचनं नाम पञ्चमोल्लासः

षष्ठोल्लासः

नव्यवैयाकरणाः श्रीनागेशभट्टाः बुद्धिसिद्धमर्थमभ्युपगच्छन्तः भ्रमस्थले अनिर्वचनीयोत्पत्तिं निराकृत्य सदसत्ख्यातिं सांख्यसूत्रानुसारिणीं व्यवस्थापयन्ति । तथाहि—घटादिपदानां बुद्धिसत्ताविशिष्ट एवार्थः । न बाह्यसत्ताविशिष्टः । तथासति घटोऽस्ति इति प्रयोगानुपपत्तेः । घटः इत्यनेनैव सत्ताया अवगमेनावगतार्थत्वात् अस्तीति प्रयोगानुपपत्तिः, उक्तार्थानामप्रयोगः इति न्यायात् । एवं घटो नास्तीति प्रयोगोऽपि न स्यात्, बाह्यसत्तावति घटे बाह्यसत्ताविरहस्य बाधात् । बौद्धार्थस्वीकारे तु घटपदबोध्यस्य बुद्धिसतो घटस्य बाह्यसत्ताया बोधनाय आद्ये अस्तिपदप्रयोगः । द्वितीये बुद्धिसतो घटस्य बाह्यसत्ताभावबोधनाय नास्तिपदस्य प्रयोग उपपद्यते ।

एवं बौद्धार्थास्वीकारे, शशशृङ्गं नास्ति, अङ्कुरो जायते इत्यादिवाक्यात् बोधो न स्यात् । बाह्यस्य शशशृङ्गस्याभावेन तत्र सत्ताभावबोधासंभवात् । बुद्धिसिद्धस्याङ्गीकारे, तादृशस्य शशशृङ्गपदबोध्यस्य बाह्यसत्ताभावो बोधयितुं शक्यते । उत्पद्यमानस्याङ्कुरस्य बाह्यस्य जनेः पूर्वमसत्त्वेन

अङ्कुरो जायते इति वाक्यात् बाह्याङ्कुरे जनिकर्तृत्वबोधो न स्यात् । बुद्धिसिध्दस्य तु पूर्वभावित्वेन कर्तृत्वमुपपद्यते । एवं, बौध्दार्थास्वीकारे शशशृङ्गादिपदस्य बाह्यार्थाभावेनार्थवत्त्वाभावात् प्रातिपदिकसंज्ञा न स्यादिति तत्पदोत्तरं सुबुत्पत्तिर्न स्यात् । नल-रावणादिपदात् बोधनिर्वाहायापि बौद्धार्थः स्वीकरणीयः । अनुगतावयवसंस्थानव्यङ्ग्यायाः नलत्वजातेः घटत्वादिजातेरिवाज्ञानात् तदवच्छिन्ने नलादिपदशक्तिग्रहासंभवात् । बौद्धार्थस्वीकारे तु नलगुणादिश्रवणात् सामान्यतो बुध्दौ गृहीताकारे शक्तिग्रहसंभवेन बोधोपपत्तिः । अपि च इच्छां प्रति विषयस्य कारणत्वात् इच्छाविषययोः सामानाधिकरण्यं वाच्यम् । समानाधिकरणयोरेव कार्यकारणभावस्वीकारात् । इच्छाया बुध्दिनिष्ठत्वात् विषयस्यापि बुध्दिनिष्ठत्वमावश्यकमिति बौध्दार्थः स्वीकरणीयः ।

बुद्धिसिद्धोऽर्थः न्यायसूत्रकर्तुः गोतमस्यापि संमतः । चतुर्थाध्याये फलपरीक्षायां, 'उत्पादव्ययदर्शनात्' इति सूत्रे असत्कार्यवादमुपपाद्य, उत्पत्तेः प्रागसतः कार्यस्य 'जायते' इत्यादिना बोध्यमानं उत्पत्तिकर्तृत्वं कथमित्याशङ्कायाः, 'बुद्धि-

सिद्धं तु तदसत्' इति सूत्रेण समाधानमभिहितम् । सूत्रे तु-शब्दः अप्यर्थः । उत्पत्तेः पूर्वं नाशादूर्ध्वं चासदपि तत् बुध्दिविषयतया सिद्धमिति सूत्रार्थो बोध्यः । तथा च न्याय-दर्शनसंमतः बौद्धार्थः ।

एवं, श्रीवाचस्पतिमिश्रा अपि बौध्दमर्थं निरूपयन्ति । "चेतनो हि नामरूपे बुध्दावालिख्य घट इति नाम्ना कम्बु-ग्रीवादिना रूपेण च बाह्यं घटं निष्पादयति । निर्वर्त्यस्यापि घटस्य अन्तःसंकल्पात्मना सिद्धस्य कर्मकारकत्वं घटं करो-तीति । तथाहुः 'बुद्धिसिध्दं तु तदसत्' इति ।" इति भामती ।

इदं रजतमिति भ्रमस्थले बुध्दिसिद्धं (बौद्धं) रजतं पुरोवर्तिनि इदमि गृह्यते । तथाहि—अन्तः-करणस्य वृत्तिः चक्षुर्द्वारा बहिर्निर्गच्छति । सा सावयवा द्रव्यरूपा रजतसंस्कारवती च । पुरोऽवस्थितपदार्थसंबन्धे सति तद्वतचाकचक्यादिदोषात् रजतसंस्कारोद्बोधे च सति, तादृश-संस्कारवशात् रजतसंबन्धाभावेऽपि पुरोवर्तिविषयावच्छेदेन रज-ताकारतया परिणमते । सा वृत्तिः संनिकृष्टं रजताकारपरिणाम-मादाय रजताकारविशिष्टेदमाकारा भवति । इयमेवान्तः-

करणवृत्तिः भ्रम इत्युच्यते । नीलपृष्ठत्वादिविशेषदर्शनाहि-तस्य नेदं रजतमिति बाधज्ञानस्योदये, पूर्वतनवृत्तेः भ्रमत्वं ज्ञायते । भ्रमत्वज्ञापकत्वमेव बाधकत्वं, नान्यादृशम् । तथाच चित्तवृत्तिपरिणामरूपस्य बहिरसतः बौध्दस्य रजतस्य विषये आरोपः । इदं रजतमिति भ्रमे आपणस्थस्य सत एवानुभूतस्य रजतस्य पुरोवर्तिनि आरोपः इति नैयायिकमतं तु न युक्तम् । अनुभूतेन रजतेन तदानीमिन्द्रियसंनिकर्षविर-हात् । ज्ञानलक्षणसंनिकर्षेण तादृशरजतभानमित्यप्यसंगतम्, ज्ञानस्य तदानीमविद्यमानत्वेन संबन्धत्वासंभवात् । न च ज्ञानविषयत्वमेव संबन्धः, ज्ञाननाशेऽपि ज्ञानविषयता रजते वर्तते इति वाच्यम् । विषयता हि न ज्ञानरूपा, घटपटौ इति यथार्थज्ञानस्य घटत्वप्रकारतानिरूपितपटनिष्ठविशेष्यताशालि-त्वेन भ्रमत्वापत्तेः । घटनिष्ठविशेष्यतायाः तज्ज्ञानीयपट-निष्ठविशेष्यतारूपत्वात् उभयोरपि एकज्ञानरूपत्वात् । विषय-ताया विषयस्वरूपत्वे च घट-भूतल—संयोगाः इति ज्ञानस्य घटवद्भूतलमिति ज्ञानस्य च वैलक्षण्यं न स्यात्, ज्ञान-द्वयविषयाणामभेदेन विषयताभेदाभावात् । ज्ञानविषयोभय-रूपा विषयता इत्युक्तौ, ज्ञाननाशे उभयात्मकविषयताया

असंभवः । ज्ञान–विषयातिरिक्ता विषयता इत्यङ्गीकारे च गौरवं दोषः । तथाच रजतसंस्कार एव प्रत्यासत्तिरिति वाच्यम् । तथासति रजतसंस्कारत्वाः चित्तवृत्तेः रजताकारः परिणामः इति पूर्वोक्तार्थे एव पर्यवसानं भवति । भ्रमे आरोप्यमाणं रजतं न बहिरस्ति । अतः असदित्युच्यते । असतः भ्रमे भानं चाभिहितम् 'स्त्रियाम्' इति सूत्रे महाभाष्ये–"कथं पुनरसल्लिङ्गं द्रष्टुं शक्यम् ? मृगतृष्णावत् । तद्यथा—मृगा:तृषिताः अपां धाराः पश्यन्ति । न च ताः सन्ति । यथा गन्धर्वनगराणि दूरतो दृश्यन्ते, उपसृत्य च नोपलभ्यन्ते ।" इति । अत्र स्पष्टमेव बहिर्देशे असत एव भ्रमे भानमुक्तम् ।

हरिरप्याह–– 'यथा सलिलनिर्भासः मृगतृष्णासु जायते ।
जलोपलब्ध्यनुगुणात् बीजाद्बुध्दिर्जलेऽसति ॥'

इति । अत्र बीजशब्देन पूर्वपूर्वमिथ्याज्ञानजन्यवासनोक्तेति तद्व्याख्यातारो वदन्ति ।

नेदं रजतमिति बाधज्ञानोदयपर्यन्तं रजतं सत्वेन प्रतीयते । तच्च सत्वमधिष्ठानीभूतपुरोवर्तिगतम् । तस्यारोपो रजते। इत्थं च आरोपितं सत्वं अनारोपितं बहिरसत्वम् । अत एव

सत्वासत्वयोः समावेशः। अनारोपितयोः सत्वासत्वयोः विरोधेन समावेशासंभवात्। तस्मात् सदसत्ख्यातिः इदं रजतमित्यध्यासः। तदुक्तं सांख्यसूत्रे–'सदसत्ख्यातिर्बाधाबाधाभ्याम्' (5-) इति। विशेषदर्शनेन बाधात्पूर्वमारोपितं सत्वम्। प्रपञ्चोऽप्येवमेव। मृगतृष्णादिदृष्टान्तेन प्रपञ्चस्य शास्त्रे वर्णनात्। तदुक्तं परमार्थसारे शेषनागेन—

'मृगतृष्णायामुदकं, शुक्तौ रजतं, भुजङ्गमो रज्ज्वाम्।
तैमिरिकचन्द्रयुगवत् भ्रान्तमखिलं जगद्रूपम्॥' इति।

अत्र श्लोके भ्रान्तमित्यस्य भ्रमविषय इत्यर्थः।

व्यासाचार्याः 'मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्' इति सूत्रेण स्वप्नप्रपञ्चस्य मायामात्रत्वं न जाग्रत्प्रपञ्चतुल्यत्वमिति निरूपयन्ति। यद्यपि जाग्रत्प्रपञ्चस्यापि मायामात्रत्वं 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इति सूत्रेणोक्तम्। तथापि ब्रह्मात्मदर्शनात् प्राक् वियदादिप्रपञ्चो व्यवस्थितः। स्वाप्नस्तु प्रतिदिनं बाध्यते इति विशेषः। भ्रम एवाविद्यापदेन व्यपदेश्यः। सूक्ष्मा, स्थूला चेति अविद्या द्विविधा। पूर्वपूर्वभ्रमजन्यसंस्कारः भ्रमहेतुवासना सूक्ष्मा। तज्जन्या भ्रमरूपा स्थूला। भ्रमवासनातिरिक्ता दृष्टायमाना अविद्या नास्त्येव प्रमाणाभावात्।

असदर्थप्रकाशनं माया—

'ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः ॥ इति भागवतोक्तेः । यत् विनाप्यर्थमात्मन्यधिष्ठाने प्रतीयते, यच्चात्मरूपे न प्रतीयते, तत् प्रत्ययाप्रत्ययरूपं आत्मनो मायां विद्यात् । यथा आभासः द्विचन्द्रादिः, यथाच तमः राहुः ग्रहमण्डले सन्नपि न प्रतीयते इत्यर्थः । असदर्थप्रकाशनस्य मायात्वादेवमेव युक्तम् ।

मायामात्रमिति मात्रपदेन अनिर्वचनीयोत्पत्तिवादमपि निराकरोति सूत्रकारः । न च 'न तत्र रथा न पन्थानो भवन्ति, अथ रथान् रथयोगान् पथः सृजते ।' इति श्रुत्या स्वाप्नरथादीनामनिर्वचनीयानां सृष्टिनिरूपणात् तद्विरोध इति वाच्यम् । तत्र श्रुतौ उपक्रमे रथाद्यभावः श्रुतः । अथेत्यादिना चरमं रथादिसृष्टिरभिहिता । उपक्रमानुरोधाच्च चरमश्रुतं सृष्टिवचनं भाक्तमिति भाष्यकारैरुक्तत्वात् न तया श्रुत्या रथादिसृष्टिः सिद्ध्यति । किंच, 'नास्य रथादिग्रहणाय चक्षुरादयः सन्ति, रथादिनिर्वर्तने वा कुतो निमेषमात्रेण सामर्थ्यम्, दारूणि च न सन्ति,

तस्मान्मायामात्रं स्वप्नदर्शनम् ।' इति भाष्ये, स्वप्ने रथाद्युत्पादकसामग्रीविरहात् रथादीनामनुत्पत्तिरुक्ता । तेन स्वाप्नतुल्यानां शुक्तिरजतभ्रमविषयाणामपि उत्पत्तिर्नास्तीति सूचितम् । रजतोत्पादकानां रजतावयवानामभावेन सामग्रीविरहस्य तुल्यत्वात् ।

यत्तु, अनिर्वचनीयं सदसद्विलक्षणं जलादि मरुमरीचिकादिषु जायते । एवं ब्रह्मणि जाग्रत्प्रपञ्चः स्वाप्नप्रपञ्चश्चेत्युक्तम् । तन्न युज्यते । यतः सत्वमसत्वं चेति परस्परविरुद्धौ धर्मौ । 'परस्परविरोधे हि न प्रकारान्तरस्थितिः ।' इति न्यायेन सद्विलक्षणत्वे असत्वमापतति । असद्विलक्षणत्वे च सत्वमापतीति, सदसद्विलक्षणमिति वचनेन सत्वासत्वरूपधर्मद्वयवत्त्वेन सदसद्रूपमित्यायाति । तत्रापि अनारोपितयोः सत्वासत्वयोर्विरोधात् एकस्य सत्वस्यारोपितत्वं स्वीक्रियते । यथा गुणगुणिनोः स्थितयोः भेदाभेदयोः, भेदस्यारोपितत्वात् विरोधपरिहारेण भेदाभेदयोः समावेश इष्यते । तथैवात्रापि सदसद्रूपे सत्वमारोपितमिति स्वीकारात् सत्वासत्वयोरविरोधः इत्यस्मद्रीतिरेव साधीयसी । अपि च सत्वासत्वरूपधर्मद्वयानाक्रान्तः न कोऽपि दृश्यते । येन तद्दृष्टान्तेन सदसद्विलक्षणपदार्थः स्वीकर्तुं शक्यते । अपि च, भ्रमस्थले अनिर्वचनीयोत्पत्तिवादिभिः

लोकप्रसिद्धरजतसामग्रीव्यतिरेकेऽपि यया दोष–संस्कारादिघटितया विलक्षणसामग्र्या रजतस्योत्पत्तिः स्वीक्रियते, तयैव सामग्र्या विषयस्यासत्वेऽपि इन्द्रियविषयासंसर्गेऽपि रजतज्ञानं जायते इति स्वीक्रियतां बाधकाभावात् । तथाच ज्ञानविषयस्य रजतादेरुत्पत्तिर्न कल्पनीया । किंच भ्रमस्थले अनिर्वचनीयस्योत्पत्तौ, शुक्तिशकले इदं रजतमिति ज्ञानस्य मिथ्याज्ञानत्वमेव न स्यात् । विशेष्यावृत्तिधर्मप्रकारकज्ञानत्वमेव मिथ्याज्ञानत्वम् । रजतव्यक्तेरुत्पत्तौ भ्रमे भासमानरजते रजतत्वस्य तदाश्रयत्वस्य च सत्वेन विशेष्यावृत्तिधर्मपदेन रजतत्वस्योपादानासंभवात् । इदमेव मिथ्याज्ञानलक्षणमुक्तं पतञ्जलिना 'विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्' इति योगसूत्रे । "विपर्यय इति लक्ष्यं, मिथ्याज्ञानमिति लक्षणम् । तद्विवरणमतद्रूपेति । तद्रूपप्रतिष्ठत्वाभाववत्–यत् ज्ञानप्रतिभासि रूपं रजतत्वादि तदाश्रयत्वाभाववद्विशेष्यकमित्यर्थः ।" इति मिश्राः । वेदान्तसूत्रकारस्यापि इदमेव मिथ्याज्ञानमभिप्रेतम् । अन्यादृशलक्षणस्य वेदान्तसूत्रेऽनभिधानात् । तस्मात् भ्रमत्वनिर्वाहायापि अनिर्वचनीयोत्पत्तिविरहः स्वीकर्तुमुचितः ।

अनिर्वचनीयोत्पत्तिवादिभिः ब्रह्मणि अनिर्वचनीयस्य प्रपञ्चस्योत्पत्त्यङ्गीकारात् ब्रह्मणो विकारित्वं स्यात् । अपि च,

भ्रमविषयरजतादेः, मिथ्यात्वं स्वसमानाधिकरण–अवच्छिन्न-वृत्तिकान्यात्यन्ताभावप्रतियोगित्वरूपमभिहितम् । तथाचा-सत्त्वमेव स्वीकृतं भवति । अभावपदस्य भावविरोधी अर्थः । तत्पदघटकनञः अधर्मपदघटकस्येव विरोध्यर्थकत्वात् । तादृ-शस्य चाभावस्य स्वपदग्राह्यप्रतियोगिसामानाधिकरण्यं न घटते । प्रतियोग्यसमानाधिकरण्यस्यैव विरोधपदार्थत्वात् । तस्मात् भ्रमविषयस्य रजतस्यासत्त्वमेव स्वीकृतं भवति । मम तु मते स्वप्रतिभाससमानाधिकरणाभावप्रतियोगित्वमेव मिथ्यात्वमिति ज्ञेयम् । किं च, अनिर्वचनीयस्य रजतस्योत्पादे, अधिष्ठान-तत्त्वज्ञानेन तस्य नाशो वाच्यः । अन्यथा तत्त्वज्ञानोत्पादा-नन्तरमपि रजतप्रत्ययापत्तेः । न हि वस्तुनः ज्ञानेन नाशो दृष्टः । ततश्च दृष्टविरुद्धं ज्ञानस्य रजतादिवस्तुनाशकत्वं कल्पनीयमापतति ।

अत एव गोतमादिभिः भ्रमस्थले रजतादेरुत्पत्तिर्नोक्ता । अन्यथा घटादाविव तस्याप्युत्पत्तिं वदेयुः । शुक्त्यादि सम-वायिकारणं, चाकचक्यादिकमसमवायिकारणं, दोषो निमित्त-कारणमिति वक्तुं शक्यत्वात् । न च रजतज्ञानत्वावच्छिन्नं प्रति दोषस्य कारणत्वे वक्तव्ये, लाघवात् रजतत्वमेव जन्य-

तावच्छेदकं भवत्विति वाच्यम् । अपूर्वरजतस्य उत्पत्ति-विनाशयोः कल्पनापेक्षया कल्पितस्य रजतज्ञानत्वस्यैव कार्य-तावच्छेदकताया उचितत्वात् ।

अपिच अनिर्वचनीयस्य सदसद्विलक्षणत्वे, व्यावहारिक-प्रातिभासिकयोः वैलक्षण्यं दुर्वचम् । उभयोरपि सदसद्वि-लक्षणत्वेन तत्त्वज्ञाननाश्यत्वेन चाविशेषात् ।

अनिर्वचनीयत्वं च निर्धार्य सदसदन्यतररूपेणानिर्वच-नीयत्वं न तु सदसद्विलक्षणत्वमिति खण्डनकारा अभिप्रयन्ति । तदुक्तं–खण्डने "परकीयरीत्येदमुक्तं–अनिर्वचनीयत्वं विश्वस्य पर्यवस्यतीति । वस्तुतस्तु, वयं सर्वप्रपञ्चसत्वासत्वव्यवस्थापन-निवृत्ताः स्वतः सिद्धे चिदात्मनि ब्रह्मतत्त्वे केवले भारमवलम्ब्य चरितार्थाः सुखमास्महे । ये तु स्वपरिकल्पितसाधकदूषण-व्यवस्थया विचारमवतार्य तत्त्वं निर्णेतुमिच्छन्ति, तान्प्रति ब्रूमः, न साध्वीयं विचारव्यवस्था, भवत्कल्पितव्यवस्थयैव व्याहतत्वा-दिति ।" इति । 'सत्वासत्वव्यवस्थेति–तदन्यतरव्यवस्थे-त्यर्थः । भारं–प्रातिभासिकप्रपञ्चभारम् । अनिर्वचनीयत्वं निर्धार्य सत्वासत्वान्यतररूपेणानिर्वचनीयत्वम्, न तु सद-सद्विलक्षणत्वम् ।' इति तद्व्याख्यातारो वदन्ति ।

नास्माकं असतो भानाङ्गीकारमात्रेण बौद्धमतप्रवेशापत्तिः। तन्मते आरोपितसत्वस्याप्यनङ्गीकारात्, आत्मनः क्षणिकविज्ञानरूपत्वेनानित्यत्वोपगमाच्च। तस्मात् सदसत्ख्यातिरेव रजतादिविभ्रमः। १ 'नासतः ख्यातिः नृशृङ्गवत्' २ 'नानिर्वचनीयस्य तदभावात्' ३ 'नान्यथाख्यातिः स्ववचोव्याघातात्, ४ 'सदसत्ख्यातिर्बाधाबाधाभ्याम्' इति सांख्यसूत्राणि।

असतः ख्यातौ, नरशृङ्गादिवत् रजतादेरभानापत्तिः। शशशृङ्गवासनायाः सत्त्वेऽपि तस्याः फलबलात् शशशृङ्गादिशब्दजन्यज्ञानमात्रजनकत्वात्। नापि अनिर्वचनीयस्य ख्यातिः, सत्वेन असत्वेन वा अनिर्वचनीयस्य सदसद्विलक्षणस्याप्रसिद्धेः। सत्वासत्वयोर्विरुद्धत्वेन सद्विलक्षणस्यासत्वात् तस्यासद्विलक्षणत्वानुपपत्तेः, लोके सत्वासत्वरूपधर्मद्वयरहितपदार्थस्यैवाभात्रात्। नाप्यन्यथाख्यातिः, स्ववचनविरोधात्। भ्रमविषये पुरोवर्तिनि रजतस्यासत्वेन हट्टस्थरजतेन इन्द्रियसंनिकर्षाभावेन, 'असन्न भासते संनिकर्षाभावात्' इति स्ववचन व्याघातेन भानायोगात्। तस्मात् सदसत्ख्यातिरेव। विशेषदर्शनोदयात् प्राक् अबाधात् तदुत्तरं बाधाच्च। न च रजते असति सत्वमनारोपितमस्ति, किन्तु आरोपितमेव।

पुरोवर्तिगतसत्त्वस्यैव तत्रारोपात् ।, इति सांख्यसूत्राणामर्थो बोध्यः । एवं सांख्यसूत्रसिद्धा सदसत्ख्यातिरेव व्याससंमता । तत्सूत्रेषु अप्रतिषिद्धत्वात्, सांख्यदूषितायाः अनिर्वचनीयख्यातेः कुत्रापि सूत्रे अनुक्तेश्च ।

सदसत्ख्यातिरूपभ्रम एवाध्यासः । स एवाविद्या स्थूलरूपा । तस्याश्च पूर्वपूर्वभ्रमजन्यसंस्कारः वासनापदाभिधेयो हेतुः । सा सूक्ष्मरूपा अविद्या । भ्रम—तत्संस्कारातिरिक्ता दण्डायमाना अविद्या नास्ति प्रमाणाभावात् । तस्या अपि संस्कारपरिणामद्वारैव भ्रमजनकताया वाच्यत्वात्, संस्कारेणैवोपपत्तौ अतिरिक्ताविद्याकल्पनाया अनावश्यकत्वात् । भ्रमकारणीभूतसंस्कारसमूह एव प्रकृतिरिति मायेति च व्यवह्रियते । 'अनादिमायया सुप्तः' इति वचने अभिहितं तस्याः अनादित्वं एतज्जन्मन्यनुत्पादरूपमेव, न प्रागभावाप्रतियोगित्वरूपम् । उपनिषद्भाष्ये 'अजामेकां लोहितशुक्लकृष्णाम्' इत्यत्र, न जायते इत्यजा इति मायायां अजापदव्युत्पत्तिप्रदर्शनमपि निरुक्ताभिप्रायकमेव । वासनासमूहस्यैकत्वात् एकामित्युक्तिः युज्यते । अविद्याकल्पितनामरूपेत्यादि भाष्यमपि संस्कारात्मकसूक्ष्माविद्यापरमेव । एवमेव भाष्ये सर्वत्र मायाविद्यादिपदानामर्थो बोध्यः ।

भ्रम — तत्संस्कारातिरिक्तायाः अनादेः मूलाविद्यायाः स्वीकारे, घटादौ विनाशित्वव्यापकतया अवधृतस्य जन्यत्वस्य अभावेन व्याप्यस्य विनाशित्वस्यासंभवात् अनिर्मोक्षप्रसङ्गः । सर्वसंमताध्यासविषये प्रश्नोत्तरवत् अनाद्यविद्याविषयिणी प्रश्नोत्तरभङ्गी न लक्ष्यते भाष्ये । तस्मात् दण्डायमाना अनादिः मूलाविद्या न भगवत्पादसंमता ।

श्रीवाचस्पतिमिश्रैः देवताधिकरणे अनादिरविद्या अभिहिता । "यद्यपि महाप्रलयसमये अन्तःकरणादयः न समुदाचरद्वृत्तयः सन्ति । तथापि स्वकरणे अनिर्वाच्यायामविद्यायां लीनाः सूक्ष्मेण शक्तिरूपेण कर्मविक्षेपकाविद्यावासनाभिः सहावतिष्ठन्त एव । .... ते चावधिं प्राप्य परमेश्वरेच्छाप्रचोदिताः, यथा कूर्मदेहे निलीनान्यङ्गानि ततो निस्सरन्ति, यथावा वर्षापाये प्राप्तमृद्भावानि मण्डूकशरीराणि तद्वासनावासिततया घनाघनासारसुहितानि पुनर्मण्डूकदेहभावमनुभवन्ति । तथा पूर्ववासनावशात् पूर्वसमाननामरूपाण्युत्पद्यन्ते ।" इति भामती । कल्पतरुकाराश्च उक्तोदाहरणद्वयदानात् भ्रम–तत्संस्कारातिरिक्ता भावरूपा अविद्या आचार्यवाचस्पतिमिश्रसंमतेति वदन्ति ।

'भ्रमात्संस्कारतश्चान्या मण्डूकमृदुदाहृतेः ।
भावरूपा मताऽविद्या स्फुटं वाचस्पतेरिह ॥' (क-त) इति ।

अत्र श्लोके वाचस्पतेः मता इत्युक्त्या सूत्र–भाष्यकारयोः भ्रम–तत्संस्काररूपैवाविद्येति मतमिति सूचितम् । इहदेवताधिकरणे इत्युक्तेः वाचस्पतेरपि अन्यत्र भ्रम–तत्संस्काररूपाविद्यापक्षे एवाभिनिवेशः सूचितः ।

वस्तुतस्तु मण्डूकाः यथा मृदो निस्सरन्तीत्युदाहरणमपि वासनासमूहस्याविद्यात्वात् समूहादेकैकस्य निस्सरणे नानुपपन्नं भवतीति बोध्यम् ।

भ्रमातिरिक्ता अविद्या नास्त्येवेति सूचयितुमेव अध्यासभाष्यावसाने, 'तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते' इति भगवत्पादाः पूर्वोक्तस्य अहं ममेत्यध्यासस्यैव प्रामाणिकानां अविद्यापदेन व्यपदेशं ब्रुवते । भावरूपायाः कारणीभूतमूलाविद्यायाः तत्संमतत्वे अध्यासमपि अविद्येति मन्यन्ते इति ब्रूयुः । तस्मात् सांख्यसूत्रोक्ता सदसत्ख्यातिरेव भ्रमः अविद्या अध्यासः इति चोच्यते इति स्थापयन्ति ।

अत्रेदं चिन्त्यते । बाह्यपदार्थातिरिक्तस्य बुद्धिसत्ता-विशिष्टार्थस्य सद्भावे न किमपि प्रमाणमस्ति । घटादिपदानां घटत्वादिजातिविशिष्टे एव शक्तिः । तस्यैव घटादिपदेन बोधस्य सर्वानुभवसिध्दत्वात् । न तु सत्ताया अपि घटादि-पदशक्यतावच्छेदकता । तथा च घटपदेनानवगतसत्ताया बोधनाय अस्तिपदं प्रयुज्यते घटोऽस्तीति, न तु बुद्धिसिद्ध-सत्तावतः बाह्यसत्ताबोधनाय । तस्मात् न घटोऽस्तीति प्रयो-गानुपपत्त्या बौद्धार्थः सिद्ध्यति ।

यत्तु घटो नास्तीति प्रयोगो न स्यात्, घटपदार्थे बाह्ये बाह्यसत्ताविरहस्य असंभवात् । बौद्धार्थाङ्गीकारे तु बौद्धे घटे बाह्यसत्ताविरहस्याबाधितत्वेन बोधनं संभवतीति । तन्न । निरधिकरणा तावदभावप्रतीतिरेव नोदेति । सद्भ्यामभावो निरूप्यते इति प्रामाणिकाः । सद्भ्यां—प्रतियोग्याधाराभ्या-मित्यर्थः । एवं च भूतले घटो नास्तीत्यादिक एव प्रयोगः प्रामाणिकः । तेन वाक्येन अन्यत्र विद्यमाने बाह्ये घटे भूतले सत्वस्य भूतलवृत्तित्वपर्यवसितस्य भूतलवृत्तिपटादिपदार्थान्तर-निष्ठस्याभावो बोध्यत इति न कोऽपि विरोधः इति न बौद्ध-पदार्थकल्पना आवश्यकी ।

यदापि बौद्धदानङ्गीकारे शशशृङ्गं नास्तीति वाक्यात् बोधो न स्यात्, बाह्यस्य शशशृङ्गस्य अभावात् । तदङ्गीकारे तु बुद्धिसत्ताविशिष्टे शशशृङ्गपदबोध्ये बाह्यसत्ताभावस्य बोधः उपपद्यते इति । तदपि न । शशाधिकरणकस्य शृङ्गाभावस्यैव तद्वाक्याद्बोध इति बौद्धार्थकल्पनायाः अनावश्यकत्वात् । तदुक्तं मणौ—"शशशृङ्गं नास्तीति च शशे शृङ्गाभाव इत्यर्थः ।" इति । न च शशपदोत्तरं अधिकरणत्वार्थकसप्तमीविरहेण तादृशशाब्दबोधः न संभवतीति वाच्यम् । शाब्दबोधस्य तादृशस्यासंभवेऽपि विशकलितशशशृङ्गादिपदाधीनपदार्थोपस्थितौ तन्मूलकः मानसः शशाधिकरणकः शृङ्गाभावः इति बोधो भवति । तादृशमानसबोधजननायैव प्रामाणिकाः शशशृङ्गं नास्तीति वाक्यं प्रयुञ्जते इति बोध्यम् । स्पष्टञ्चेदं निरुक्तमणिविवरणे गादाधर्याम् । गवि शशशृङ्गं नास्तीति प्रतीतिस्तु असिद्धैव । यद्यस्ति, तदा तस्याः गोशृङ्गाधिकरणकशशीयत्वाभावविषयकत्वं बोध्यम् । स्पष्टञ्चैतदद्वैतसिद्धौ । न च तथाऽपि शशशृङ्गस्य बौद्धस्यानङ्गीकारे बाह्यस्य तस्याभावेन शशशृङ्गपदस्य अर्थवत्वाभावात् प्रातिपदिकसंज्ञायाः विरहेण तदुत्तरं सुबुत्पत्तिर्न स्यात् इति वाच्यम् । अर्थवदविषयकप्रतीत्य-

विषयत्वरूपस्यार्थवत्त्वस्य प्रातिपदिकसंज्ञाविधायकसूत्रे विवक्षितत्वेन तस्य च अर्थवता शशशब्देन शृङ्गशब्देन च घटिते शशशृङ्गपदे सत्वेन प्रातिपदिकसंज्ञायाः अक्षतत्वात् । वस्तुतस्तु अर्थवच्छब्दानां 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण प्रातिपदिकसंज्ञां विधाय 'कृत्तद्धितसमासाश्च' इति सूत्रेण अर्थवत्त्वरहितानां प्रातिपदिकसंज्ञाविधानात् समासस्य शशशृङ्गपदस्य प्रातिपदिकसंज्ञा सिध्दयति । प्रपञ्चितं चैतदन्यत्रास्माभिः । न च तथापि शशशृङ्गपदबोध्यस्यार्थस्याभावे, 'समर्थः पदविधिः इति सूत्रोक्तस्य समासप्रयोजकसामर्थ्यस्याभावात् शशशृङ्गेति समास एवासाधुः स्यादिति वाच्यम्, एकार्थीभावलक्षणसामर्थ्याभावेऽपि व्यपेक्षापक्षाश्रयणेन एकवाक्यतालक्षणव्यपेक्षासामर्थ्यस्यैव समासप्रयोजकत्वात् । तत्पदप्रयोज्यविषयतया साक्षात् परम्परया वा निरूपिता या विषयता तत्प्रयोजकत्वरूपं तत्पदैकवाक्यत्वं व्यपेक्षासामर्थ्यम् । तच्चात्रास्तीति नानुपपत्तिः ।

यदपि बौद्धार्थानङ्गीकारे अङ्कुरो जायते इति वाक्यात् बोधानुपपत्तिरिति । तदपि न — अङ्कुरादिशब्दानां बुद्धिसत्ताविशिष्टाङ्कुरादिवाचकत्वात् तत्र बाह्याङ्कुरोत्पत्ति-

पूर्वसिध्दे जनकत्वबोधः बौध्दार्थवादिनोपपाद्यते । सा सत्तापि तद्वाच्येति भावः इति प्रतिपादनात् । पदेभ्यः सत्ता-विशिष्टतत्तत्पदार्थबोधस्याननुभवेन सत्तायाः पदशक्यतावच्छेद-कत्वे मानाभावः । सत्कार्यवादिनां वेदान्तिनां अङ्कुरस्वरूपं अनागतातीतवर्तमानावस्थासु अनुस्यूतं वर्तते इति जनिपूर्ववर्ति-ताघटिततत्कर्तृत्वस्याक्षतत्वेनानुपपत्तेरभावात् बौद्धसत्ताविशिष्ट-पदार्थाङ्गीकारस्यानावश्यकत्वात् । तदुक्तं श्रीमधु-सूदनसरस्वतीस्वामिपादैः—'वस्तुतस्तु ध्वंसकालेऽपि घटो ध्वस्तः इति ध्वंसप्रतियोगित्वं घटे प्रतीयते एव । तथा चानागता-तीतवर्तमानावस्थाः क्रमेणाविर्भावयन् तिरोभावयंश्चानिर्वाच्यो घटः कालत्रयेऽप्यनुस्यूतः इति नः सिध्दान्तः ।' इति ।

'अनिर्वाच्यः—तत्तदवस्थाभ्यो भेदाभेदादिना दुर्वचः । अनुस्यूतः इति संकुचितप्रसारितनानावस्थासु वस्त्रादिस्वरूपमिव मृत्पिण्ड—कपाल—घट—भग्नघटादिनानावस्थासु अनुस्यूतं घट-स्वरूपमेकम् । अत एव, यन्मृदासीत्, कपालं चासीत्, पश्चात् तदेव जलाहरणादियोग्यं जातम्, इदानीं तदेव भग्नं तदयोग्यमिति, प्रत्यभिज्ञा । तस्मात् अवस्थासु मिथो भिन्नासु व्यक्तिस्वरूपमनुगतं तदभिन्नमिति भावः ।' इति

तद्ग्रन्थव्याख्या । 'सर्वदा व्यवहारकाले कार्यस्य तादात्म्यापन्नं किंचिद्रूपमस्ति । तत्त्वदर्शनं विना तदुच्छेदासंभवादिति सत्कार्यवादः सांख्यानामिवास्माकमपि । परंतु अस्माकं तद्रूपं मिथ्येति विशेषः ।' इति लघुचन्द्रिका । असत्कार्यवादिनां नैयायिकानां मते, जानातीत्यादाविव उत्पद्यते इत्यत्राख्यातस्याश्रयत्वे निरूढलक्षणा । अङ्कुरः आद्यक्षणसंबन्धरूपोत्पत्त्याश्रयः इति बोधो भवतीति न बौध्दार्थकल्पनमावश्यकम् ।

यच्च, इच्छादीनामन्तःकरणनिष्ठतया तत्र विषयस्य सामानाधिकरण्येन कारणत्वौचित्यात् बौध्दार्थः अङ्गीकरणीय इति । तदपि न—सिध्दे पदार्थे नेच्छा, किन्तु असिध्दे अनागते एव । स च नेच्छापूर्ववृत्तिरिति विषयस्येच्छां प्रति कारणत्वमसंगतम् । परंतु अनागतसुखादिज्ञानमिच्छाकारणम् । तच्चेच्छाधिकरणे अन्तःकरणे वर्तते इति तयोः सामानाधिकरण्यमव्याहतमिति किमर्थं बौद्धार्थः कल्पनीय इति चिन्तनीयम् । यदि निर्विषयिणी इच्छा नानुभूयते इति, विषयं विना इच्छाया अनुदयात् इच्छां प्रति विषयः कारणमिति कल्प्यते । सत्कार्यवादिनां मते इच्छापूर्वमपि तद्विषयानागततादात्म्यापन्नं स्वरूपं वर्तते इति मन्यते ।

तदापि नान्तःकरणे विषयसत्वमपेक्षितम्, येन बौध्दार्थः कल्प्येत । परंतु विषयतासंबन्धेनेच्छां प्रति तादात्म्येन विषयस्य हेतुता । विषय एव कार्यतावच्छेदकविषयतासंबन्धेन इच्छारूपकार्यस्य कारणतावच्छेदकतादात्म्यसंबन्धेन अनागत-पदार्थस्य कारणस्य च संबन्धोऽस्तीति कार्यकारणभाव उपपद्यते। कार्यकारणयोः एकदेशसंबन्धित्वमेवापेक्ष्यते, नैकदेशवृत्तिता मानाभावात् । तेन तादात्म्यस्य वृत्त्यनियामकत्वेन तेन संबन्धेन कारणाधिकरणत्वस्य विषये असंभवेऽपि न क्षतिः । तथाचार्थस्यान्तःकरणवृत्तित्वानपेक्षणात् न तदनुरोधेन बौद्धार्थः कल्पनीयः ।

'बुद्धिसिद्धं तु तदसत्' इति न्यायसूत्रस्य तत्–कार्यं असत्तु–उत्पत्तेः पूर्वं नाशादूर्ध्वं चासदपि बुद्धिसिध्दं–बुध्दि-विषयतया सिध्दमिति व्याख्याकरणेन बौध्दार्थस्य गोतमसंम-तत्वकथनं तु प्रौढया । परं तु असत उत्पत्तिस्वीकारे, तन्तुष्वेव पटः इति नियमः कथम् इत्याशङ्कां परिहर्तुं तत् सूत्रं प्रवृत्तम् । तन्तुष्वेव पटो भविष्यति इति बुद्धिविषय-त्वात् नियम उपपद्यते । तन्तुष्वेव तादृशबुद्धिविषयतायां कारणत्वं नियामकमिति तत्सूत्रव्याख्यातारो विवृण्वन्ति ।

प्रकृतलघुमञ्जूषावाक्य व्याख्यातारः नैयायिकप्रदर्शितव्याख्यानमपि प्रतिपादयन्ति । तस्मात् बौद्धार्थो न प्रामाणिकः ।

एतेन, बौद्धरजतादिरेव पुरोवर्तिनि विषये आरोप्यते, भ्रमे ज्ञानाकारस्यैव विषये आरोपः इति सिद्धान्तात् । चित्तस्य बुद्धिशब्दितस्य वृत्तिर्नाम परिणामः सावयवद्रव्यरूपः । चक्षुरिन्द्रियद्वारा चित्तवृत्तिः बहिः निर्गच्छति । तस्यां पूर्वपूर्वरजतानुभवजनितरजतवासना वर्तते । बहिर्निर्गतयाः चित्तवृत्तेः पुरोवर्तिविषयसबन्धे सति तद्वतचाकचक्यरूपदोषवशात् चित्तस्थसंस्कारस्योद्बोधे सति, उद्बुध्दसंस्कारवशात पुरोवर्तिविषयावच्छेदेन चित्तवृत्तेः रजताकारः परिणामो भवति । स एव बौध्दार्थः । तदानीं वृत्तेः संनिहितरजताकारविशिष्टेदमाकारता भवति । न तु असंनिकृष्टहट्टस्थरजतमादाय रजतविषयकता मानाभावात् । बौद्धरजताकारपरिणाम एव बौध्दं रजतम् । नेदं रजतमिति बाधग्रहे जाते इदं रजतमिति ज्ञानस्य रजतांशे भ्रमत्वग्रहो भवति । बहिरसत् बुद्धिस्थं रजतमवगाहते भ्रमः । अतः सदसत्ख्यातिः । इयमेव स्थूला अविद्या कारणीभूता, संस्काररूपा सूक्ष्माविद्या । नैतदुभयातिरिक्ता अनादिर्दण्डायमाना अस्ति प्रमाणाभावात् ।

'सदसत्ख्यातिर्बाधाबाधाभ्याम्' इति सांख्यसूत्रसिध्देयं सदसत्ख्यातिरेव व्याससंमता, नानिर्वचनीयख्यातिः । अनिर्वचनीयस्योत्पत्त्यभावश्च सन्ध्याधिकरणे भाष्यकारैरेव सूचितः इत्यादिकमपास्तम् ।

बुद्धिसत्ताविशिष्टस्य पदार्थस्याप्रामाणिकत्वात् । किंच, बुद्धिशब्दितस्यान्तःकरणस्य सद्रूपस्य रजतसंस्कारवतः दोषवशात् रजताकारपरिणामरूपं रजतमिति सद्रूपमेवेति वक्तव्यम् । उपादानस्य सद्रूपत्वे उपादेयपरिणामस्य सद्रूपत्वौचित्यात् । तथाच इदं रजतमिति यज्ज्ञानं तन्मिथ्येति रजतविषयविशिष्टज्ञानस्य मिथ्यात्वानुभवविरोधः । रजतं सद्रूपमेव बुद्धिसत्ताविशिष्टं, बहिस्तु असत् । अतः सदसत्ख्यातिरित्युच्यते इति भवद्भिः वक्तुं युक्तम् । विरुद्धयोः परस्परविरहयोः सत्वासत्वयोः एकत्र समावेशासंभवशङ्कामुत्थाप्य, अनारोपितयोः तयोः विरुद्धत्वेऽपि, आरोपितसत्वस्य अनारोपितासत्वेन न विरोधः, भ्रमविषयरजते पुरोवर्तिविषयगतसत्वमारोप्यते इति भवतां समाधानाभिधानमसंगतम् । अन्तः सतः बहिरसत्वेन विरोधविरहेण सत्वे आरोपितत्वकथनेन विरोधपरिहारस्यानवकाशात् ।

यदिच, बाह्यसद्रजतार्थी भ्रान्तः इदं रजतमिति ज्ञानात् पुरोवर्ति–शुक्तौ प्रवर्तते । अतः तस्य बाह्यसत्ता-विषयकं ज्ञानमावश्यकमिति भ्रमस्य बाह्यसत्ताविषयकत्वं वक्तव्यम् । बाह्यसत्वाभावेन विरोधात् बाह्यसत्वं तत्र नास्ति । अतः पुरोवर्तिगतस्य बाह्यसत्वस्य रजते आरोपो वाच्यः । अनारोपितः बाह्यसत्वाभावः तत्र वर्तते । अतः सदसत्ख्याति-रित्यभिधीयते । बाह्यसत्वतदभावयोरनारोपितयोः विरोधे-नैकत्रासंभवात्, बाह्यसत्वस्यारोपितत्वकथनेन विरोधपरिहारो युक्त इति मन्यते ।

तदा आरोपितशब्दार्थो वक्तव्यः । यथा वेदान्तिभिः शुक्तौ आरोपितं रजतं प्रातिभासिकं स्वीक्रियते, तथा प्राति-भासिकं बौध्दरजतनिष्ठं बाह्यसत्वं विवक्षितमिति भवद्भिः न वक्तुं शक्यते । प्रातिभासिकस्यानिर्वचनीयस्योत्पत्तेरसंभवोक्तेः, भाष्यकारानुमतत्वोपन्यासाच्च । तस्मात् वास्तवं बाह्यसत्वं भ्रमविषये नास्तीत्यत्रैव रजतस्यारोपितं सत्वमिति वचनतात्पर्यं वक्तव्यमिति, भ्रमः असत्ख्यातिः इत्येव सुवचं, किं नूतन–सदसत्ख्यातिसमाश्रयणेन ।

यदपि सदसत्ख्यातिः 'सदसत्ख्यातिर्बाधाबाधाभ्याम्' इति सांख्यसूत्रानुसारिणी, सैव व्यासस्यापि संमता, तस्या अदूषणात्, अनिर्वचनीयख्यातेः सूत्रानारूढत्वाच्चेति ।

तत्रेदं चिन्तनीयम् — अख्यातिवादिनः सांख्याः इति प्रामाणिकग्रन्थेभ्योऽवगच्छामः । प्रकृतिपुरुषाविवेकः अविद्या, प्रकृतिपुरुषान्तरख्यात्या तन्निवृत्तावपवर्गः इति सांख्यप्रक्रिया । रचनानुपपत्त्यधिकरणे 'तदविभागापत्तिश्चाविद्या' इति भामती-विवरणावसरे, 'अविवेको ह्यविभागः' इति कल्पतरुवाक्यं लक्ष्यते । एवं कल्पतरुकाराणां व्याख्यानाशयं निरूपयति परिमलः — "अविभागापत्तिश्चेत्यत्र अविभागो नैक्यम्' अख्यातिवादिनः सांख्यस्य मते भ्रमविषयैक्यविवर्ताभावात् इत्याशङ्क्य, विवेकाग्रह एव अविभागशब्देन विवक्षितः इति व्याचष्टे—अविवेक इति ।" इति । अनेन सन्दर्भेण निस्संशयमवधारयामः सांख्याः अख्यातिवादिनः इति ।

एवं, 'अख्यातिवादिनापि मानसं संसर्गज्ञानं संसर्गाभिमानो वा वक्तव्यः ।' इति विवरणग्रन्थं "चाक्षुषायथार्थज्ञानाभावेऽपि मानसमयथार्थज्ञानमख्यातिवादिनाङ्गीक्रियते । देहादावनात्मनि आत्मबुद्धिरविद्या इति सांख्योक्तेरित्यर्थः ।" इति

तत्त्वदीपनकारा व्याचक्षते । अनेनापि स्पष्टमवगम्यते सांख्याभिमता अख्यातिरिति ।

एवं, सांख्याः अख्यातिवादिनः इति प्रामाणिकग्रन्थैः सिद्धावपि, मञ्जूषाकाराः विज्ञानभिक्षुसंमतसांख्यसूत्रपाठं प्रमाणीकृत्य, सदसत्ख्यातिवादिनः सांख्याः इति निरूपयन्ति ।

परन्तु, तद्ग्रन्थव्याख्याने, वासनाजनितान्तःकरणपरिणामरूपबुद्धिसत्तासमाविष्टरजतादिविशिष्टपुरोवर्तिवस्तुविषयकान्तः—करणपरिणामरूपा सदसत्ख्यातिः, भ्रमः, अविद्या इति, असति रजते पुरोवर्तिगतं सत्वमारोपितमिति च नोक्तम् ।

सत्वादिगुणादीनां सर्वेषां वस्तूनां नित्यत्वात् स्वरूपेणाबाधः, संसर्गतस्तु बाधः, सर्ववस्तूनां चैतन्ये अध्यासात् । अतः सर्वेषां सदसत्ख्यातिरेव । न च सदसत्वयोर्विरोध इति वाच्यम् । प्रकारभेदेनाविरोधात् । यथावा रजतं वणिग्वीथीस्थरूपेण सत्, शुक्त्यध्यस्तरूपेण चासत् । तथैव सर्वं वस्तु स्वरूपतः सत् चैतन्यादावध्यस्तरूपेण चासदिति । एवमेव अवस्थाभेदेनापि सदसत्वमविरुद्धम् । यथाहि वृक्षादिः रूढाद्यवस्थाभिः सन्नपि अङ्कुराद्यवस्थाभिरसन् भवति ।

तथैव प्रकृत्यादिकं सदसदात्मकमिति, इति विज्ञानभिक्षुग्रन्थो दृश्यते । नात्र नव्यवैयाकरणोक्ता सरणिः लक्ष्यते इत्यवधेयम् ।

यदपि, सदसत्ख्यातिरेव वेदान्तसूत्रकारस्यापि संमता, तेन ब्रह्मसूत्रेषु तस्या अदूषणात् अनिर्वचनीयख्यातेरनुपन्यासत्त्वेति।

तदपि न– वेदान्तसूत्रेषु सदसत्ख्यातिवादस्य दूष्यतया, अङ्गीकार्यतया वा प्रस्ताव एव नास्ति । तेषु अनिर्वनीयख्यातेरनुपन्यासः इति वचनं न समञ्जसम् । अनिर्वचनीयत्वं, सत्त्वेन असत्वेन वा निर्वचनायोग्यत्वम्, योग्यतावच्छेदकाभाववत्त्वपर्यवसितम् । सत्वेन निर्वचनयोग्यतावच्छेदकं सत्वम । तथा असत्वेन निर्वचनयोग्यतावच्छेदकं असत्वम् । तयोरभाववत्त्वं सदसद्विलक्षणत्वरूपं पर्यवसितम् । 'मिथ्याशब्दोऽनिर्वचनीयतावचनः' इति पञ्चपादिकावचनात् सदसद्विलक्षणत्वरूपमनिर्वचनीयत्वं मिथ्यात्वम् इति च प्रामाणिकग्रन्थाः।

'तदनन्यत्वमारम्भणशब्दादिभ्यः' इत्यधिकरणे, वाचारम्भणम्, ऐतदात्म्यमिदं सर्वम्, इदं सर्वं यदयमात्मा, इत्यादिशब्दप्रमाणेन, आदिना गृहीत–दृष्टनष्टत्वादियुक्त्या, कूटस्थस्य ब्रह्मणः समस्तविकारप्रकृतित्वान्यथानुपपत्तिप्रमाणेन, 'भावे चोपलब्धेः' इति सूत्रोक्तेन ब्रह्मान्यत् मिथ्या दृश्यत्वादि-

त्यनुमानेन, घटोऽस्ति इति सद्रूपे ब्रह्मणि प्रतिपन्नस्य घटस्य सद्रूपे घटाभावावगाहिना अत एव मिथ्यात्वविषयकेण घटो नास्तीति प्रत्यक्षेण 'भावाच्चोपलब्धेः' इति सूत्रोक्तेन च ब्रह्मणो जातस्य प्रपञ्चस्य मिथ्यात्वं साधितम्। तस्मिन्नेवाधिकरणे, प्रपञ्चस्य न मिथ्यात्वं, किन्तु असत्वमेव, 'असद्वा इदमग्र आसीत्' इति श्रुतौ असत्वेनाभिधानात् इत्याशङ्क्य, श्रुतावसच्छब्दः अनभिव्यक्तनामरूपवत्त्वाभिप्रायकः वाक्यशेषबलात् इति समाधानं 'असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्' इति सूत्रेणाभिधाय, 'युक्तेः शब्दान्तराच्च' इति समनन्तरसूत्रेण प्रपञ्चासत्वाभावः साधितः। असतः नरविषाणादेः अर्थक्रियाकारित्वाभावात् प्रपञ्चस्यार्थक्रियाकारित्वात् नासत्वमिति युक्तिर्विवक्षिता। एवं प्रलये, 'नासदासीन्नो सदासीत्.... तम आसीत्' इति श्रुत्या सदसद्विलक्षणत्वेनाभिहितस्य तमश्शब्दितस्याज्ञानस्य कार्यं जगत् सदसद्विलक्षणमिति नासत् इति शब्दान्तराच्चेत्यंशेन विवक्षितम्। एवं बाह्यप्रपञ्चस्यासत्वं 'नाभाव उपलब्धेः' इति सूत्रेण निराकृतम्। एवं, प्रकृत्यधिकरणे, 'योनिश्च हि गीयते' इति सूत्रेण योनिशब्दितमायाया अपि प्रकृतित्वप्रतिपादनमुखेन प्रपञ्चस्य मिथ्यात्वमुपपादितम्। ब्रह्मणः उपादानत्वनिरूपणाय तस्य प्रपञ्चात्मना परिणामः

'आत्मकृतेः परिणामात्' इति सूत्रेण प्रतिपादितः । तदुपरि, प्रपञ्चात्मकविकारवत्वे ब्रह्मणः निर्विकारत्वबोधकश्रुतीनां विरोधः इति शङ्का प्रसरति । तां परिहर्तुं 'योनिश्च हि गीयते' इति सूत्रं प्रवर्तते । ब्रह्मण इव 'यो योनिं योनिमधितिष्ठत्येकः' इति योनिशब्दोदितमायाया अपि 'मायां तु प्रकृतिं विद्यात्' इति श्रुतावुपादानत्वं श्रूयते । एवं च घटादौ प्रपञ्चे ब्रह्मधर्म-सत्तायाः घटः सन्निति, मायागतजाड्यस्य घटो जडः इति च प्रतीतिरस्ति । मायापरिणामश्च प्रपञ्चो न तात्विकः । अतो न तात्विकविकाराभावबोधकश्रुतिविरोधः इति सूत्रार्थो वर्णितः पूर्वाचार्यैः । इत्थं च मायापरिणामत्वेन प्रपञ्चस्य सद्रूपविलक्षणत्वमभिहितम् । स्वप्ने कूटस्थस्वरूपानुपमर्देन विचित्रा सृष्टिः श्राव्यते इति 'आत्मनि चैवं विचित्राश्च हि' इति सूत्रेणाभिधानात्, आत्मनि सृष्टः अतात्विकः स्वाप्नप्रपञ्चः इत्येवं स्पष्टमेवानिर्वचनीयख्यातिः प्रतिपादिता । एतत्सूत्रविवरणे, 'अनेन स्फुटितो मायावादः' इति भामती ब्रूते । सन्ध्याधिकरणे, स्वाप्नसृष्टिः मायामयीति स्पष्टमेवाह बादरायणः 'मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्' इति सूत्रेण ।

तदेवं, ब्रह्मसूत्रेषु सद्विलक्षणत्वासद्विलक्षणत्वसमर्थनेन, मायोपादानकत्वेन, कूटस्थस्वरूपानुपमर्देन सृष्टत्वकथनेन च

प्रपञ्चस्यातात्विकत्वव्यवस्थापनात्, विशिष्य स्वाप्नसृष्टेः मायिकत्वस्थापनाच्च, अनिर्वचनीयख्यातेः सूत्रानारूढत्ववचनमतीवासंगतमिति सुधीभिर्विभावनीयम् ।

अपिच, तत्तच्छास्त्रसिद्धान्तविशेषाः सर्वेऽपि साक्षात् तत्तत्सूत्रारूढाः इति न वक्तुं शक्यते । वैयाकरणसिद्धः स्फोटवादः न मनागपि पाणिनिसूत्रेषूपलभ्यते । प्रत्ययार्थप्राधान्यवचनेऽपि औदासीन्यमवलम्बमानः व्याकरणसूत्रकारः 'तदशिष्यम्' इत्याह । वेदान्तिनां नैयायिकानां च सिद्धान्तसिद्धा इष्टसाधनत्वस्य प्रवृत्तिप्रयोजकस्य लिङर्थता न ब्रह्मसूत्रेषु, न वा न्यायसूत्रेषु प्रतिपादिता । सांख्यसूत्रोक्तसदसत्ख्यातिमिव तदुक्तं स्फोटनिराकरणं नाभ्युपगच्छन्ति नव्यवैयाकरणाः । परन्तु स्वाभिमतार्थपरतया दर्शनान्तरीयसूत्राणां योजनाकौशलाविष्करणं कृतं तैः । न च ततोऽर्थसिद्धिर्भवति ।

यदपि, मायामात्रमिति सूत्रे असद्विषयकं प्रतिभासमात्रं स्वप्ने इत्युक्तम् । असदर्थावभास एव माया । तत्र मात्रपदेनानिर्वचनीयस्यार्थस्योत्पत्तिर्व्यवच्छिद्यते । भाष्यकारैः स्वाप्नरथादीनां सामग्रीविरहः स्पष्टमुक्तः । अतः स्वप्ने अर्थसृष्टिर्नेति ते मन्यन्ते । तन्न्यायेन शुक्तिरजतादिभ्रमस्थलेऽपि

अनिर्वचनीयरजतोत्पत्तिर्न संभवति कल्पितसामग्रीविरहादिति भाष्यकाराणामाशय अवगम्यते इति ।

तदपि न समञ्जसम्–मिथ्यात्वविशिष्टं मायापदशक्यमिति,

'ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः ॥'

इति भागवतस्मृतिर्बोधयति । *अर्थमृते–प्रतीयमानार्थाभाववति, यत् प्रतीयते तत् मायां विद्यात्–तत् मायापदार्थः इति जानीयात् । तथाच स्वाधिकरणे वर्तमानाभावप्रतियोगि माया इति फलितम् । तस्यात्मैवाधिष्ठानमन्यस्य सर्वस्य कल्पितत्वादित्यभिप्रायेण आत्मनः इत्युक्तम् । ननु स्वप्रकाशस्यात्मनः सदा भानात् कथं तत्रारोपः इति शङ्कायामाह–न प्रतीयेत चात्मनीति। पूर्णानन्दस्वरूपस्वप्रकाशात्मनि न प्रतीयते इति यत् तदपि मायेत्यर्थः । तथाच स्वप्रकाशेऽपि अप्रकाशस्य कल्पितत्वात् तन्मूलकः सर्वस्यारोपः । अर्था-

---

* अविनाभावः इत्यत्र साध्यं विना — साध्याभाववति इति दीधितौ व्याख्यातम् ।

भावेऽपि प्रतीयमानत्वे दृष्टान्तः—यथाऽऽभास इति । यथा शुक्त्यादौ रूप्याद्याभास इत्यर्थः । प्रकाशस्वरूपे तदभावत्वेन कल्प्यमानत्वे दृष्टान्तमाह—यथा तम इति । यथा मध्याह्नसूर्यालोके तदभावत्वेनोलूकैः कल्प्यमानं तमः इत्यर्थः ।

अत एव, 'मायामृगं दयितयोज्झितम्' इत्यादौ मिथ्याभूतमारीचमृगे मायापदप्रयोगः । ऐन्द्रजालिकनिर्मितमिथ्याभूतवस्तुषु बहुलं मायाशब्दः प्रयुज्यते । न च शुक्तिरूप्यं माया इति व्यवहाराभावात् न मिथ्यात्वविशिष्टं मायापदार्थः इति वाच्यम् । पृथिव्यामपि वज्रे पृथिवीत्वव्यञ्जकाभावे पृथिवीति न व्यवहारः, व्यञ्जकसत्वे तु तथा व्यवहारोऽस्ति । एवमेव मिथ्यात्वव्यञ्जकविरहदशायां मायेति व्यवहाराभावेऽपि मिथ्यात्वव्यञ्जकसद्भावे शुक्तिरूप्यं मायेति व्यवहारोऽस्त्येव । अत एव सांख्यप्रवचने—'यत्तु दृष्टिपथं प्राप्तं तन्मायैव सुतुच्छकम्' इति, मोक्षधर्मे—

'माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद ।
सर्वभूतगुणैर्युक्तं मैवं मां ज्ञातुमर्हसि ॥' इति च दृश्यमात्रे मायापदं प्रयुक्तम् । किं च, कष्टं कर्मेत्यनुभवात् व्यापारसामान्यस्य दुःखजनकत्वेऽपि, प्रकृष्टदुःखजनके व्यापा

एव दुःखजनकं (कष्टम्) इति व्यवहारो दृश्यते । एवमेव मिथ्याभूतस्य सर्वस्य मायात्वेऽपि चमत्कारविशेषाधायकत्वेन प्रकृष्टायामेव मायायां मायेति व्यवहारः इति च बोध्यम् । तस्मात् मायामात्रमिति सूत्रे स्वाप्नार्थस्य मायापदेन मिथ्यात्वमेवोक्तम्, न तु असद्विषयकाभासः इति सिद्धम् ।

'न तत्र रथा न रथयोगा न पन्थानो भवन्ति, अथ रथान् रथयोगान् पथः सृजते । .... स हि कर्ता' इति श्रुतिः स्वप्ने रथादीनामर्थानां सृष्टिं बोधयन्ती तेषां मिथ्यात्वमपि प्रतिपादयति । स्वप्ने रथादयः न सन्ति अथ—अथापि, रथादीन् स्वप्नद्रष्टा सृजति । स्वाप्नपदार्थदर्शनेन मोदत्रासादिकर्मफलस्योपलब्धेः तत्प्रयोजककर्मकर्तृत्वं जीवस्य । तथाच श्रुत्यन्तरम्—'स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति ।' इति । सृजते इति न भवन्ति इति च लडाख्याताभ्यां रथादिसृष्टि—रथाद्यभावयोः एककालावच्छिन्नत्वं बोध्यते । अतश्च स्वसमानाधिकरण स्वावच्छेदककालावच्छिन्नाभावप्रतियोगित्वरूपमिथ्यात्वेनैव रथादीन् सृज्यमानान् बोधयति श्रुतिः । तथाच मिथ्याभूतस्योत्पत्तिः श्रुतिसिद्धा । न च भाष्ये उपक्रमगतं रथाद्यभाववचनं

श्रुत्या, पश्चात्तनं सृष्टिवचनं भाक्तमिति अभिधानात् न ततोऽर्थसृष्टिः सिद्ध्यतीति वाच्यम् । अर्थानामभावकथनात् मिथ्यात्वमेव । तत्स्रष्टृत्वं च जीवस्य न संकल्पपूर्वकम्, अपि तु मोदत्रासादेः कर्मफलस्य दर्शनात् तदनुकूलसुकृतादिकर्तृत्वरूपमिति भाष्याशयात् । स्वप्नद्रष्टुः उपादानगोचरकार्यानुकूलज्ञानवत्त्वमेव स्वप्नादिसाक्षिणः कर्तृत्वमिति श्रीब्रह्मानन्दसरस्वतीस्वामिपादाः । स्वप्ने पदार्थसृष्टिरस्ति, सा तथ्या वा जागरे इव, उत मायामयीति संशयः भाष्ये प्रदर्शितः सन्ध्याधिकरणोपक्रमे । मायामात्रमिति सूत्रविवरणावसरे 'मायैव सन्ध्ये सृष्टिः, न परमार्थगन्धोऽप्यस्ति' इति भाष्यम् । स्वप्ने पदार्थसृष्टिरस्ति । परंतु सृज्यमानः न तथ्यः, किं तु मायामयः— मिथ्या इति फलितम् ।

सन्ध्याधिकरणे, 'स्वाप्नस्य व्यावहारिकत्वमस्ति न वेति चिन्त्यते ।' इति परिमलः । तथा च सृज्यमानाः स्वाप्नाः न व्यावहारिकसत्याः, किन्तु मिथ्याभूताः इत्येव विवक्षितम् । रथादिसामग्रीविरहप्रतिपादनमपि स्वाप्नस्य व्यावहारिकत्वाभावे उपयुज्यते, इति न तेनोत्पत्त्यभावो वक्तुं शक्यते ।

एवमेव शुक्तिरजतस्थलेऽपि रजतस्योत्पत्तिः 'सत्यं चानृतं च सत्यमभवत्' इति श्रुतिसिद्धा बोध्या । तदुत्पादिका

न लौकिकपरमार्थरजतसामग्री, किन्तु विलक्षणेति विज्ञेयम्। न च भवदभिमतविजातीयसामग्र्या अर्थं विनैव अर्थसंनिकर्षाभावेऽपि रजतज्ञानमुत्पद्यतामिति वाच्यम्। 'अर्थेनैव विशेषो हि निराकारतया धियाम्' इत्युक्तेः, विषयवैलक्षण्येनैव ज्ञानवैलक्षण्यस्य वक्तव्यत्वात्, तदुपपादकतया अर्थविशेषरूपविषयस्वीकारस्यावश्यकत्वात्। अन्यथा साकारवादप्रसङ्गेन बहिर्विषयविलोपापत्तेः। बाह्यविषयाभावश्च निरस्तः सूत्रकारैः 'नाभाव उपलब्धेः' इत्यत्र। तस्मात् मिथ्याभूतरजतस्योत्पत्तिरावश्यकी।

यत्तु भ्रमस्थले रजतस्योत्पत्तौ, इदं रजतमिति ज्ञानस्य भ्रमत्वमेव न स्यात्। व्यधिकरणप्रकारकत्वस्य—विशेष्यावृत्तिप्रकारकत्वपर्यवसितस्य भ्रमत्वस्य, भ्रमविषयप्रातीतिकरजते रजतत्वस्य प्रकारस्य विद्यमानत्वेनासंभवादिति।

तन्न—भ्रमत्वं हि बाधितविषयकत्वम्। तच्च बाधितप्रातीतिकरजतविषयकज्ञाने वर्तते एवेति न दोषः। तदुक्तं शाबरभाष्ये-'यत्र दुष्टं करणं मिथ्येति च प्रत्ययः, सोऽसमीचीनः प्रत्ययः।' इति। अपिच सोऽयं ककारः इति वाक्यजन्यनिर्विकल्पकभ्रमे विशेष्यावृत्तिधर्मप्रकारकत्वाभावेन वेदान्तिमते बाधिताथ-

विषयत्वस्यैव भ्रमत्वरूपतास्वीकारात्। वेदान्तसूत्रेषु उक्तलक्षणानुक्तिः न कयापि विधया बाधिका। सर्वस्मिन्नपि दर्शने तत्तत्सिद्धान्तविशेषाणां सर्वेषां सूत्रप्रतिपादितत्वं नेति च पूर्वमुक्तमेव। किञ्च, इदं रजतमिति भ्रमे, इदमि रजतत्वविशिष्टस्य तादात्म्येन प्रकारतया, रजतविशेषणस्य रजतत्वस्य धर्मिपारतन्त्र्येण प्रकारतया च भानं स्वीक्रियते। स्वीकृतश्चायमर्थः नव्यनैयायिकैः प्रामाणिकग्रन्थेषु। पुरोवर्तिनि च रजतत्वस्याभावात् रजतत्वाभाववद्विशेष्यकरजतत्वप्रकारकत्वरूपं भ्रमत्वमनायासेनोपपद्यते। कथमन्यथा सदसत्ख्यातिवादिनां भवतामपि मते इदं रजतमिति ज्ञानस्य भ्रमत्वमुपपद्यते। तत्रारोपिते बुद्धिसिद्धरजते रजतत्वस्य सत्वेन व्यधिकरणप्रकारकत्वाभावात्। यदि, तादृशरजते अधिष्ठानपुरोवर्ति निष्ठबाह्यसत्तारोपात् बुद्धिसिद्धार्थविशिष्टपुरोवर्तिज्ञाने विशेष्यवृत्तिबाह्यसत्तायां अपि बुद्धिसिद्धरजते भानात् बुद्धिसिद्धरजतावृत्तिबाह्यसत्ताप्रकारकत्वेन भ्रमत्वमुपपद्यते,। तदा अस्मन्मते पुरोवर्तिन्यपि रजतत्वस्य भानात् व्यधिकरणप्रकारकत्वमुपपद्यते इति विभावनीयम्।

यदपि, प्रातिभासिकरजतोत्पादे, तस्य ज्ञानान्नाशो वाच्यः। न हि ज्ञानस्य वस्तुनाशकत्वं क्वचित् दृष्टमिति।

तदपि न, वस्तुनाशकत्वमित्यत्रन वस्तुपदे भावरूपं विवक्षितम्, ज्ञानस्य ज्ञानप्रागभावनाशकत्वदर्शनेऽपि भात्र-पदार्थनाशकत्वमदृष्टमित्युक्तिः न समीचीना। अदृष्टस्य चरमफलनाश्यत्वात्, यस्यादृष्टस्य चरमफलं ज्ञानं, तेन तज्जन-कस्यादृष्टस्य नाशोत्पत्तेः संप्रतिपन्नत्वात्। वस्तुपदस्याबाध्य-परत्वे न काचित् क्षतिः। प्रातीतिकशुक्तिरूप्यादेः अबाध्य-त्वरूपवस्तुत्वाभावात्, ज्ञानेन तन्नाशानुपपत्तेरभावात्। किं च, ज्ञानाज्ञानयोः समानविषयकयोः विरोधात् ज्ञानस्य स्वसमान-विषयकाज्ञाननाशकता संप्रतिपन्ना। अज्ञानं च अहमज्ञः, त्वदुक्तमर्थं न जानामि इत्यादिप्रत्यक्षेण भावरूपं सिद्धमिति अज्ञानरूपभावपदार्थनाशकत्वं क्लृप्तमेव। किं च प्रातीति-कस्य उत्पत्तिविनाशयोः प्रामाणिकत्वेन ज्ञानेन तन्नाशस्य प्रमाणसिद्धत्वात् न तत्कल्पनागौरवं दोषः।

शुक्तिरूप्यस्योत्पत्त्यभावादेव गोतमादिभिः तस्य सम-वायिकारणासमवायिकारणनिमित्तकारणादिनिरूपणं न कृतमिति रिक्तं वचः। न हि उत्पद्यमानस्य सर्वस्यापि कारण-त्रयं गोतमादिभिरुच्यते। अन्यथाख्यातिवादिना न्यायसूत्र-कारेण भ्रमस्थले अनिर्वचनीयरजतोत्पत्तेरनङ्गीकारेण तदुत्पादक-

सामग्रीप्रदर्शनस्यानावश्यकत्वात् । शास्त्रान्तरेष्वनुक्त्या शास्त्रान्तरीयसिद्धान्तव्याकोपो न हि दृष्टपूर्वः इति ज्ञेयम् ।

यदपि, भ्रमस्थले इव ब्रह्मणि अनिर्वचनीयस्य प्रपञ्चस्य व्यावहारिकविकारस्य सत्वेन निर्विकारत्वं ब्रह्मणो न संभवतीत्युक्तम् । तदपि न—अनिर्वचनीय (मायिक) विकारवत्त्वेन तात्विकनिर्विकारत्वस्याविरोधात् । प्रपञ्चितं चैतदस्माभिः अनिर्वचनीयवादस्य सूत्रारूढत्वचिन्तायां 'योनिश्च हि गीयते' इति सूत्रार्थविवरणावसरे ।

यदपि, अनिर्वचनीयत्वं न सदसद्विलक्षणत्वं, अप्रसिद्धेः । सद्विलक्षणत्वेनासत्वस्य असद्विलक्षणत्वेन सत्वस्य चापत्तौ अनारोपितयोः सत्वासत्वयोरेकत्र विरोधात्, आरोपितं सत्वं अनारोपितमसत्वं रजतस्येति सदसत्ख्यातिरेवोचितेति ।

तन्न । अबाध्यत्वं सत्वम् । प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं बाध्यत्वं, तदभावरूपसत्वस्यानधिकरणत्वं बाध्यत्वे पर्यवसितम् । असत्वं च सत्वेन प्रतीत्यनर्हता । असत्वाभावश्च सत्वेन प्रतीत्यर्हत्वम् सत्तादात्म्यपर्यवसितम् । तथाच बाध्यत्वं सत्तादात्म्यं चेत्युभयवत्वमेव सदसद्विलक्षणत्वम् । तच्च शुक्तिरजते प्रसिद्धमेव । सद्रजतमिति सत्वेन

प्रतीतेः, नात्र रजतमिति निषेधप्रतीतेश्च सत्त्वात् । एवं चाप्रसिद्धिकथनमयुक्तम्। पराक्रान्तं चात्र पूर्वाचार्यैः ।

यदपि अनिर्वचनीयोत्पत्तिवादिभिरपि स्वसमानाधिकरणस्वावच्छिन्नवृत्तिकान्यात्यन्ताभावप्रतियोगित्वरूपं मिथ्यात्वं वदद्भिः वस्तूनां स्वीकृतमेवासत्वम् । अन्यथा अभावपदे नञः विरोध्यर्थकत्वात् प्रतियोगिसामानाधिकरण्यमभावस्य वक्तुमशक्यम्, प्रतियोगिसामानाधिकरण्याभावस्यैव तत्र विरोधरूपत्वात् । मम तु स्वप्रतिभाससमानाधिकरणाभावप्रतियोगित्वमेव मिथ्यात्वमिति ।

तदपि न—अधर्मः इत्यत्र नञा धर्मविरोधीव, अभावः इत्यत्र भावविरोधी बोध्यते । भावश्च प्रतियोगीति, प्रतियोग्यसमानाधिकरणत्वरूपविरोधाश्रय एवाभावपदेन बोध्यते इति स्वीकारे, वृक्षे कपिसंयोगाभावः, घटत्वेन पटाभावः इत्यादिप्रत्ययानां निरालम्बनत्वापत्तिः । न हि अव्याप्यवृत्तौ कपिसंयोगाभावे प्रतियोगिभूतकपिसंयोगासामानाधिकरण्यरूपविरोधोऽस्ति, न वा केवलान्वयिनि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताके घटत्वेन पटाभावे प्रतियोगिभूतपटसामानाधि-

करण्याभावोऽस्ति । एवं वृक्षे कपिसंयोगाभावः प्रतियोगिसमानाधिकरणः इति वाक्यं अघटो घटः इतिवदप्रमाणं स्यात्। अभावपदबोध्ये प्रतियोगिसामानाधिकरण्याभावरूपविरोधवति प्रतियोगिसामानाधिकरण्यस्य बाधात् ।

परंतु, अभावत्वं नामानुयोगितविशेषः । स च इदमत्र नास्ति, इदमिदं न भवति इति प्रतीतिसाक्षिकः भावाभावसाधारणः प्रतियोगिनः अभावे संसर्गतया भासते । स एव नञ्पदप्रवृत्तिनिमित्तमित्यादि प्रपञ्चितं सिद्धान्तलक्षणे गादाधर्यामनुसन्धेयम् । ततश्च मिथ्यात्वशरीरप्रविष्टाभावस्य प्रतियोगिसामानाधिकरण्याभाववत्त्वात् स्वसमानाधिकरणत्वं न संभवतीति रिक्तं वचः इति ज्ञेयम् ।

यदपि, व्यावहारिक प्रातिभासिकयोरुभयोरपि, सदसद्विलक्षणत्वस्य विशेषदर्शनबाध्यत्वस्य च तुल्यत्वात् न तयोर्भेदो वक्तुं शक्यते इति ।

तदपि न साधु—व्यावहारिकस्य प्रातिभासिकस्य च सदसद्विलक्षणत्वाविशेषेऽपि, उत्पत्तौ बाध्यतायां च वैलक्षण्यमस्ति । करणासंसर्गिदोष (अविद्या)प्रयुक्तं व्यावहारिकम् । प्रातिभासिकं करणसंसर्गिदोष (काचादि) प्रयुक्तम् । अविद्या-

दोषप्रयुक्तं व्यावहारिकम् । अविद्यान्यागन्तुकदोषप्रयुक्तं प्रातिभासिकम् । मूलाविद्याप्रयुक्तं व्यावहारिकम् । पल्लवाविद्याप्रयुक्तं प्रातिभासिकम् । एवं बाध्यतायां वैलक्षण्यमस्ति । निष्प्रकारकज्ञानबाध्यं व्यावहारिकम् । प्रातिभासिकं तु सप्रकारकज्ञानबाध्यम् । निर्धर्मकं यत् वस्तुगत्या तन्मात्रविषयकज्ञानबाध्यं व्यावहारिकम् । शुद्धब्रह्मज्ञानान्यज्ञानबाध्यं प्रातिभासिकम् । महावाक्यजन्यधीबाध्यं व्यावहारिकम् । महावाक्यजन्यधीभिन्नबाध्यं प्रातिभासिकम् । एवं अविद्याविषयतानवच्छेदकं प्रातीतिकम् । तद्भिन्नदृश्यं व्यावहारिकम् । एवं नैकविधं प्रातिभासिकव्यावहारिकयोः वैलक्षण्यं सुवचं बोध्यम् ।

यदपि, खण्डनकाराणामपि अनिर्वचनीयत्वं सत्वासत्वान्यतररूपेण निर्वचनानर्हत्वरूपमेव अभिमतम् । न सदसद्विलक्षणत्वमिति । 'वस्तुतस्तु वयं सर्वप्रपञ्चसत्वासत्वव्यवस्थापननिवृत्ताः स्वतःसिद्धे चिदात्मनि ब्रह्मतत्वे केवले भारमवलम्ब्य चरितार्थाः सुखमास्महे ।' इति खण्डनग्रन्थस्य, "भारं प्रातिभासिकप्रपञ्चस्य भारं अवलम्ब्य अनिर्वचनीयत्वं निर्धार्य सदसत्वान्यतररूपेणानिर्वचनीयत्वं न तु सदसद्विलक्षणत्वम् ।" इति व्याख्यानकरणात् ज्ञायते इति ।

तदपि न—तत्र सदसत्पक्षयोः दोषदर्शनात् अनिर्वचनीयता इति वेदान्तिमते न्यायालङ्कारग्रन्थोक्तं प्रत्यवस्थानं उपन्यस्तम् । तदुपरि ब्रह्मातिरिक्तसर्वस्य अनिर्वचनीयतावादिनः अनिर्वचनीयत्वस्याऽपि अनिर्वचनीयता इष्टैवेति त्वदुक्तपर्यनुयोगः न मयि घटते इत्युक्त्यनन्तरं, अनिर्वचनीयत्वं नास्माभिः साध्यते । परं तु निर्वचनखण्डनेन पारिशेष्यात् अनिर्वचनीयत्वं सिध्दयतीति ब्रूमः इत्यभिहितम् । ततः साधनाभावेऽपि तदभ्युपगमेन द्वैतापत्तिर्न । परिशेषसिद्धेऽपि नाभ्युपगमः । परं तु त्वं तथा बोध्यसे इति वस्तुतस्तु इत्यादिग्रन्थं व्याचक्षते श्रीशङ्करमिश्राः । तथाच शाङ्करी व्याख्या—"ननु अनिर्वचनीयत्वं मा साध्यतां परिशेषसिद्धानिर्वचनीयताभ्युपगमेनापि द्वैतापत्तिः तदवस्था, इत्यत आह वस्तुतस्त्विति । परिशेषसिद्धेऽप्यनिर्वचनीयत्वे मम नाभ्युपगमः, अपि तु त्वं तथा बोध्यसे इत्यर्थः । भरं—अध्यवसायम्" इति । अत्र विद्यासागरी व्याख्या— "परकीयरीत्या परानन्पिधानेऽपि न स्वमते अनिर्वचनीयत्वसिद्धिः, साधकप्रमाणानुपन्यासात्, इत्याशङ्क्याह वस्तुतस्त्विति । चेत्यपदार्थस्य चित्संगात् स्वतो वा सिध्दयसंभवात् तत्सत्वासत्वयोः औदासीन्यावलम्बने सति अनिर्वचनीयत्वं परिशेषसिद्धमित्यर्थः ।" इति ।

नचैतयोः प्रसिद्धव्याख्यानयोः अनिर्वचनीयत्वं न सदसद्विलक्षणत्वे पर्यवस्यति इति प्रतिपाद्यते । तस्मात् न किंचिदेतत् । तथाच अनिर्वचनीयस्य सदसद्विलक्षणस्य उत्पत्तिः तत्ख्यातिश्च वेदान्तसूत्रभाष्यकारादिसंमता इति सिद्धम् ।

अनिर्वचनीयविषयकः अध्यासः । तस्य पूर्वानुभवजन्यसंस्कारः निमित्तकारणम् । उपादानं तु दण्डायमाना अनिर्वचनीया अविद्या । इदं रजतमिति यज्ज्ञानं तन्मिथ्येति प्रत्ययात् अध्यासो मिथ्या । अतः तदुपादानमपि अनिर्वचनीयं मिथ्याभूतमेव । उपादानस्य सद्रूपत्वे तदुपादेयस्याध्यासस्यापि सद्रूपता स्यात् । उपादानस्य जन्यत्वे तस्य तस्यान्यान्योपादानकल्पनया अनवस्था स्यात् । अतः अनादिः दण्डायमाना अविद्या अध्यासोपादानम् । सैव माया–प्रकृत्यादिशब्दैः श्रुतिषु भाष्यादिषु च व्यवह्रियते ।

एतादृशाविद्यायां, 'अनादिमायया सुप्तः,' 'अजामेकाम्, इत्यादिवचनानि प्रमाणानि । अस्यामेव प्रलये संस्कारा लीना वर्तन्ते । सर्गकाले चास्या आविर्भवन्ति । अत एव, सुषुप्तिकाले प्रलयकाले च अहङ्काराध्यासकारणी-

भूता पूर्वानुभववासना अविद्यायां (अज्ञाने) मायायां तिष्ठतीति द्योतनायैव अध्यासभाष्ये, 'मिथ्याज्ञाननिमित्तः अहमिदं, ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः।' इति भाषितं भगवत्पादैः। तत्र मिथ्या च तदज्ञानमिति व्युत्पत्त्याश्रयेण मिथ्याभूतानाद्यज्ञानपरतया मिथ्याज्ञानशब्दं व्याचक्षते अद्वैतानन्दस्वामिपादाः। कारणीभूता अविद्या एका। तत्कार्यभूता भ्रमतज्जन्यसंस्काररूपा अपरेति अविद्याद्वयमिति भामतीकाराः। तथा च भामती—'अनिर्वाच्याविद्याद्वितयसच्चिवस्य प्रभवतो विवर्ता यस्यैते वियदनिलतेजोऽबवनयः।' इति। तत्र कार्यरूपाविद्या शास्त्रोपोद्घातप्रक्रियायामध्यासभाष्ये निरूपिता, कारणीभूता तु, देवताधिकरणे इति श्रीवाचस्पतिमिश्रैरभिहितम्।

'नासद्रूपा न सद्रूपा माया नैवोभयात्मिका।
अनिर्वाच्या ततो ज्ञेया मिथ्याभूता सनातनी॥' इति

बृहन्नारदीयं इमामेवाविद्यां, अनादिभूतां सदसद्विलक्षणां अनिर्वचनीयां जगत्प्रकृतिं मायां स्वरसतः प्रतिपादयति।

प्रलयानन्तरं सर्गाद्यकालभाविनि अहङ्काराध्यासे निमित्तभूतः पूर्वपूर्वभ्रमाहितसंस्कारः प्रलये किमाश्रित्य तिष्ठेत्।

शुद्धचैतन्यस्य तदनाश्रयत्वात् बुद्ध्यादिसृष्टेस्तदधीनत्वेन तदाश्रयत्वस्य बुद्ध्यादावसंभवात् । अनादिमायामविद्यामाश्रित्य संस्काराः तिष्ठन्ति । सर्गादौ ततः समुद्भवन्ति, मण्डूकवासनावासितमृद इव वर्षाकाले संस्काराः । ततश्चाध्यासो भवति ।

एतेन, भ्रमः स्थूलाविद्या, तज्जनकसंस्कारः सूक्ष्माविद्या, न ततोऽतिरिक्ता दण्डायमाना अविद्यास्ति, मानाभावादिति परास्तम् । प्रलये सर्गादौ भ्रमकारणवासनाधारतया तादृशाविद्यासिद्धेः निष्प्रत्यूहत्वात्, 'अजामेकाम्' 'अनादिमायया' इत्यादिनैकप्रमाणवचनसिद्धत्वाच्च ।

'भ्रमात्संस्कारतश्चान्या मण्डूकमृदुदाहृतेः ।
भावरूपा मताऽविद्या स्फुटं वाचस्पतेरिह ॥' इति कल्पतरुश्लोके, वाचस्पतेः इत्युक्त्या सूत्र–भाष्यकारयोरनभिमतत्वं, इहेत्यनेन वाचस्पतेरपि अन्यत्र तदनभिमतमित्यादि कुसृष्टिव्याख्यानं केवलाभिनिवेशमूलकम् । एवमेव, प्रकृतिशब्देन भ्रमकारणवासनासमूहोऽभिधीयते । तस्या अजत्वं एतत्सर्गेऽनुत्पद्यमानत्वादुपपादनीयम्, इत्यादिरूपेण श्रुति-भाष्यव्याख्यानमस्वारसिकं केवलाभिनिवेशमूलकमिति, ग्रन्थ-

परिशीलिनां सुबोधमेव । उपोद्घातप्रक्रियायां बन्धरूपानर्थकरत्वेन कार्याध्यासस्यैव निरूपणात्, तस्यैव 'तमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते ।' इति भाष्ये उपसंहारः कृतः । तत्रापि अहमित्यस्याध्यासत्वमविद्यात्वमवश्यं प्रतिपादनीयम् । 'अहं ममेत्यविद्येयम्' इति विष्णुपुराणोक्त्या तस्याविद्यात्वम् द्रढीकृतमिति श्रीमदद्वैतानन्दस्वामिपादाः व्याचक्षते । एवंच मूलाविद्यायाः सत्वे एवंलक्षणमध्यासमपि इति भाष्यकारा ब्रूयुः, इति शङ्काया नावसरः इत्यवधेयम् । तदेवं नव्यशान्दिकादृता सदसत्ख्यातिः, अनिर्वचनीयख्यातिनिराकृतिश्च न समीचीनपद्धतिमध्यास्ते, इति शिवम् ।

इति षष्ठोल्लासः समाप्तः

M. S. P SHARMA
C/o-Study
W-176, Sec
Ph. 011-89-28709
201301
सप्तमोल्लासः

अन्यथाख्यातिवादिनः तार्किकाः, शुक्तिशकलादिकं रजतत्वेनावगाह्य इदं रजतमिति प्रत्यक्षविभ्रमो जायते इति वदन्ति । इदं रजतत्वेन जानामीति अनुव्यवसायप्रत्यक्षं, नेदं रजतमिति बाधज्ञानानन्तरं इदं रजतत्वेनावेदिषमित्यनुभवश्चान्यथाख्यातौ प्रमाणम् । इदं रजतत्वेन जानामि इति वाक्यजन्यबोधे द्वितीयान्तेदंपदार्थेन पुरोवर्तिशुक्तिशकलविशेष्यकत्वेन विशिष्टे धात्वर्थे ज्ञाने रजतत्वेनेति तृतीयान्तार्थस्य रजतत्वप्रकारकत्वस्य वैशिष्ट्यं भासते । उद्देश्यविधेयभावमहिम्ना उद्देश्यतावच्छेदकीभूतपुरोवर्तिविशेष्यकत्व — विधेयभूतरजतत्वप्रकारकत्वयोः अवच्छेद्यावच्छेदकभावो भासते । ययोः विषयतयोर्निरूप्यनिरूपकभावः, तन्निरूपितविषयितयोरेवावच्छेद्यावच्छेदकभावात्, वाक्यबोध्यधात्वर्थज्ञानस्य पुरोवर्तिविशेष्यतानिरूपितरजतत्वप्रकारताशालित्वं लभ्यते । ततश्च तादृशशब्दाभिलप्यप्रत्यक्षस्यापि तादृशविषयताशालिज्ञानविषयकत्वात् तेन प्रत्यक्षेण ज्ञानस्य शुक्तिनिष्ठविशेष्यतानिरूपितरजतत्वनिष्ठप्रकारताशालित्वं सिद्ध्यति ।

Prof. M. S. P SHARMA
C/o-Study
W-176, Sec
Ph. 011-89-28709
201301

इदं रजतमिति भ्रमे इदमर्थः इन्द्रियसंयोगेन लौकिक-संनिकर्षेण भासते । रजतं च भासमानं नान्तरम्, तस्या-प्रामाणिकत्वात् । नाप्यत्यन्तासत्, तस्येन्द्रियसंनिकर्षाभावेन प्रत्यक्षे भानायोगात् । नापि तत्कालोत्पन्नं रजतं, रजता-वयवरूपसामग्रीविरहेण रजतोत्पत्तेरसंभवात् । नापि रजत-संस्कारसहकृताविद्याकार्यं नेदं रजतमिति ज्ञानबाध्यं चानिर्वच-नीयं रजतम्। जलबुद्बुदोत्पत्तिविनाशवत् तादृशप्रातिभासिक-रजतोत्पादनाशयोरननुभवेन तादृशे रजते प्रमाणाभावात् । किन्तु आपणादौ विद्यमानं परमार्थरजतमेव । न च तेन चक्षुषः संयोगाभावात् कथं तद्रजतं चाक्षुषभ्रमे भासेतेति वाच्यम् । द्रव्यविषयकलौकिकचाक्षुषप्रमायामेव चक्षुः संयोगस्य हेतुत्वात्, तदभावेऽपि उपनयवशात् चाक्षुषभ्रमे तस्य भाना-विरोधात् । उपनयश्च संस्कारः, तस्य सर्वसंमतत्वात् । रजतभ्रमस्य संस्कारजन्यत्वे स्मृतित्वापत्तिरिति यदि मन्यते । तदा रजतस्मरणमेव ज्ञानलक्षणात्मकः अलौकिकः संनिकर्षः । आवश्यकश्च ज्ञानलक्षणाभ्युपगमः । कथमन्यथा चन्दन-खण्डदर्शनमात्रेण सुरभिश्चन्दनखण्डः इति चाक्षुषप्रत्यक्षमुपपद्यते। सौरभेण चक्षुषः योग्यस्य लौकिकसंनिकर्षस्याभावात् । अतः तत्र जातसौरभस्मरणमेव चक्षुषः सौरभेण संनिकर्षः इति

स्वीकरणीयम् । एवं घटज्ञानानन्तरजाते घटमहं जानामीति अनुव्यवसाये मानसप्रत्यक्षे घटस्य भानं ज्ञानलक्षणयैव । न हि मनसः घटेन व्यवसायज्ञानं विना संनिकर्षोऽस्ति, मनसः बहिरस्वातन्त्र्यात् । तथाचावश्यकज्ञानलक्षणयैवापणस्थरजतस्य प्रत्यक्षे भानं संभवति । न च ज्ञानलक्षणया सौरभस्य भानस्थले, सौरभं पश्यामीति अनुभवाभावेन ज्ञानलक्षणायाः लौकिकविषयतानियामकत्वं नास्ति । अतः रजतं पश्यामीत्यनुभवः कथमुपपद्यते इति वाच्यम् । दोषविशेषस्यैव लौकिकविषयतानियामकत्वसंभवात् । एवं सर्वत्र भ्रमे संनिकर्षासंभवो नास्ति । रङ्गरजतयोः इमे रजतरङ्गे इति भ्रमस्थले भ्रमविषययोः लौकिकसंनिकर्षस्यैव सद्भावात् ।

ननु इदं रजतमिति ज्ञानस्य भ्रमत्वं नाम रजतत्वाभाववच्छुक्तिविशेष्यकत्वे सति रजतत्वप्रकारकत्वम् । भासमानवैशिष्ट्यस्य प्रतियोगित्वं प्रकारत्वं, अनुयोगित्वं विशेष्यत्वम् । यद्यत्र भ्रमे शुक्तिशकलानुयोगिकं रजतत्वप्रतियोगिकं वैशिष्ट्यं भासते, तदा तादृशवैशिष्ट्यप्रतियोगिनः रजतत्वस्य प्रकारता, वैशिष्ट्यानुयोगिनः शुक्तिशकलस्य विशेष्यता च सिद्ध्यतीति भ्रमत्वमुपपद्यते । रजतत्वप्रतियोगिकं शुक्तिशकलानुयोगिकं

वैशिष्ट्यं अलीकमेव । तथा च तादृशस्यासतः वैशिष्ट्यस्य भानात् असत्ख्यात्यापत्त्या बौद्धमतप्रवेशापत्तिरिति चेन्न ।

अलीकसंसर्गः भ्रमे भासते इति पक्षे तार्किकाणां न निर्भरः । तत्पक्षे बाह्यमतप्रवेशापत्तिः दोषो भवत्येव । परं तु इदं रजतमिति भ्रमे पुरोवृत्ति रजतं तादात्म्यं चेति त्रितयं भासते । त्रितयमपि सदेव। प्रकारत्वं विशेष्यत्वं च स्वरूपसंबन्धविशेषः । "प्रकाशस्य सतः तदीयतामात्र-निबन्धनः स्वभावविशेषो विषयता" इति आचार्योक्तेः । इत्थं च रजतत्वप्रतियोगिकस्य शुक्तिगतस्य वैशिष्ट्यस्य भानं नास्तीति न असत्ख्यात्यापत्तिः । 'असदेव रजतमभात्' इत्यनुभवश्च पुरोदेशे अवर्तमानत्वमेवावगाहते न अत्यन्ता-सत्वम् । सन्निकर्षाभावेनासतः भानायोगात् ।

इदं रजतमित्यत्र, रजतस्य तादात्म्येन, रजतत्वस्य च धर्मिपारतन्त्र्येण इदमि–पुरोवर्तिनि विशेषणतया भानमस्ति । नेदं रजतमिति ज्ञानेन पुरोवर्तिनि रजतत्वनिषेधकेन पूर्वज्ञानस्य भ्रमत्वं ज्ञाप्यते इति भ्रमत्वज्ञापकतारूपं बाधकत्वं नेदं रजत-मिति ज्ञानस्य । तस्मात् सन्मात्रविषयकं विशेष्यावृत्ति-प्रकारकं–व्यधिकरणप्रकारकं ज्ञानमन्यथाख्यातिः–विभ्रमः इति वदन्ति ।

तत्रेदं चिन्त्यते—इदं रजतमिति भ्रमे आपणस्थं सत्यं रजतं भासते इति न युज्यते । द्रव्यनिष्ठविषयतासंबन्धेन प्रत्यक्षसामान्यं प्रति इन्द्रियसंयोगस्य हेतुता लाघवात् । प्रत्यक्षसामान्यसामग्र्याः इन्द्रियसंयोगस्यापणस्थरजते अभावान्न तत्र चाक्षुषप्रत्यक्षं जायेत । न च लौकिकप्रमारूपप्रत्यक्षे इन्द्रियसंयोगः कारणम्, भ्रमादौ तूपनयः कारणमिति वाच्यम् । तथा हेतुताकल्पने गौरवात्, निर्विकल्पकप्रत्यक्षसाधारण्येन चोक्तहेतुताया असंभवात् । अन्यथाख्यातिवादितार्किकमते निर्विकल्पकस्य भ्रमप्रमावहिर्भूतत्वाङ्गीकारात् । तदुक्तम्—अस्य विभागस्य स्वशिष्यानेव प्रत्युचितत्वादिति ।

किंच रजतस्मरणरूपज्ञानलक्षणप्रत्यासत्त्या न रजतस्य भ्रमे भानं युक्तम्, ज्ञानस्य प्रत्यासत्तित्वे मानाभावात् । न च सुरभिश्चन्दनखण्डः इति चाक्षुषप्रत्यक्षे सौरभस्य, घटमहं जानामीत्यनुव्यवसाये घटस्य च भानाय, ज्ञानलक्षणप्रत्यासत्तिस्वीकार आवश्यकः इत्युक्तमिति वाच्यम् । चन्दनखण्डं पश्यामि सौरभं स्मरामि इत्येव ज्ञानानुभवात् सौरभे चाक्षुषत्वावच्छिन्नाधारताविरहेण चाक्षुषे सौरभभानानुरोधेन ज्ञानलक्षणायाः प्रत्यासत्तेरनावश्यकत्वात् । व्यवसायातिरिक्तानुव्यवसायानङ्गी-

कारेण अनुव्यवसाये मानसे घटादिभानायापि ज्ञानप्रत्यासत्तेरनङ्गीकार्यत्वात्।

अपि च, ज्ञानस्य प्रत्यासत्तित्वे अनुमितिमात्रोच्छेदापत्तिः। पर्वतो वह्निमानित्यत्र इन्द्रियसंनिकर्षस्य वह्निज्ञानस्य अलौकिकवह्निविशिष्टपर्वतप्रत्यक्षहेतोः, वह्निव्याप्यधूमवान्पर्वतः इति परामर्शस्यानुमितिहेतोश्च सत्वेऽपि समाने विषये प्रत्यक्षसामग्र्याः प्रबलत्वात् वह्निविशिष्टपर्वतविषयकमलौकिकप्रत्यक्षमेव स्यात् नानुमितिः। न चानुमितौ समानविषयकलौकिकप्रत्यक्षसामग्र्येव प्रतिबन्धिका, नालौकिकप्रत्यक्षसामग्रीति नोक्तानुमित्युच्छेदापत्तिरिति वाच्यम्। लाघवेन समानविषयकप्रत्यक्षसामग्रीत्वेनैव प्राबल्यात्। अन्यथा अलौकिकप्रत्यक्षसामग्र्यपेक्षया अनुमितिसामग्र्याः बलवत्त्वे, यत्र स्थाणौ स्थाणुर्वा पुरुषो वायमिति संशयानन्तरं पुरुषत्वव्याप्यकरादिमानयमिति भ्रमात्मकं ज्ञानं जातम्, तत्र तदनन्तरं अयं पुरुषः इति भ्रमात्मकं प्रत्यक्षं न स्यात्। तत्रालौकिकप्रत्यक्षसामग्र्या एव ज्ञानलक्षणप्रत्यासत्तिघटितायाः सत्त्वेन, तस्याः प्राबल्याभावेन तया प्रत्यक्षजननासंभवात्। न च तत्र पुरुषत्वस्यानुमितिरेव न प्रत्यक्षमिति वाच्यम्। पुरुषं पश्यामीत्यनुभवात् पुरुषमनुमिनोमीत्यनुभवाभावाच्च। तथाच पर्वतो वह्निमानिति

ज्ञानस्यालौकिकप्रत्यक्षत्वादनुमित्युच्छेदापत्तिर्दुर्वारा । न चेन्द्रियाणां स्वायोग्यमुख्यविशेष्यकज्ञानजनकत्वाभावात् परमाणुः रूपवान् इति चाक्षुषस्यालौकिकस्यासंभवेन तादृशज्ञानस्यानुमितित्वमेव स्वीकरणीयमिति नानुमितिमात्रोच्छेद इति वाच्यम् । अतीन्द्रियपक्षकस्थलेऽपि मानसस्यालौकिकप्रत्यक्षस्य संभवेनानुमित्युच्छेदापत्तिसंभवात् ।

ननु तथापि नानुमितिमात्रोच्छेदः, अप्रसिद्धसाध्यकस्थले ज्ञानप्रत्यासत्तिरूपालौकिकप्रत्यक्षसामग्र्या असंभवात् । गन्धेन पृथिवीत्वावच्छिन्ने पृथिवीतरभेदसाधने, तादृशानुमितेः पूर्वं पृथिवीतरभेदः कुत्रापि न प्रसिद्धः । तथापि साध्याघटितव्यतिरेकव्याप्तिविषयकात् इतरत्वव्यापकीभूताभावप्रतियोगिगन्धवती पृथिवी इति परामर्शात्, पृथिव्यामितरभेदः इत्याकारिका इतरभेदविशेष्यिका पृथिव्युद्देश्यकेतरभेदविधेयकानुमितिः स्वीक्रियते । न च तत्र पूर्वं साध्यज्ञानमस्ति । येन साध्यांशे अलौकिकविषयताशालिप्रत्यक्षसामग्रीप्राबल्यात् प्रत्यक्षोत्पत्त्या अनुमितेरुच्छेद आशङ्क्येत । तथाच नानुमितिमात्रोच्छेदापत्तिरिति चेन्न । अर्थापत्तेः प्रमाणान्तरत्ववादिभिः व्यतिरेकव्याप्तिज्ञानकारणताया अनङ्गीकारेण तादृशानुमितेरभावात् अनुमितिसामग्र्याः क्लृप्तता न वक्तुं शक्यते ।

ननु परामर्शोत्तरं जायमानज्ञानस्य अलौकिकप्रत्यक्षता-स्वीकारे, परामर्शादेः तत्रोपयोगो न स्यात् । इष्टापत्तौ च, धूमेन पर्वते वह्निर्ज्ञातः, पक्षतया पर्वते वह्निर्ज्ञातः इति धीर्न स्यात् । अतः प्रत्यक्षसामग्रीविलक्षणसामग्रीजनितमप्रत्यक्ष-मनुमितिरूपं ज्ञानमङ्गीकार्यमिति नानुमितिमात्रोच्छेद इति चेन्न ।

तादृशालौकिकप्रत्यक्षस्य प्रमात्वनिश्चये, वह्निप्रमात्व-व्याप्यस्य वह्निव्याप्यवद्विशेष्यकवह्निप्रकारताशालिज्ञानत्वस्य निश्चयः प्रयोजकः । तत्र वह्निव्याप्यवान् पर्वतः इति परामर्शः उपयुज्यते । पक्षताया अनुमितिहेतुता प्राभाकरादिभिः बहुभिः नाङ्गीकृतेति पक्षतया पर्वते वह्निर्ज्ञातः इति धीर्नोपयते । न च कार्यमात्रवृत्तेः वह्निमनुमिनोमीति धीसिद्धायाः अनुमितित्वजातेः परामर्शकार्यतावच्छेदकत्वमिति वाच्यम् । वह्निव्याप्यवत्ता-निश्चयनिश्चितप्रामाण्यकप्रत्यक्षत्वमेवानुमितित्वं, न जातिरिति स्वीकारसंभवात् । तस्मात् अनुमितिमात्रोच्छेदापत्त्या न ज्ञानलक्षणा प्रत्यासत्तिरिति सिद्धम् ।

यत्र यत् पूर्वमवगतं तस्मिन्नेव पुनर्दृश्यमाने तज्ज्ञानस्य, यदवच्छेदेन यत् पूर्वमवगतं, तद्वत्त्वेन दृश्यमाने तज्ज्ञानस्य वा तदुपनायकत्वेन, पूर्वं रजतत्ववत्त्वेन रजतत्वावच्छेदकवत्त्वेन वा

अनवगते शुक्तिशकले रजतज्ञानस्य संनिकर्षत्वं न युज्यते इत्यपि वदन्ति ।

यत्तु सर्वत्रेन्द्रियसंनिकर्षासंभवो न भवति । रङ्ग-रजतयोः इमे रजतरङ्गे इति भ्रमस्थले रङ्गरजतयोरिन्द्रियसंनिकर्षस्य सौलभ्यादिति । तन्न । क्वचिदनुमितौ पूर्वं विद्यमानोऽपि विषयः यथा न जनकः, अनुमितेः प्रत्यक्षत्वापत्तिरूपबाधकात् । तथा इमे रजतरङ्गे इति भ्रमस्थले विद्यमानोऽपि रजतेन्द्रियसंनिकर्षः न हेतुः, रजतत्वप्रकारकज्ञानस्य प्रमात्वापत्तिरूपबाधकसत्त्वात् । अधिकमाकरे द्रष्टव्यम् ।

अपिच, भासमानवैशिष्ट्यस्य प्रतियोगित्वं प्रकारता, अनुयोगित्वं विशेष्यता इति तार्किकैः स्वीकारात्, इदं रजतमिति भ्रमे रजतत्वाभाववति रजतत्वप्रकारकत्वपर्यवसितस्या व्यधिकरणप्रकारत्वस्योपपत्तये, रजतत्वप्रतियोगिक— शुक्तिशकलानुयोगिकवैशिष्ट्यं भासते इत्युपेयम् । तच्चान्यत्र नास्ति । असतश्च संनिकर्षाभावेन प्रत्यक्षं न संभवतीति अकामेनापि अनिर्वचनीयं मायिकं तादृशवैशिष्ट्यं भासते इति स्वीकरणीयमिति अनिर्वचनीयवादापत्तिर्दुर्वारा ।

प्रकारत्वं विशेष्यत्वं च ज्ञानविषययोः स्वरूपसंबन्धविशेष एव, न वैशिष्ट्यस्य प्रतियोगित्वमनुयोगित्वं चेति स्वीकारेऽपि अनिर्वचनीयवादापत्तिः । स्वं न स्वीयं, स्वं न स्वस्य संबन्धः इत्यनुभवात् स्वरूपस्य संबन्धत्वं न संभवति । तद्व्यक्तित्वेन संबन्धत्वं ज्ञानत्वादिना संबन्धित्वमिति रूपभेदेन भेदं स्वीकृत्य स्वस्यापि स्वसंबन्धत्वस्वीकारेऽपि, ज्ञानत्वविशिष्टस्य तद्व्यक्तित्वविशिष्टाभेदे तयोर्भेदासंभव इति भेदे मिथ्यात्वस्य वक्तव्यत्वेनानिर्वचनीयवादापत्तिर्दुर्वारा ।

अपिच, सर्वत्र भ्रमस्थले अन्यत्र स्थितस्य सत्यस्यारोपोपगमेन अन्यथाख्यातिनिर्वाहः न संभवति । 'अस्ति शशस्य शृङ्गम्, तदेवंलक्षणमरण्यपतितमन्विष्य लब्धुं शक्यम्' इति प्रतारकवाक्यात् अवाप्तमोहः कश्चित् तथैवारण्यं गत्वा तदन्वेषमाणः. उक्तलक्षणं काष्ठं शृङ्गं वा दृष्ट्वा, इदं शशशृङ्गमित्यनुभवति । तत्र शशस्य पुरतोऽनवस्थितत्वात् शशे शृङ्गस्यारोपात्मकोऽनुभवः इति न वक्तुं शक्यते । अतः पुरोवर्तिनि शशशृङ्गतादात्म्यावगाही भ्रमः इति वक्तव्यम् । न हि तत्र सत्यस्यासंनिहितस्य शशशृङ्गस्यारोपः संभवति । अतः तत्र तत्कालोत्पन्नं तत्त्वज्ञानबाध्यं मायिकमनिर्वचनीयमेव शशशृङ्गं भासते इत्यकामेनापि अनिर्वचनीयख्यातिरेव वाच्येति, नान्यथाख्यात्यात्मकः विभ्रमः संभवदुक्तिकः इति बोध्यम् ।

इति सप्तमोल्लासः

अष्टमोल्लासः

औपनिषदाः, इदं रजतमित्यादिभ्रमे, सत्वेनासत्वेन च निर्वचनानर्हं अनिर्वचनीयं सद्विलक्षणत्वे सति असद्विलक्षणं मायिकं तत्कालोत्पन्नं अधिष्ठानतत्वज्ञाननाश्यं च मिथ्याभूतं रजतादिकमेव भासते इति अनिर्वचनीयख्यातिं व्यवस्थापयन्ति। बाधानन्तरं जायमानं मिथ्यैव रजतमभादिति प्रत्यक्षमेव तावत् भ्रमविषयस्यानिर्वचनीयत्वे प्रमाणम् ।

न चासत्पर्यायः मिथ्याशब्दः इति निरुक्तप्रत्यक्षमसद्विषयत्वमेवावगाहते इति वाच्यम् । नृश्रृङ्गादिसाधारणासत्वस्य संनिकर्षाभावेन प्रत्यक्षविषयत्वासंभवेन तत्र मिथ्याशब्दस्यासत्वार्थकत्वाभावात् । न चासदेव रजतमभादिति प्रतीत्या भ्रमे भासमानमसदेवेति वाच्यम् । न सत्–असदिति व्युत्पत्त्या सद्वैलक्षण्यस्यैवासत्पदबोध्यत्वात् । सद्विलक्षणत्वे सत्यसद्विलक्षणत्वमनिर्वचनीयत्वम् । तदेकदेशभूतं सद्वैलक्षण्यमेव निरुक्तप्रतीतिरवगाहते । नचैवं 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यत्र सत्यपदमपि असद्वैलक्षण्यार्थकमेव स्यादिति वाच्यम् । ब्रह्मणः सद्रूपत्वे बाधकविरहेण तत्र सत्यपदस्यासद्वैलक्षण्यार्थकत्वाभावात् । असदेव रजतमभादित्यत्र शशशृङ्गादि-

साधारणस्यासत्वस्य प्रत्यक्षायोग्यतया बाधकसद्भावेन असत्पदस्य सद्वैलक्षण्यार्थकता इति विशेषात् । अपिच, अबाध्ये रूढस्य सत्यशब्दस्य असद्वैलक्षण्ये लक्षणा आश्रयणीया । असत्पदस्य तु न सदिति व्युत्पत्त्या सद्वैलक्षण्यबोधकतासंभवेन न लक्षणा इत्यपि बोध्यम् ।

सर्वत्र भ्रमे असंनिहितवस्तुविषयकत्वं न संभवति । शशस्य शृङ्गं नास्तीति ज्ञानशून्यस्य शशशृङ्गलक्षण–तत्प्रयोजनादिप्रतिपादकेन प्रतारकवाक्येन सञ्जातमोहस्य अरण्ये शशशृङ्गं गवेषमाणस्य, प्रतारकोक्तलक्षणयुतस्य काष्ठस्य दर्शने, इदं शशशृङ्गमिति भ्रमो जायते । न च तत्रासंनिहितं शशशृङ्गवस्त्वस्ति । येन तद्विषयत्वमस्योच्येत । न वा तत्र शशः संनिहितः, येन तत्र शृङ्गस्य भ्रमः इति वक्तुं युज्येत । ततश्च तत्राभिनवानिर्वचनीयशशशृङ्गस्यैव विषयता, तदुत्पादिका च दोषघटितसामग्रीति कल्पनीयम् । एवं स्वप्ने पशु–पक्षिनराद्यात्मकस्य कुत्राप्यदृष्टपूर्वस्य दर्शनं भवति । स्वप्ने असंभाव्यमानस्याभावात् । तादृशस्वाप्नभ्रमविषयः नासंनिहितः पदार्थः, अत्यन्तमप्रसिद्धेः । अपि तु तत्कालोत्पन्नः अभिनवः अनिर्वचनीयः पदार्थ एवेति वक्तव्यम् । तस्य

चात्पत्तिः मिथ्यात्वेन बोधनपूर्वकं श्रूयते, 'न तत्र रथा न रथयोगा न पन्थानो भवन्ति । अथ रथान् रथयोगान् पथः सृजते ।' इति, 'स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति ।' इति च श्रुतिषु । एवं च क्वचित् दोषघटितसामग्र्या अभिनवपदार्थोत्पत्तेरावश्यकत्वात्, शुक्ति-रजतादिभ्रमस्थलेऽपि दोषघटितसामग्र्या अभिनवरजतोत्पत्तिः स्वीकर्तुमुचिता । तेषामप्युत्पत्तिः 'सत्यं चानृतं च सत्य-मभवत्' । इति श्रुतिसिद्धा । परमार्थसत्यस्य ब्रह्मणः व्यावहारिकसद्रूपघटादिरूपेणेव अनृतेन प्रातिभासिकशुक्ति-रजतादिरूपेणापि भवनस्य तादृशश्रुत्या बोधितत्वात् । ततश्च सर्वत्र भ्रमे दोषघटितसामग्रीसमुत्पन्नमभिनवमनिर्वचनीयरज-तादिकमेव भासते इति सिद्ध्यति ।

न च तदेवेदं रजतमिति प्रत्यभिज्ञाभ्रमे पूर्वानुभूत-(तत्पदार्थ) रजतविषयकत्वं स्वीकर्तव्यमिति वाच्यम् । तत्रापि तत्ताविशिष्टस्य रजतस्य भानेन तस्यैवानिर्वचनीयस्योत्पत्त्यङ्गी-कारेण सामञ्जस्यात् । अत एव, असदिदं रजतमिति भ्रमस्थले असतो भ्रमविषयत्वेन असत्ख्यात्यापत्तिरिति परास्तम्।

तत्रापि असत्वविशिष्टस्यानिर्वचनीयरजतस्यैव भानेन असत्ख्यात्यापत्तेरसंभवात् ।

ननु अभिनवरजतोत्पत्तिविनाशयोः जले बुद्बुदोत्पत्तिविनाशयोरिव कुतो न प्रतीतिरिति चेन्न ।

भ्रान्तिसमये न रजतस्योत्पादविनाशयोः प्रतीतिःसंभवति। रजते पूर्वोत्पन्नेदमंशतादात्म्यज्ञानस्य प्रतिबन्धकत्वात् नोत्पत्तिप्रतीतिः संभवति । भ्रमसमये तत्त्वज्ञानरूपनाशकाभावेन नाशस्याभावान्न नाशस्यापि प्रतीतिः । बाधज्ञानदशायां तु रूप्यं नास्ति, नासीत्, न भविष्यतीति रजतस्य त्रैकालिकनिषेधरूपात्यन्ताभावग्रहस्य प्रतियोगिज्ञाने इव उत्पत्तिविनाशप्रतीतावपि प्रतिबन्धकत्वात् नोत्पत्तिविनाशप्रतीतिः । न हि अत्यन्ताभावाधिकरणत्वेन प्रतीते कुत्रापि उत्पादविनाशप्रतीतिः । फलबलेन चात्यन्ताभावग्राहकसामग्र्याः बलवत्त्वात् अत्यन्ताभावबुद्धेः विनाशादिबुद्धिप्रतिबन्धकत्वम् । उत्पादाधिकरणेऽपि प्रतीतिबलादत्यन्ताभावः सिद्ध एव । तदुक्तम्—'तर्हि उत्पादाधिकरणे अत्यन्ताभावः कथम् ? प्रतीतिमुपालभस्व ।' इति ।

अथवा, समानसत्ताकयोरेव भावाभावयोर्विरोधः, न विषमसत्ताकयोः । तथाच प्रातिभासिकरजतादिमति व्याव-

हारिकारजतात्यन्ताभावसद्भावे न किमपि बाधकम् । यद्वा, पारमार्थिकत्वेन रजताभावधीरेव बाधधीः । रजतादिमत्यपि तादृशव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावः संभवत्येवेति तद्धियः प्रतिबन्धकत्वात् न विनाशप्रतीतिप्रसङ्गः ।

वस्तुतस्तु अनिर्वचनीयख्यातिपक्षे रजतगतोत्पादविनाश-प्रतीतेरिव असत्ख्यातिपक्षे रजतगतासत्वस्य, अन्यथाख्यातिपक्षे रजतगतस्यासंनिहितत्वस्य च प्रतीतेरापत्तिः संभवति । तस्मात् मिथ्यात्वमिव रजतगतोत्पादादिकमप्यव्यक्तत्वात् भ्रान्तिकाले न प्रतिभासते । विचारदशायां प्रमाणवृत्त्या ज्ञायते इत्येव सर्वैः वादिभिरुपेयमिति । न किञ्चिदेतत् ।

अनुमानमपि अनिर्वचनीयत्वे प्रमाणम् । विमतं सत्व-रहितत्वे सति असत्वरहितत्वे सति सदसत्वरहितं बाध्यत्वात्, यन्नैवं तन्नैवम्, ब्रह्मवत् इति । न चात्र सत्वाभावासत्वा-भावयोः सामानाधिकरण्यमप्रसिद्धमिति साध्याप्रसिद्धिरिति वाच्यम् । सत्वासत्वे समानाधिकरणाभावप्रतियोगिनी धर्म-द्वयत्वात् रूपरसवत्, इति सामान्यतः साध्यप्रसिद्धेः । अत्रा-नुमाने परस्परसमानाधिकरणौ यौ अत्यन्ताभावौ तत्प्रतियोगिनी इति साध्यार्थः । रूपाभावः रसाभावश्च यथा वाय्वादौ

समानाधिकरणौ, तादृशाभावप्रतियोगित्वं रूपरसद्वयस्य । तद्वत् सत्वासत्वद्वयस्य सत्वाभावसमानाधिकरणः यः असत्वाभावः असत्वाभावसमानाधिकरणश्च यः सत्वाभावः तत्प्रतियोगित्वं सामान्यतः पूर्वोक्तानुमानेन सिध्दयतीति बोध्यम ।

एवं ख्यातिबाधान्यथानुपपत्तिरूपार्थापत्तिरपि अनिर्वचनीयत्वे प्रमाणं बोध्यम् । विमतं रूप्यादि सच्चेन्न बाध्येत । असच्चेन्न प्रतीयेत । बाध्यते प्रतीयते च । तस्मात् सदसद्विलक्षणत्वादनिर्वचनीयम् । अत्र सत्वं–अबाध्यत्वं–त्रैकालिकनिषेधाप्रतियोत्वमापादकम् । आपाद्यं तु न तदेव भवति । अतः त्रैकालिकनिषेधप्रतियोगित्वप्रकारकप्रमाविषयत्वाभाव एव न बाध्येत इत्यनेन विवक्षितः । असच्चेन्न प्रतीयेत इत्यत्र आपादकमसत्वं–निस्स्वरूपत्वम् । सत्वेन प्रत्यक्षाभावः आपाद्यः न प्रतीयेत इत्यनेन विवक्षितः । नह्यत्यन्तासतः प्रत्यक्षं संभवति, विषयतासंबन्धेन प्रत्यक्षसामान्ये इन्द्रियसंनिकर्षस्य हेतुत्वात् तस्य चासत्यभावात् । न च तवापि मते भ्रमविषयस्य प्रातिभासिकस्यानिर्वचनीयरजतस्य ज्ञानात्पूर्वमसत्वेन तत्रेन्द्रियसंनिकर्षाभावान्न प्रत्यक्षं संभवतीति वाच्यम् । अस्मन्मते रूप्यं ज्ञातैकसत्ताकं साक्षिप्रत्यक्षगम्यम् । नात्रावरणाज्ञाननिवर्तक-

वृत्तिरपेक्ष्यते । तादृशवृत्तिजनन एवेन्द्रियसंनिकर्षस्योपयोगात् । तस्मात् शुक्तिरूप्यस्य प्रत्यक्षसामग्रीसत्वात् प्रत्यक्षं संभवति ।

ननु असद्विलक्षणं चेन्न बाध्येत, सद्विलक्षणं चेन्न प्रतीयेत । अतोऽनुपपत्त्या अनिर्वाच्यत्वाभाव एव किं न स्यादिति चेन्न । सत्वं न प्रतीतिप्रयोजकं, शुक्तिरूप्यस्यासत्वमते, अनिर्वचनीयत्वमते च प्रतीत्यनुपपत्तेः, सत्वाभावात् । उभयमतसिद्धासति शशशृङ्गादौ बाधादर्शनात् न बाध्यताप्रयोजकमसत्वमिति अनतिप्रसङ्गात् । तस्मात् मिथ्यैव रजतमभादिति प्रत्यक्षं, निरुक्तानुमानं, ख्यातिबाधान्यथानुपपत्तिरूपार्थापत्तिश्च शुक्तिरूप्यादेरनिर्वचनीयत्वे प्रमाणमिति सिद्धम् ।

शुक्तिरूप्यादेरनिर्वचनीयत्वं च, सत्वरहितत्वे सति असत्वरहितत्वे सति सदसत्त्वरहितत्वं बोध्यम् । न च सत्वविरहस्यासत्वरूपत्वात् तदधिकरणे असत्वविरहः न संभवतीति वाच्यम् । यतः अत्र सत्वनिषेध–असत्वनिषेधयोः अतात्विकः समुच्चय उच्यते । स च न व्याहतः । न च परैरपि रूप्यादौ अतात्विकस्योक्तसमुच्चयस्येष्टत्वात् किमर्थो सत्वनिषेधासत्वनिषेधयोः समुच्चयोक्तिरिति शङ्कनीयम् । प्रति-

योगिसमानसत्ताकयोः सत्वाभाव — असत्वाभावयोर्निवेशेन रूप्यादिगते सत्वे असत्वे च स्वसमानाधिकरणस्वान्यूनसत्ताकाभावप्रतियोगित्वरूपमिथ्यात्वज्ञापनाय अतात्विकनिषेधसमुच्चयोक्तेः वैयर्थ्याभावात्। न च सत्वाभावस्य सत्यत्वमङ्गीकार्यम्, अन्यथा रूप्यगतसत्वस्य सत्यत्वापत्तेरिति वाच्यम्। स्वरूपतो मिथ्याभूतस्य रूप्यस्य अधिष्ठानान्यरूपं किमपि वास्तवं न संभवतीत्यदोषात्। एकस्मिन् धर्मिणि विरुध्दोभयतात्विकता विरुध्दा। न तथा विरुद्धोभयातात्विकता विरुद्धा। स्थाणुत्वं पुरुषत्वं च परस्परविरुद्धम्। तथापि एकस्मिन् वल्मीके उभयमप्यतात्विकं प्रातीतिकं वर्तते, उभयोः भ्रमसंभवात्। न च विरुद्धयोः परस्परविरहरूपयोरेकत्रातात्विकत्वं विरुद्धम्। स्थाणुत्वपुरुषत्वयोः परस्परविरहरूपत्वाभावात् तयोर्वल्मीके अतात्विकत्वमुपपद्यते। सत्वासत्वयोः परस्परविरहरूपत्वात् नोपपद्यते इति वाच्यम्। घटः घटप्रागभावश्चेति द्वयं परस्परविरुद्धं परस्परविरहरूपं च। घटप्रागभावाभावस्य घटस्वरूपत्वात्। एतत् द्वयमपि तन्तौ अतात्विकं वर्तते इति व्यभिचारात्। न च प्रतियोगि–तदत्यन्ताभावयोरेवायं नियमः, नियामकाभावात् अस्माकमसंप्रतिपत्तेः। तस्मात् शुक्तिरूप्यादौ सत्वाभाव–असत्वाभावयोरतात्विकसमुच्चयः न व्याहत इति सिद्धम्।

वस्तुतस्तु प्रकृतलक्षणघटकयोः सत्वासत्वयोः न परस्परविरहरूपता, न वा परस्परविरहव्यापकता। किन्तु परस्परविरहव्याप्यतैव। सत्वं त्रैकालिकनिषेधाप्रतियोगित्वम्। तदभावश्च तादृशप्रतियोगित्वम्। सत्वेन प्रतीयमानत्वानधिकरणत्वमसत्वम्। तदभावश्च सत्वेन प्रतीयमानत्वम्। तथाच बाध्यत्वे सति सत्वेन प्रतीयमानत्वं निषेधसमुच्चयपर्यवसितार्थः। न चेदृशं सदसद्वैलक्षण्यं परैः स्वीकृतं शुक्तिरूप्यादौ। अतो नात्रेष्टापत्तिः संभवतीति बोध्यम्।

एतावता भ्रमस्थले अभिनवपदार्थस्योत्पादावश्यकता, तस्यानिर्वचनीयत्वे प्रमाणानि अनिर्वचनीयत्वस्वरूपं च चिन्तितानि। अथेदानीमभिनवपदार्थस्य तज्ज्ञानस्योत्पादप्रकारश्चिन्त्यते। प्रपञ्चस्य मूलप्रकृतिः अविद्या। सा च माया, प्रकृतिः, अक्षरं, योनिः, अज्ञानम् इत्यादिशब्दैः व्यवह्रियते।

'नासद्रूपा न सद्रूपा माया नैवोभयात्मिका।
अनिर्वाच्या ततो ज्ञेया मिथ्याभूता सनातनी॥'

इति बृहन्नारदीयपुराणं, सा अनादिः अनिर्वचनीया चेति स्पष्टं बोधयति। आवरण–विक्षेपशक्तिद्वयवती अविद्या। तस्याश्च अनेकाः उक्तशक्तिद्वयवत्यः अनादिभूता अवस्था वर्तन्ते। ताः

अवस्थाज्ञानपदेन व्यवह्रियन्ते। शुक्तितत्वाज्ञानमवस्थाज्ञानम्। तच्चान्वयव्यतिरेकाभ्यां शुक्तिरूप्यस्य तज्ज्ञानस्य चोपादानम्। बाह्यतमोवत् स्वाश्रयविषयकं तत् शुक्त्यवच्छिन्नचैतन्ये वर्तते। नचानादेरज्ञानस्य सादिशुक्त्यवच्छिन्नं चैतन्यं कथमाश्रयः इति शङ्कनीयम्। चैतन्यमेवाज्ञानाश्रयः। सादिशुक्तिस्तु अज्ञानाश्रयतावच्छेदिका। यथा तार्किकमते अनादेरत्यन्ताभावस्य तत्तत्कालादिरवच्छेदकः, तथेति मन्तव्यम्। शुक्त्यवच्छिन्नचैतन्याश्रिता शुक्तित्वप्रकारिका अविद्या रजताकारेण रजतज्ञानाभासाकारेण च परिणमते।

शुक्तीदमर्थस्य चक्षुषा संयोगे इदमाकारा प्रमाणवृत्तिरुदेति। एवं तद्गतचाकचक्यादिविषयकवृत्त्या रजतसंस्कारस्योद्बोधो भवति। ततः चक्षुर्गतकाचादिदोषेण उद्बुध्दरजतसंस्कारेण च सहकृता अविद्या, शुक्तितादात्म्यापन्नरजताकारेण, शुक्तिज्ञानतादात्म्यापन्नरजतज्ञानाभासाकारेण च परिणमते। चक्षुर्द्वारा अन्तःकरणस्य विषयदेशे संबन्धित्वात् तदीयवृत्तेः शुक्तीदमंशविषयस्य अन्तःकरणस्य च उपाधेः एकदेशस्थत्वेन उपहिताभेदात् विषयचैतन्यं अन्तःकरणोपहितसाक्षिचैतन्यं च अभिन्नं भवति इति विषयचैतन्ये उत्पन्नमपि रजतं साक्षिचैतन्ये

अध्यस्तमिति साक्षिभास्यं, अनन्यवेद्यं च सुखादिवत् भवति। रजतसंस्कारजन्यत्वेऽपि भ्रमस्य न स्मृतित्वापत्तिः। समानविषयकसंस्कारजन्यताया एव स्मृतित्वप्रयोजकत्वात्। स्मृतिः अनुभूतार्थविषयिणी। रजतभ्रमस्तु सजातीयरजतान्तरानुभवजन्यसंस्कारजन्या। अतः समानप्रकारकसंस्कारजन्यत्वेऽपि समानविषयकसंस्कारजन्यत्वाभावात् न भ्रमस्य स्मृतित्वापत्तिः। धर्मिज्ञानजनने एव इन्द्रियसन्निकर्षस्योपयोगः।

न च रजताकाराविद्यावृत्त्युत्पत्त्यैवोपपत्तौ रजतस्य उत्पत्तिः किमर्था इति शङ्कनीयम्। अर्थं विना रजताकारवृत्तिस्वीकारे साकारवादापत्त्या ज्ञानधर्माकारेणैव ज्ञानानां वैलक्षण्योपपादनसंभवात् बहिर्विषयविलोपापत्तिः। अतः अर्थस्योत्पत्तिरावश्यकी। अर्थ एव ज्ञानवैलक्षण्यापादकः। "अर्थेनैव विशेषो हि निराकारतया धियाम्।" इति उदयनाचार्योक्तेः॥

ननु तथाऽपि रजताकारा वृत्तिर्मास्तु। सा हि न आवरणभङ्गार्था। सर्वदा अनावृतसाक्षिचैतन्यसंबन्धात्। न हि विद्यमानं शुक्तिरूप्यं न भासते इति संभवति। अत एव साक्षिसंबन्धार्थाऽपि न वृत्तिः। तथा च रजतगोचराविद्यावृत्तिः नाङ्गीकार्या इति चेन्न।

रजतस्य प्रत्यक्षत्वसिध्दये तादृशाविद्यावृत्तिरावश्यकी । स्वाकारवृत्त्युपहितप्रमातृचैतन्यसत्तारिक्तसत्ताकत्वाभाववत्वं विषयगतं प्रत्यक्षत्वम् । तत्र परिमाणाकारवृत्तिशून्यतादशायां घटाकारवृत्तिसत्वे परिमाणस्य प्रत्यक्षत्वापत्तिवारणाय स्वाकारवृत्त्युपहितत्वं प्रमातृचैतन्ये निविष्टम् । तथा च स्वाकारवृत्त्युपहितत्वघटितप्रत्यक्षत्वसिध्दये रजताकाराविद्यावृत्तिः स्वीकार्या । न च अनावृतस्वावच्छिन्नसंवित्तादात्म्यमेव प्रत्यक्षत्वम् । नतु उक्तरूपम् । परिमाणाकारवृत्तिशून्यतादशायां न परिमाणे अतिव्याप्तिः । घटाकारवृत्त्या तदवच्छिन्नचैतन्यावरणाज्ञानभङ्गेन घटावच्छिन्नसंविदः अनावृतत्वेऽपि परिमाणाकारवृत्तेरभावे परिमाणावच्छिन्नसंविदः अज्ञानावरणभङ्गाभावेन अनावृतस्वावच्छिन्नसंवित्तादात्म्यस्य परिमाणे अभावात् स्वपदेन परिमाणस्योपादानासंभवात् । एवं च रजतस्य स्वगोचरवृत्त्यनङ्गीकारेऽपि निरुक्तं प्रत्यक्षत्वं उपपद्यते इति वाच्यम् । घटादीनां स्वविशिष्टचैतन्ये अध्यासस्वीकारे आत्माश्रयापत्त्या स्वोपहितचैतन्ये अध्यासस्वीकारात् अनावृतस्वोपहितचैतन्यतादात्म्यमेव प्रत्यक्षत्वं वक्तव्यम् । तथाच परिमाणाकारवृत्तिशून्यतादशायां परिमाणविशिष्टचैतन्यस्यावृतत्वेऽपि परिमाणोपहितघटावच्छिन्नचैतन्यस्यानावृतत्वेन स्वपदेन

परिमाणोपादानसंभवेन परिमाणे अतिव्याप्तेर्दुर्वारत्वात् । तस्मात् रजतस्य स्वाकारवृत्तिघटितप्रत्यक्षत्वसिद्ध्ये अविद्यावृत्तिः स्वीकार्या ।

किं च शुक्तिरूप्यस्मरणाय तत्संस्कारः अपेक्ष्यते । अनुभवनाश एव संस्कारः । यदि साक्षिचैतन्यमेवानुभवः तदा तस्य नित्यत्वेन नाशासंभवात् तन्नाशरूपसंस्कारः न सिद्ध्यतीति रजतसंस्कारसिद्ध्येऽपि रजताकाराविद्यावृत्तिः स्वीकार्या इति बोध्यम् ।

अत्र वदन्ति—जडानां भाने न अनावृतचैतन्याध्यस्तता-मात्रं प्रयोजकम्, पर्वतो वह्निमानित्यनुमितिविषयवह्नेः अभान-प्रसङ्गात् । वह्निमहं न जानामि इत्यनुभवेन वह्न्यादौ विषये प्रमातरि चाज्ञानं सिध्दयति । अनुमित्या अन्तः-करणावच्छेदेन वह्निविषयकाज्ञानभङ्गात् वह्निः भासते । परं तु विषयगतमावरणं न नष्टम् । आवरणसामान्याभाववत्त्वरूप-स्यानावृतत्वस्य वह्न्यवच्छिन्नचैतन्ये असत्वात्, अनावृतचैतन्या-ध्यस्तत्वाभावात् वह्नेर्भानं न स्यात् । परं तु जडानां भाने चैतन्याकारत्वमेवानुगतं प्रयोजकम् । चैतन्यं यदाकारं भवति, तत् प्रतिभासते । चैतन्यस्य तदाकारत्वं न स्वतः,

असङ्गत्वात् । किं तु, क्वचित् प्रतिबिम्बात्, क्वचित् तदाकारवृत्तिसंबन्धात् । सात्त्विकान्तःकरण–तद्धर्मज्ञानसुखादिषु स्वच्छेषु साक्षादेव चैतन्यं प्रतिबिम्बते । अतस्तेषां चैतन्याकारत्वं संभवतीति वृत्तिं विनापि भानमुपपद्यते । तामसेषु घटादिषु अस्वच्छेषु तु स्वच्छतदाकारवृत्तिसंबन्धादेव चैतन्याकारत्वम् । चैतन्यं यदाकारवृत्तौ प्रतिबिम्बते तत् भासयति, प्रतिबिम्बाश्रयवृत्तिं च भासयति, तथा दर्शनात् । शुक्तिरजतं हि तामसमस्वच्छम् । अस्वच्छरजतसंस्कारसंस्कृताविद्याकार्यत्वादस्यास्वच्छता । न हि तत्र चैतन्यं तदाकारवृत्तिसंबन्धं विना साक्षात् प्रतिबिम्बते । तस्मात् अस्वच्छतामसरजतभानाय चैतन्याकारत्वसंपादिका अविद्यावृत्तिः स्वीकरणीया। सात्त्विकान्तःकरणधर्मज्ञानसुखादीनां स्वच्छानां स्वतः चित्प्रतिबिम्बसंभवात् वृत्तिं विनैव चैतन्याकारत्वात् भानमिति न तदाकारा वृत्तिरपेक्ष्यते । तस्मात् शुक्तिरजतभानार्थमविद्यावृत्तिरावश्यकी ।

अपि च, रजतस्य विषयावच्छिन्नचिद्भास्यत्वे, अहं रजतवानिति प्रतीतिः स्यात् नतु अहं रजतज्ञानवानिति । किं च रजतस्य प्रातीतिकत्वोपपत्तये अविद्यावृत्तिः स्वीकार्या । प्रातीतिकत्वं न प्रतीतिजन्यत्वम्, संस्कारस्य प्रातीतिकत्वापत्तेः ।

किं तु प्रतीतिकालान्यकालावृत्तित्वम् । साक्षिणः प्रतीतित्वे तस्य नित्यत्वेन तत्कालान्यकालाप्रसिद्ध्या रजतस्य प्रातीतिकत्वं न सिद्ध्यतीति अविद्यावृत्तिरेव रजतप्रतीतिर्वाच्या । तत्कालान्यकालावृत्तित्वं च रजतस्याक्षतमिति प्रातीतिकत्वमुपपद्यते । तस्मात् अविद्या रजताकारेण रजतज्ञानाभासाकारेण च परिणमते इति सिद्धम् ।

ननु इदमंशे अन्तःकरणवृत्तिः, अध्यस्तरजतांशे अविद्यावृत्तिरिति वृत्तिद्वयस्वीकारे, इदमिति ग्रहणात्मकं ज्ञानं, रजतमिति स्मरणज्ञानमिति ज्ञानद्वयमङ्गीकुर्वतामख्यातिवादिनां मतप्रवेशापत्तिरिति चेन्न । अस्मन्मते इदमाकारवृत्तितादात्म्यं रजताकाराविद्यावृत्तौ भासते । तन्मते ज्ञानयोः असंसर्गाग्रहमात्रं स्वीकृतमिति वैलक्षण्यात् । न च रजतगोचराविद्यावृत्तेः चक्षुस्संनिकर्षाजन्यत्वात् रजतं पश्यामीति चाक्षुषत्वानुभवः कथं संगच्छते इति वाच्यम् । चाक्षषेदंवृत्त्यवच्छिन्नचैतन्यगताविद्यापरिणामत्वेन चाक्षुषत्वमुपचर्यते । किं च, अचाक्षुषेऽपि अनुभवत्वमात्रमादाय आत्मानं पश्यामीति उल्लेखदर्शनात्, अनुभवत्वमादाय रजतं पश्यामीत्युल्लेखो युज्यते ।

न च रजतगोचराविद्यावृत्तेरपि प्रातिभासिकत्वे, तत्प्रतिभासाय वृत्त्यन्तरं स्वीकरणीयम् । एवं तस्य तस्यापीत्यनवस्था स्यादिति वाच्यम् । रजतगोचराविद्यावृत्तेः स्वोपहितचैतन्यभास्यत्वेन वृत्त्यन्तरानपेक्षणेनानवस्थाया नावकाशः । न च तथापि ज्ञानैक्यानुभवविरोध इति वाच्यम् । विषययोस्तादात्म्याध्यासे, ज्ञानयोरपि तादात्म्याध्यासः । तथाच रजतगोचरवृत्तौ इदं वृत्तितादात्म्याध्यासेन ज्ञानैक्यानुभव उपपद्यते ।

अथवा, यथा इदमवच्छिन्नचैतन्यगताविद्यापरिणामत्वात् रजतमिदन्त्वेन भासते । तथा इदमाकारान्तःकरणवृत्त्यवच्छिन्नचैतन्यगताविद्यापरिणामत्वेन रूप्यज्ञानमिदंज्ञानत्वेन भासते । इदमाकारवृत्त्यवच्छिन्नचैतन्यगतमज्ञानं च शुक्त्यवच्छिन्नचैतन्याज्ञानमेव । तथाच न ज्ञानैक्यानुपपत्तिः । इदं रजतमिति भ्रमे इदमि रजतस्य, रजते इदमश्च तादात्म्य भासते । तत्रेदमवच्छेदेन चिति रजतं तत्तादात्म्यं, रजतत्वसंसर्गः, रजते इदंतादात्म्यं इदन्त्वसंसर्गश्चेति पञ्च पदार्थाः जायन्ते इत्यादिकमाकरे द्रष्टव्यम् ।

सर्वपरीक्षकसिद्धमारोपितस्वरूपं निरस्य, अरोपितमनिर्वचनीयमिति अनिर्वचनीयख्यातिं व्यवस्थापयन्ति मरुमरीचिकोदक-

ग्रन्थे भामत्यां श्रीवाचस्पतिमिश्राः । "तस्मान्न सत्, नापि सदसत् परस्परविरोधात् इत्यनिर्वाच्यमेवारोपणीयं मरीचिषु तोयमास्थेयम् । तदनेन क्रमेण अध्यस्तं तोयं परमार्थतोयमिव, अत एव पूर्वदृष्टमिव, तत्वतस्तु न तोयं न च पूर्वदृष्टम्, किन्तु अनृतमनिर्वाच्यम् ।" इति भामती ।

अत्र न सत् इत्यनेन, भासमानं सदेवेति सद्ख्यातिपक्षः, आन्तरं विज्ञानरूपं सदारोप्यमिति, शुक्तिकावयवैः रजतावयवैश्चारब्धे पुरोवर्तिनि शुक्तिशकले विद्यमानमेव रजतं भासते इति, देशान्तरे आपणादौ विद्यमानं रजतं भासते, इति पक्षाश्च निषेध्यतया विवक्षिताः । "नचेदमत्यन्तासत् निरस्तसमस्तस्वरूपमलीकमेवास्तु इति सांप्रतम् । तस्यानुभवगोचरत्वादुपपत्तेरित्युक्तमधस्तात् ।" इति पूर्वग्रन्थेन असत्ख्यातिपक्षः, सदुपरक्तासद्ज्ञानपक्षश्च निराकृतः । सदसत्ख्यातिपक्षश्च 'न सदसत्' इति कण्ठरवेण प्रतिक्षिप्तः । एवं सर्वपरीक्षकाभिमतख्यातिनिरासोऽभिसंहितोऽत्र भामतीनिबन्धे इति विभावनीयम् ।

भगवत्पूज्यपादाः 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इत्यध्यासलक्षणं बभाषिरे । तत्र अवभासपदं यौगिकमिति

कृत्वा अवमतः, अवसन्नो वा भासः इति संक्षिप्तं लक्षणमुक्तमवभासपदेन । अवभासपदं रूढं कृत्वा संपूर्णवाक्यं विस्तृताध्यासलक्षणबोधकमिति व्याचक्षते व्याख्यातारः ।

अ धष्ठाने असंनिहितस्यावभासः इति विस्तृतं लक्षणम् । असंनिहितत्वं चाधिष्ठाने परमार्थतः असत्वम् अधिष्ठानविषमसत्ताकत्वपर्यवसितम् । तथाच असंनिहितस्य—अधिष्ठानविषमसत्ताकस्य अवभासः इति विस्तृतमध्यासलक्षणं विवक्षितम् । अत्र प्रत्यक्षावभासार्थकेन अवभासपदेन द्विविधा असत्ख्यातिर्वारिता । असतः अपरोक्षज्ञानाविषयत्वात् । अख्यातिः, आत्मख्यातिः, अन्यथाख्यातिः, सदेव भासते इति सत्ख्यातिश्चेति चतुर्विधा सत्ख्यातिः, अधिष्ठानविषमसत्ताकत्वपर्यवसितेन असंनिहितत्वेन विशेषणेन वारिता । मतचतुष्टयेऽपि अधिष्ठानसमसत्ताकस्यैवारोप्यतास्वीकारात् । तथाच सदसद्विलक्षणमनिर्वचनीयमेवारोप्यमिति अनिर्वचनीयख्यातिः सिद्धान्तत्वेनाभिहिता । तदुक्तं कल्पतरौ—

'अथवाऽसंनिधानेन सत्ख्यातिरिह वारिता ।
अवभासादसत्ख्यातिः नृशृङ्गे तदर्शनात् ॥' इति ।

स्पष्टीकृतश्चायमर्थः परिमलकारैः ।

एवं सत्यानृततादात्म्यावगाहिज्ञानत्वरूपमध्यासलक्षणं निरूपयत् 'सत्यानृते मिथुनीकृत्य' इति भाष्यमपि अनिर्वचनीय-ख्यातिं द्रढयति ।

तस्मात् पूर्वाचार्यैः व्यवस्थापितः अनिर्वचनीयख्याति-पक्ष एव समीचीनपद्धतिमध्यास्ते इति बोध्यम् ।

एवं ख्यातिसतत्वं निर्धार्य, तत्वदर्शिगुरूपदेशेन ब्रह्मात्मैक्यसाक्षात्कारमवाप्य, बन्धहेतोरध्यासस्य समूलमुच्छेदे, स्वप्रकाशाद्वितीयपरिपूर्णानन्दात्मकब्रह्मरूपेणावस्थानलक्षणं श्रेयः प्राप्यते इति शिवम् ।

ग्रामः कवेरजातीरे पण्डितग्राममण्डितः ।
शाहजीराजदत्त श्रीविशलूरिति विश्रुतः ॥ (१)

दर्भङ्गानृपमान्य श्रीवेङ्कट्टामतनूभवः ।
छन्दोगवंशजस्तत्र सुब्रह्मण्याभिधो बुधः ॥ (२)

जगद्गुरुदयापाङ्गपातैः संरक्षितोऽनिशम् ।
सुमनोबृन्दसंसेवी तन्त्रार्थज्ञानशुद्धये ॥ (३)

गभीरे ख्यातितत्वानां विचारे प्रविविक्षताम् ।
बालानामुपकाराय विद्याधीशकृपाबलात् ॥ (४)

लघ्वीमिमां ख्यातितत्त्वसमीक्षां व्यतनोन्मुदा ।
निरीक्ष्य मत्कृतिं चेमां स्नेहपूरितया दृशा ॥ (५)
बुधा मामनुगृह्णन्तु समे इत्यभियाचते ।
ग्रन्थस्यास्य निबन्धेन सद्गुरुः संप्रसीदतु ॥ (६)

इति न्यायवेदान्तवागीश–शास्त्ररत्नाकर-
पण्डितराज बिरुदभूषितैः

वे. सुब्रह्मण्यशास्त्रिभिः विरचिता
ख्यातितत्त्वसमीक्षा

समाप्ता ॥

शिवं भूयात्

अनुबन्धः I

उद्धृतानां निबन्धानां सूची

निबन्धः	पुटसंख्या
अद्वैतसिद्धिः	115
उपनिषद्भाष्यम्	111
कल्पतरुः	113, 123
खण्डनम्	109, 139
गादाधरी	115, 138
टीका	71
दीधितिः	129
नैषधम्	53
पञ्चपादिका	125
परमार्थसारः	104
परिमलः	123, 132
बृहन्नारदीयम्	142, 163
भगवत्पादभाष्यम्	90
भागवतम् (स्मृतिः)	92, 105, 129
भामती	10, 101, 112, 127, 171
मणिः	115

निबन्धः	पुटसंख्या
महाभाष्यम्	103
मोक्षधर्मः	130
योगसूत्रम्	107
लघुचन्द्रिका	13, 118
विष्णुपुराणम्	98, 144
विवरणग्रन्थः	123
विद्यासागरी	140
व्युत्पत्तिवादः	77
शतदूषणी	95
शाबरभाष्यम्	133
शाङ्करी	140
श्रीभाष्यम्	38, 48
श्रुतप्रकाशिका	48, 70, 71
संवित्सिद्धिः	70
ज्ञानयाथार्थ्यवादः	73

अनुबन्धः II

उद्धृतानां निबन्धकाराणां सूची

निबन्धा	पुटसंख्या
अद्वैतानन्दस्वामिपादाः	142, 144
उदयनाचार्याः	79, 148, 165
कल्पतरुकाराः	112, 123
खण्डनकाराः	109, 139
गोतमः	108, 119
तत्त्वदीपनकाराः	124
नागेशभट्टाः	99
पतञ्जलिः	107
परिमलकाराः	172
बादरायणः(व्यासाचार्याः,व्यासः)	45, 92, 104, 121, 123, 127
ब्रह्मानन्दसरस्वतीस्वामिपादाः	132
भगवत्पादाः (भाष्यकाराः)	90, 112, 113, 171
भामतीकाराः (वाचस्पतिमिश्राः, मिश्राः	9, 101, 107, 112, 113, 142, 143, 171
मधुसूदनसरस्वतीस्वामिपादाः	117
मञ्जूषाकाराः	124
विज्ञानभिक्षुः	124, 125

निबन्धा	पुटसंख्या
शङ्करमिश्राः	140
शिरोमणिभट्टाचार्याः	24
श्रीहर्षकविः	53
श्रीभाष्यकाराः	98
शेषनागः	104
सिद्धिकाराः	12
हरिः	103

अनुबन्धः III

उद्धृतानां सूत्राणां सूची

सूत्रम्		पुटसंख्या
अर्थवदधातुरप्रत्ययः प्रातिपदिकम्	पा. सू.	116
अनवस्थितेरसंभवाच्च.	ब्र. सू.	56, 86
अभ्र्कौकस्त्वात्.	ब्र. सू.	40
असद्व्यपदेशान्नेति.	ब्र. सू.	126
आत्मकृतेः.	ब्र. सू.	127
आत्मनि चैवं.	ब्र. सू.	127
उत्पादव्यय.	न्या. सू.	100
कृत्तद्धितसमासाश्च	पा. सू.	116
तदनन्यत्वमारम्भण.	ब्र. सू.	104, 125
त्र्यात्मकत्वात्तु.	ब्र. सू.	64
नासतः ख्यातिः.	सा. सू.	110
नानिर्वचनीयस्य.	सा. सू.	110
नान्यथाख्यातिः.	सा. सू.	110
नाभाव उपलब्धेः	ब्र. सू.	126, 133
निर्मातारं चैके.	ब्र. सू.	45

सूत्रम्		पुटसंख्या
बुद्धिसिध्दं तु तदसत्	न्या. सू.	101, 119
भावाच्चोपलब्धेः	ब्र. सू.	126
भावे चोपलब्धेः	ब्र. सू.	125
मायामात्रं तु.	ब्र. सू.	45, 92, 104, 127
युक्तेः शब्दान्तराच्च	ब्र. सू.	126
योनिश्च हि गीयते	ब्र. सू.	126, 127, 136
विपर्ययो मिथ्याज्ञानम्.	यो. सू.	107
सदसत्ख्यातिर्बाधा.	सा. सू.	104, 110, 121, 123
सन्ध्ये सृष्टिः.	ब्र. सू.	45
समर्थः पदविधिः	पा. सू.	116

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya * Bharatiya Vidya

अनुबन्धः IV

उद्धृतानां श्लोकानां सूची

श्लोकः		पुटसंख्या
अथवाऽसंनिधानेन	(क. त.)	172
अन्यथात्वमसत्तस्मात्	(न्या.)	16
अहो बत महानेषः		27
ऋतेऽर्थं यत्प्रतीयेत	(भाग.)	92, 105, 129
कार्यकारणभावाद्वा		8
त्रिवृत्करणमेवं हि	(श्रीभा.)	38
नासद्रूपा न सद्रूपा	(बृ. ना.)	142, 163
नेत्रवृत्तिर्द्विधा		71
बहु स्यामिति संकल्प.	(श्रीभा.)	38
भ्रमात्संस्कारतश्चान्या	(क. त,)	113, 143
मृगतृष्णायामुदकं	(प. सा.)	104
यथा सलिलनिर्भासः	(वाक्यप.)	103
यथार्थं सर्वविज्ञानं	(श्रीभा.)	38
रूप्यादिसदृशश्चायं	(श्रीभा.)	41
व्रीह्यभावे च	(श्रीभा.)	41
शुक्लं कृष्णं पृथिव्याश्च	(श्रीभा.)	38
सूत्रकारोऽपि भूतानां	(श्रीभा.)	38
सोमाभावे च पूतीकग्रहणं	(श्रीभा.)	41

शुभं भूयात्

BVB Sri Sankaracharya Sanskrit Mahavidyalaya
126

Kumar Press, Kumbakonam Phone : 309